In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 90

सारमञ्जरी

प्रधानसम्पादकः
आचार्य टि. केशवनारायणः
निदेशकः

आमुखम्
आचार्य के.वी. रामकृष्णमाचार्यः
कुलपतिचरः

सम्पादकौ
विद्वान् जालिहाळ सुकेशाचार्यः
डा.वि.सुब्रह्मण्यम्
उपनिदेशकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्वविद्यालयः
हैदराबाद्
2011

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 90

तर्कालङ्कारोपाधिकेन पण्डितजयकृष्णशर्म्मणा कृता

सारमञ्जरी

काव्यव्याकरणतर्कतीर्थविद्यावारिधिश्रीकालीपदतर्काचार्य्यकृतया
सारदीपिकानाम्न्या व्याख्यया, श्री आशुबोधविद्याभूषणविरचितया व्याख्यया च
संवलिता

प्रधानसम्पादकः

आचार्य टि.केशवनारायणः

आमुखम्

आचार्य के.वी.रामकृष्णमाचार्याः

कुलपतिचरः

सम्पादकौ

पं.जालिहाळ सुकेशाचार्यः

डा. वि.सुब्रह्मण्यम्

संस्कृत अकाडमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानिया विश्वविद्यायः, हैदराबाद्

2011

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series- 90

SARAMANJARI

Chief Editor
Prof. T. Keshava Narayana
Director I/c

Preface
Prof. K. V. Ramakrishnamacharya
Former Vice Chancellor

Editors
Sri Jalihala Sukeshacharya
Dr. V. Subrahmanyam
Deputy Director

SANSKRIT ACADEMY
(Adarsha Shodha Sanstha, Rashtriya Sanskrit Sansthan,
New Delhi)
Osmania University
Hyderabad - 500 007
Phone & Fax 040-27070281
Email – sanskritacademyhyd@gmail.com
2011

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 90
Saramanjari, Edited by Dr. V. Subrahmanyam, Deputy Director, Sanskrit Academy

ISBN - 978-93-80171-25-8

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) Ministry of Human Resource Development Govt. of India, New Delhi.

Publisher : Director, Sanskrit Academy

© Sanskrit Academy

First Edition : 2011

Copies : 300

Price : Rs/-100
$ 10

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

Printed at : Sandeep Graphics , Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

पुरोवाक्

"*वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते*" इति नीतिः। वाण्यः संस्काराश्च शब्दानुशासनेनैव साध्याः। शब्दानुशासनमित्यस्य शास्त्रस्य विषयः शब्दः। सा वाणी ऋग्वेदे आत्मनः स्वरूपं प्रकटयन्ती एवं वदति "*यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्*"। अहं मनुष्यैः सेव्यमाना यं पुरुषं रक्षितुमिच्छामि तम् अन्येभ्योऽधिकं, स्रष्टारम्, ऋषिं शोभनप्रज्ञञ्च करोमीति भावः।

"*अमन्ततो मां त उपक्षियन्ति*" ये जनाः मां न मन्यन्ते न उपासन्ते, मद्विषयज्ञानरहिताः ते विनश्यन्तीति च चेतयति। तस्मादेवेक्तम्- "*एकः शब्दः सम्यग्ज्ञातः स्वर्गे लोके कामधुक् भवति*" इति। एवं मानवानां हिताय वेदकालादारभ्य अद्यावधिव्याकरणविषयकसिद्धान्तानां प्रतिपादकाः ग्रन्थाः बहवः रचिताः। किन्तु, एतावत्पर्यन्तं नव्यन्यायशैलीमाश्रित्य व्याकरणसिद्धान्तानां प्रतिपादनं तु नैकेनापि विदुषा कृतम्। तर्कालङ्कारोपाधिकेन जयकृष्णशर्मणायं विशिष्टः प्रयोगः कृतः। तैः व्याकरणशास्त्रस्य सारभूताः सिद्धान्ताः नव्यन्यायशैलीमाश्रित्य सम्यक् प्रतिपादिताः। एषः ग्रन्थः सुकुमारमतीनां वैय्याकरणसिद्धान्तबुभुत्सूनां सुखावगमाय उपकरिष्यतीति भावनया अकडम्या प्रकाश्यते। ग्रन्थोऽयं विद्वद्भिः, विद्यार्थिभिः, सुरभारतीसमुपासकैश्च जनैः सम्यगाद्रियत इति आशासे।

अस्य ग्रन्थस्य प्रकाशनार्थमनुदानप्रदानाय राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यः, कुलसचिवेभ्यः आचार्य –सुब्बरायुडुमहोदयेभ्यः, संस्कृतपरिषदः उपाध्यक्षेभ्यः, उस्मानियाविश्व– विद्यालयस्य कुलपतिभ्यः आचार्यसत्यनारायणमहोदयेभ्यः, कुलसचिवेभ्यः आचार्यकिशनरावमहोदयेभ्यः सश्रद्धं हार्दिकं कार्तज्ञ्यं वितरामि।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थस्यास्य सम्पादकयोः अन्यतराय न्यायव्याकरणवेदान्तादिनैकशास्त्र-निष्णात्रे पण्डितसुकेशाचार्याय, अकाडम्याः अस्याः उपनिदेशकाय डा. वि. सुब्रह्मण्याय, अन्येभ्यः सहकृतवद्भ्यः संस्कृतपरिषदः कर्मकर्तृभ्यः सर्वेभ्यश्च साधुवादान् वितरामि।

प्रधानसम्पादकः

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

आचार्यः के.वि.रामकृष्णमाचार्यः
कुलपतिचरः,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः
आचार्यः,व्याकरणविभागः
राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः

महदिदं प्रमोदस्थानं यत् संस्कृत - अकाडमीसंस्थया पण्डितजयकृष्णशर्मणा विरचिता शब्दार्थसारमञ्जरी व्याख्याद्वयेन प्राकाश्यं नीयत इति । अभिनन्दनीयोऽयं प्रक्रमः यतः शाब्दबोधग्रन्थेषु उपलभ्यमानेषु इयमेव सारमञ्जरी प्राथम्यं भजति । तथाहि - विदितमेव समेषां यत् पदवाक्यप्रमाणशास्त्रेषु अध्ययनपरम्परायां प्रसिद्धाः आर्थिकविचारपराः (शाब्दबोधविचारपराः) ग्रन्थाः क्रि.श.षोडशशतकादनन्तरमेवोत्पन्नाः । यद्यपि व्याकरणशास्त्रे वाक्यपदीयं बहुभ्यः शतकेभ्यः पूर्वमेव रचितं तथापि तस्य केवलशाब्दबोधविचारग्रन्थरूपेण स्वीकारः नास्त्येव । एवं विचार्यमाणे भट्टोजिदीक्षितेन क्रि.श.षोडशशतके स्थितेन रचितः वैयाकरण-सिद्धान्तकारिकाग्रन्थः एव इदानीमुपलभ्यमानेषु प्रथमः । ततः तद्व्याख्यारूपौ तद्भ्रातुष्पुत्रेण कौम्डभट्टेन रचितौ भूषण-भूषणसारौ प्रसिद्धौ । कौण्डभट्टस्य समये एव न्यायशास्त्रे जगदीशभट्टाचार्येण शब्दशक्तिप्रकाशिका, गदाधरभट्टाचार्येण शक्तिवादः, व्युत्पत्तिवादश्च रचिताः । तदैव मीमांसाशास्त्रे गागाभट्टेन भाट्टचिन्तामणिः, खण्डदेवेन भाट्टरहस्यमिति ग्रन्थौ रचितौ । ततः परं व्याकरणे नागेशभट्टेन मञ्जूषात्रयं, न्याये गोकुलनाथोपाध्ययेन 'पदवाक्यरत्नाकरः'', गिरिधरशर्मणा 'विभक्त्यर्थनिर्णय''श्च रचिताः ।

एतेषां जीवनकालं यदिपर्यालोचयामः तर्हि इत्थं विमर्शकाभिप्रेतः उपलभ्यते ।

भट्टोजिदीक्षितः - क्रि.श. १५५५-१६२० (ग्रन्थरचनाकालः)
कौण्डभट्टः - क्रि.श. १६००-१६५० (ग्रन्थरचनाकालः)
जगदीशः- क्रि.श. १६३५ (श.श.प्र. लेखनकालः)
खण्डदेवः- क्रि.श. १६६५ (दिवंगतः)
गदाधरः - क्रि.श. १७०९ (दिवंगतः)
नागेशः - क्रि.श. सप्तदश शतकस्योत्तरार्धे

In Public domain. Digitization Muthulakshmi Research Academy

अष्टादशशतकस्य पूर्वार्धे च ।
अयं भट्टोजीदीक्षितपौत्रस्य हरिदीक्षितस्य शिष्यः, क्रि.श. १७१४ वर्षे राजस्थानजयपुरमहाराजेन स्वीये अश्वमेधयागे उपस्थातुम् आहूतः ।

गोकुलनाथः - नागेशंसमकालिकः, यतोऽनेन वैयाकरणमतप्रस्तावे स्वीये ग्रन्थे भूषणभूषणसारयोरेव अनुवादः कृतः । न तु नागेशस्य ।

गिरिधरस्तु गोकुलनाथादपि अर्वाचीनः ।

अथेदानीं सारमञ्जरीकर्तुः समयः कः इति पर्यालोचनीयम् । उपलभ्यमानैतिहासिकग्रन्थपर्यालोचनेन अयं क्रि.श. १६२३ वर्षे सारमञ्जरीम् अरचयदिति ज्ञायते । अनेन च सिद्धान्तकौमुद्याः मध्यसिद्धान्तकौमुद्याः लघुसिद्धान्तकौमुद्याश्च व्याख्याः रचिता इति कथयन्ति ऐतिहासिकाः । ततश्च भट्टोजिदीक्षितात्, तच्छिष्यवरदराजाच्च परः अयं कौण्डभट्टस्य समसामयिक इति वक्तव्यम् । यदि च अस्य कालनिर्देशः 'क्रि.श.१६२३' इत्येवंरूपः स्वीकृतश्चेत् नैयायिकात् जगदीशभट्टाचार्यादयं पूर्व इति, शब्दशक्तिप्रकाशिकातः अपि इयं सारमञ्जरी पूर्वेति ज्ञायते । ततश्चास्याः सारमञ्जर्याः आर्थिकग्रन्थेषु प्राचीनता सिद्ध्यति ।

सारमञ्जर्याः परिशीलनेन पूर्वोक्तः कालनिर्देशः युक्त इत्येवाभाति । यतः धात्वर्थादिविचारेषु जगदीशभट्टस्य विचाराः अत्र नोपलक्ष्यन्ते, किन्तु ततः प्राचीनाः विचाराः एवोपलक्ष्यन्ते । अतश्च अयं शाब्दबोधविचारपरः प्राचीनः ग्रन्थः अवश्यमेव प्राकाश्यं नेय इति 'संस्कृत-अकाडमी' संस्थायाः अयं प्रक्रमः अवश्यमेवाभिनन्दनीयः ।

यद्यपि अयं सारमञ्जरीग्रन्थः कालीपदतर्काचार्यविरचितया सारदीपिकाव्याख्यया, आशुबोधविद्याभूषणविरचितया अन्यया च व्याख्यया पृथक् पृथक् प्रकाशिता । इयं च सारमञ्जरी कालीपदतर्काचार्यकृतया सारदीपिकया व्याख्यया सह क्रि.ऊनविंशे शतके १८४३ वर्षे एव कलकत्तानगरात् प्रकाशिता । जगदीशस्य शब्दशक्तिप्रकाशिकायाः उद्भवात् पूर्वमेवोद्भूता इयं वङ्गदेशे प्रचारे आसीत् । द्वितीयापि अस्याः व्याख्या

In Public domain. Digitization Muthulakshmi Research Academy

वङ्गीयेनैव रचिता । परन्त्वाश्चर्यकरोऽयं विषयः यत् अद्यावधि अस्याः भारते विद्वल्लोके प्रचार एव नास्ति । अत्र चेदं कारणं भवितुमर्हति । सारमञ्जर्यां कातन्त्रव्याकरणप्रसिद्धानां प्रत्ययानां सूत्राणां च उल्लेखोऽस्ति । अतश्चायं जयकृष्णः कातन्त्रानुयायीति अनुमीयते । वङ्गदेशे इदानीमपि कातन्त्रस्य प्रचारः, अध्ययमादिकं चास्तीति कथयन्ति । कातन्त्रं तु न समग्रं व्याकरणम् । पाणिनीयनियमेषु सामान्यनियमा एव तत्रादृताः किञ्चिदिव सूत्रस्वरूपपरिवर्तनेन उपदिष्टाः । विशेषनियमास्तु प्रायशः परित्यक्ताः । ततश्च अपशब्दानामपि साधुत्वमापाद्यते कातन्त्रेण । उदाहरणार्थं यथा- पाणिनीये अण्यन्तावस्थायां कर्तुः (ण्यन्ते शुद्धप्रयोजस्य) गत्याद्यर्थकेषु णिजन्तेषु कर्मत्वमुच्यते । देवदत्तं ग्रामं गमयतीति उदाहरणम् । अस्य सूत्रस्य नियामकत्वमाश्रित्य अन्यत्र कर्तृसंज्ञैव । तथा च पाचयतेः प्रयोगे 'देवदत्तेन ओदनं पाचयती'त्येव । कातन्त्रे तु 'गतिबुद्धी''ति नियम एव नास्ति । प्रयोज्यस्य कर्तुः सर्वत्र कर्तृसंज्ञापि भवति, कर्मसंज्ञापि । ततश्च कर्तृसंज्ञामाश्रित्य तृतीया, कर्मसंज्ञामाश्रित्य द्वितीयेति पर्यायेण प्रयोगद्वयमपि तेन व्याकरणेन साध्यते । यथा - 'देवदत्तम् ओदनं पाचयति' 'देवदत्तेन ओदनं पाचयति' इति । पाणिनीयैस्तु देवदत्तमित्यादिवाक्यं नानुमन्यते । सारमञ्जरीकृता तु प्रयोगद्वयमपि स्वीकृत्य शाब्दबोधो वर्णितः -''एवं चैत्रो मैत्रं तण्डुलं पाचयति इत्यादौ मैत्रपदोत्तरद्वितीयायाः वृत्तित्वं, तण्डुलपदोत्तरद्वितीयाया फलम्, णिजन्तपच्धातुना पाकानुकूलव्यापारोऽर्थः, आख्यातेन तदनुकूलव्यापारो बोध्यः, तदुपरि आश्रयत्वं संसर्गः, तेन 'तण्डुलवृत्तिकर्मत्वानुकूलपाकानुकूलमैत्रवृत्ति व्यापारानुकूलव्यापारवान् चैत्र इति बोधः । एवं यदा 'चैत्रो मैत्रेण तण्डुलं पाचयती''ति प्रयोगः तत्रापि पूर्ववदेवान्वयबोधः'' (६.२७) इति । पाणिनीयानां कातन्त्रं प्रति अवज्ञाभावः अस्यापि ग्रन्थस्योपेक्षायां कारणं स्यात् । किञ्च अस्याः सारमञ्जर्याः उद्भवात् समन्तरमेव इतोऽपि विस्तृता समग्रा च पाणिनीयमेवानुशासनमाश्रित्य जगदीशभट्टेन शब्दशक्तिप्रकाशिका रचिता । जगदीशस्तु अनतिकाले एव अनुमानचिन्तामणेः दीधितेः व्याख्यां विरच्य नैयायिकेषु प्रसिद्धः प्रामाणिकश्चासीत् । ततश्च सारमञ्जर्याः संक्षेपरूपत्वाच्च अस्याम् उपेक्षाबुद्धिः तदा अभवत् इति ऊह्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चात्र प्रतिपादिताः विषयाः सिद्धान्ताश्च अत्यन्तं प्राचीनाः, तत्र च केचन नैयायिकैरेव परित्यक्ताः, विशिष्य जगदीशेन तेषु अनुपपत्तिप्रदर्शनपुरस्सरं स्वीयं मतमावेदितं, यच्च सर्वैः तदानीन्तनैः आदृतमासीत् । उदाहरणार्थं यथा -सारमञ्जर्यां केवलव्यापार एव धात्वर्थत्वेन, फलं कर्मप्रत्ययार्थत्वेन च प्रतिपादितम् । ततश्च अनन्तफलेषु कर्मप्रत्ययस्य द्वितीयादेः शक्तिरभ्युपेया, तत्रापि पुनः 'ओदनं पचती''त्यादिषु द्वितीयया विक्लित्तिरूपस्य फलस्यैवाभिधानाय पचादिधातुसमभिव्याहारस्य हेतुत्वमुपपादनीयमित्यादि गौरवं पक्षेऽस्मिन्नस्तीति जगदीशादिभिः स पक्षः तिरस्कृतः । फलस्यापि धात्वर्थत्वमेवेति तैः स्वीकृतम् । तस्यैव पक्षस्य युक्तियुक्तत्वात् सर्वैः तदा स पक्ष एवादृतः ।

एतादृशैः कैश्चित्सिद्धान्तभेदैः, प्राचीननैयायिकमतप्रतिपादकोऽयम् उपेक्षितः स्यात् अथापि शब्दशक्तिप्रकाशिकादिग्रन्थाः प्रौढाः विद्यार्थिनां प्राथमिकाध्ययनाय अनुपयुक्ता एव । ततश्च शास्त्रे प्रविविक्षूणां विद्यार्थिनां शाब्दबोधविषयकप्राथमिकज्ञानाय अत्यन्तमुपयुक्त एवायं ग्रन्थ इति कथने न काचिद्विप्रतिपत्तिः ।

एतत् सर्वं मनसिकृत्यैव क्रि.श.ऊनविंशशतकस्य पूर्वार्धे वर्तमानेन कालीपदतर्काचार्येण सारदीपिकाव्याख्या रचिता । इयं च व्याख्या अन्वर्था, मूलाक्षरानुगुणा, मूलस्यैव शोभाधायिका । अत्र व्याख्यायाम् उपयुक्तः ज्ञातव्यश्च कोऽप्यंशः न त्यक्तः । शैली च हृद्या । अयमपि व्याख्याता कातन्त्रानुयायी इव लक्ष्यते यतः अनेनापि कातन्त्रसूत्राण्येव उदाहृतानि । अन्यान्यप्युद्धरणानि तद्व्याख्याभिरेवोद्धृतानि । अथापि पाणिनीये मूलकृद्व्याख्यात्रोः सम्यगेव प्रवेशः आसीत् इति एतद्ग्रन्थपर्यालोचनया ज्ञायते ।

सारदीपिकाव्याख्यातुः कालीपदतर्काचार्यस्य पिता हरिदासः । कोटालिपारनगराभिजनोऽयं काश्यपगोत्रः ।
अस्य समयः क इति स्पष्टतया न ज्ञायते अथापि अयं जगदीशात् पर इति व्याख्यायां शब्दशक्तिप्रकाशिकायाः स्मरणेन ज्ञायते । अस्याः क्रि.श.१८४३ वर्षे प्रकाशनात् ततः पूर्व एवायं भवति । जगदीशस्य प्रभावोऽप्यस्मिन् दृश्यते ।

अथ सारमञ्जर्याः द्वितीया व्याख्या आशुबोधविद्याभूषणकृता । अयं च वैयाकरणः । व्याकरणरीत्या समन्वयं कर्तुं प्रयतितवान् । भूषणसारः

In Public domain. Digitization Muthulakshmi Research Academy

अनेन पठितः । तत्रत्यविषयाणामुद्धरणमत्र विद्यते । व्याख्या तु लघ्वी । व्याकरणसिद्धान्तविरुद्धानां प्रथमान्तमुख्यविशेष्यकत्वादीनां विषये अयं विद्याभूषणः तूष्णीम् एवासीत् । इयं गच्छद्व्याख्या टिप्पणीरूपा । अनयापि व्याख्यया सारमञ्जरी पृथक् एव प्रकाशिता । परन्तु प्रकाशनकालः न ज्ञातः, परन्तु प्रकाशनस्य दर्शनेन क्रि.श. विंशशतकस्य पूर्वार्धात् पूर्वमेव द्वितीयव्याख्यया सारमञ्जरी प्रकाशिता स्यादित्यूह्यते ।

यद्यपि अत्र ग्रन्थान्तपुष्पके सारमञ्जरीकर्ता जयकृष्णः शाब्दिकत्वेन कीर्तितः अथापि अयं नैयायिक एव न वैयाकरणः । किन्तु केचन विचाराः अस्य स्वतन्त्राः, केचन वैयाकरणविचारानुगुणाश्चेति ग्रन्थावलोकनेन विदितचरमेव भविष्यति ।

अयं च ग्रन्थः व्याख्याद्वयेन पृथक् पृथक् प्रकाशितः जयपुरे जगद्गुरु रामानन्दचार्य राजस्थान संस्कृत विश्वविद्यालये व्याकरणशास्त्रपीठम् अधितिष्ठतां राष्ट्रपतिसम्मानितानां विद्वत्तल्लजानां श्री बद्रीप्रसाद शास्त्रिणां सकाशात् अधिगतः, यस्य दर्शनेनैव अयमवश्यं प्रकाशनीयः इति तत्रैव विश्वविद्यालये दर्शनविभागे प्रवाचक पदमधितिष्ठद्भिः श्रीवीरनारायण-पाण्डुरङ्गिमहाभागैः प्रस्तुतः, संस्कृत-अकाडमीसंस्थया च व्याख्याद्वयमपि संयोज्य एकग्रन्थरूपेण प्राकाश्यं नीयत इति महतः सन्तोषस्य विषयः । तत्रादौ एतादृशग्रन्थप्रकाशने समुद्युक्ताः संस्कृत-अकाडमीसंस्थायाः अधिकारिणः, एतत्प्रकाशनाय परिश्रमं कृतवन्तौ सम्पादकौ, तथा अन्ये च ये अत्र सहयोगं दत्तवन्तः, ते सर्वे अभिनन्द्यन्ते ।

यैश्चेदमत्यन्तं प्राचीनं पुस्तकं संरक्षितं, यस्य प्रतिकृतिरपि सानुग्रहं दत्ता, तेभ्योऽपि गुरुकल्पेभ्यः श्री बद्रीप्रसादशास्त्रिभ्यः सादरं प्रणामाः निवेद्यन्ते । तथा श्री वीरनारायणमहोदयायापि कार्तज्ञं निवेद्यते । एतादृशस्यास्य ग्रन्थस्य परिचयरूपेण किञ्चित् लेखितुं मामनुरुध्य, अत्र किञ्चित् ममापि भागस्वाम्यभाग्यं कल्पितवते मच्छिष्याय संस्कृत - अकाडमीसंस्थायां सह-निदेशकपदं निर्वहते सुब्रह्मण्याय आशिषः प्रदीयन्ते ।

संस्कृत-अकाडमीसंस्था तु एतादृशग्रन्थतल्लजप्रकाशनेन जगद्विदिता आसीत् अस्ति भविष्यति चेत्यत्र न सन्देहः ।

In Public domain. Digitization Muthulakshmi Research Academy

पुनरेकवारम् एतादृशोत्कृष्टग्रन्थप्रकाशनसन्दर्भे संस्थां, तत्रोद्युतान् च अभिनन्दनपुरस्सरं सभाजयन् विरमामि विस्तरतः ।

इत्थं
विद्वज्जनविधेयः
रामकृष्णमाचार्यः

तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

मुखबन्धः

अथेदानीं प्रकाश्यते श्रीकालीपदतर्काचार्यकृतसारदीपिकाख्यया–आशुबोधविद्याभूषणविरचितविवरणाख्यव्याख्याद्वयसम्वलितः महामहोपाध्या–यशाब्दिकचूडामणिचक्रवर्तिश्रीजयकृष्णपण्डितेन्द्रविरचितः सारमञ्जरी–नामकः प्रबन्धविशेषः।

अज्ञानपङ्कनिमग्नस्य जगतः समुद्धारणाय क्षेमाय च प्रवृत्तस्य वेदान्त–शास्त्रस्य अध्यापने अध्ययने च महत्तरपाण्डित्यसिध्यर्थम् अत्यन्तमुपकारमा–दधानः सारमञ्जरीग्रन्थः अस्मत्परिसरतः प्रकाशं नीयत इति मोमुद्यते चेतः।

यतः व्याकरणशास्त्रं विना वेदा अपि नार्थं बोधयेयुः नाङ्गानि च शक्नुवन्ति निश्चाययितुं तदर्थान् न वा धर्मशास्त्रपुराणादयोऽपि समर्था भवन्ति स्वीयार्थप्रद्योतने अतो शब्दशास्त्रं सर्वोत्कृष्टमितिं विदितमेव विद्वद्वराणाम्। *"एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुक् भवति"* इत्यादि–वाक्येभ्यः सुप्रतीतमेव साधुशब्दानामुपादेयत्वम्। शब्दप्रयोगावबोधे वैयाकरणसारांशस्यैव प्रतिनियन्तृत्वात् मन्दमतीनामशेषतो वैयाकरणसिद्धान्त–बुभुत्सूनां सुखावगमाय सारमञ्जरीग्रन्थः प्रवृत्तः।

साराणां मञ्जरीसारमञ्जरीति शब्दार्थः अथवा सारस्य स्थिरांशस्य उत्कृष्टभागस्य इत्यर्थः मञ्जरी कारणीभूतवस्तुविशेषः तथाहि यथा प्रथमतो मञ्जरी जाता तदुत्तरं क्रमेण सैव वृक्षस्य सारवत्तामनुकूलयति तथैव अयं ग्रन्थः व्युत्पत्तिविशेषलाभे उपयोगितां गमिष्यतीति नाम तात्पर्यम्।

"सर्वे विघ्नाः शमं यान्ति गजेशस्तवपाठत" इति सूक्तिमालोच्य ग्रन्थारम्भे विघ्नेशस्तुतिः कृता ग्रन्थकारेण। कालत्रयनिरूपणादारभ्य एकादिसङ्ख्याशब्दविचारपर्यन्तम् अनन्यासाधारण्या न्यायशास्त्रशैल्या गम्भीरया वाचा परिष्काराविष्कारपूर्वकं प्रवृत्तेयं कृतिः विद्वज्जनविस्मयकारिणी शाब्दिकहृदयमोदमादधाना चकास्ति।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थस्यास्य शैली नातिसुलभा नातिक्लिष्टा। एते पण्डितेन्द्राः क्वचिन्नितरां विवेचयन्ति, क्वचिदत्यन्तं सङ्क्षिपन्ति। एतत् ग्रन्थप्रकाशनं तावत् शाब्दिकविचारपराणां प्रेमातिशयकारणं भविष्यतीत्यत्र न कापि संशीतिः।

शाब्दिकमतप्रदर्शनम्

वैयाकरणास्तु क्रियाप्रधानमाख्यातमित्यादिमहाभाष्यादिवचनं प्रदर्शयन्तः फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः। *"फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणमि"* त्यङ्गीकुर्वाणाः धात्वर्थमुख्यविशेष्यकं शाब्दबोधं निरूपयन्ति।

वैयाकरणमतविमर्शः

कारकनिरूपणावसरे एतेन व्याकरणमतमनूद्य अनन्तरं तन्न इति कारकलक्षणं विमर्शितम्। तथाहि वैयाकरणाः क्रियानिमित्तत्वं कारकत्वमिति वदन्ति। क्रियानिमित्तं कारकं लोकतः सिद्धमित्युक्तेः। तन्न मैत्रस्य तण्डुलं पचतीत्यादौ सम्बन्धिनि मैत्रे कारकत्वापत्तिः। तथाहि सम्बन्धिनि स्वामित्वसम्बन्धवति मैत्रे तण्डुलसम्पादनद्वारा पाकनिमित्तत्वात्, तथाहि यदि मैत्रो न तण्डुलनसम्पादनादिकम् अकरिष्यत् तदा पाक एव नाभविष्यत् इति मैत्रस्य तत्सम्पादनद्वारा निमित्तत्वमव्याहतमतः तत्र कारकलक्षणापत्तिः स्यात् अन्यथैव लक्षणं वाच्यमिति एते मन्यन्ते।

अत्र न्यायमतसमर्थनम्

एते न केवलं शाब्दिकाः किन्तु नैय्यायिकाः इत्यपि अनेने ज्ञायते। दोषनिर्मुक्तं नैय्यायिकाभिमतं कारणलक्षणमेवमवोचन्। *"विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वमिति"* नैय्यायिकाः। एतदर्थं व्याख्याने बहु-चमत्कारीत्या हृदयङ्गमभङ्ग्या समुपर्णितत्वात् अधिकं व्याख्याने एव स्पष्टम्।

In Public domain. Digitization Muthulakshmi Research Academy

पश्यत! न्यायघटितरीत्या कर्मलक्षणं शाब्दिकग्रन्थे।

परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम्। परसमवेतो नाम कर्मभिन्ने समवायसम्बन्धेन वृत्तिमान् यः धात्वर्थः क्रिया तज्जन्यं यत्फलं अनुकूलत्वसम्बन्धेन धात्वर्थांशे प्रकारीभूतः धर्मः तद्वत्वं कर्मत्वम्। उदा - ग्रामं गच्छति, गां ददाति इत्यादि..। गां ददाति इत्यत्र स्वस्वत्वध्वंसपूर्वक-परकीयस्वत्वोत्पत्यवच्छिन्नत्यागः दानं धात्वर्थः, तज्जन्यं फलं स्वस्वत्व-ध्वंसपूर्वकपरकीयस्वत्वं तच्छालित्वात् गोः कर्मत्वम्। तण्डुलं पचति इत्यादौ अधः सन्तापनजन्यविक्लित्तिः फलं तच्छालित्वात्तण्डलादेः कर्मत्वम्। यत्र क्रिया कर्तृगता तत्र लक्षणं मुख्यं, यत्र कर्मगताक्रिया तत्र गौणम्, इत्यादिविचाराः समुपवर्णिताः। एवं करणलक्षणं, सम्प्रदानलक्षणम्, अपादान -लक्षणम्, अधिकरणलक्षणं न्यायनयरीत्या परिष्कृतम्।

न्यायमतरीत्या व्याकरणमतरीत्या च समासवादनिरूपणम्।

"समस्यते संश्लिष्यते एकार्थीक्रियते अस्मै इति व्युत्पत्या एकार्थीभावापन्नसमुदायत्वं समासत्वम्"। "अखण्डोपाधिविशेषः समासः"। वाक्यशक्तिं नाङ्गीकुर्वन्तः नैयायिकाः पद एव शक्तिं लक्षणां च स्वीकुर्वन्ति। न्यायव्याकरणमतभेदः व्याख्याने मूले बहुविस्तृतया समुपवर्णितः सुधीभिः अधिकं द्रष्टव्यः।

कर्मधारयतत्पुरुषद्विगुबहुव्रीहिद्विन्द्वाव्ययीभावनिर्धारणलक्षणं तु व्याकरणशास्त्रव्युत्पत्तिमभिलषतां छात्राणां सोपानम्। एवं एवकारविचारः, सर्वनामपदशक्तिविचारः, इवशब्दार्थविचारः, उद्देश्यविधेयभावः, उपसर्ग-विचारः, क्त्वाप्रत्ययविचारः, नञर्थकविचारः, वैधहिंसाविचारः, पदशक्ति-विचारः, शक्तिग्राहकविचारः, शब्दविचारः, चतुर्विधवाचकलक्षणं, वाचक-लक्षणं, वीप्साविचारः, शाब्दबोधान्तरं, एकादिसङ्ख्याशब्दविचारः बहु-सुन्दरतया निरूपितः। एते शास्त्रिणः निर्दुष्टं ग्रन्थं निर्माय तत्र तत्र प्रघट्टकेषु

In Public domain. Digitization Muthulakshmi Research Academy

उपन्यासमुखेन मन्दामन्दजनमनोहारिण्या शैल्या वाक्यार्थान् निरूप्य दुरवगाहं शाब्दिकन्यायमिश्रात्मकग्रन्थं सर्वसङ्ग्राह्यं चक्रुरिति महत् प्रमोदस्थानम्।

पाठप्रवचनोपयोगी खल्वयं ग्रन्थः विदुषामुपकारीति विषये अध्येतारः प्रमाणम्।

मूलग्रन्थकर्तुः परिचयः

सारमञ्जरीति कृतिः 1623 तमे वर्षे पण्डितजयकृष्णशर्मणा विरचिता विराजते। एते ग्रन्थकाराः शब्दार्थतर्कामृतम्, आख्यातविवेकं सिद्धान्तकौमुदीव्याख्यां सुबोधिनीं, मध्यसिद्धान्तकौमुदीविलासं, लघुकौमुदी -व्याख्यानमिति नैकं ग्रन्थं निर्माय च छात्राध्यापकानामुपकारं चक्रुः।

अयं जयकृष्णः मौनीवंशोद्भवः, जानकीरघुनाथभट्टयोः पुत्रः, गोवर्धनभट्टस्य पौत्रः, कारकवादकर्तृः श्रीकृष्णस्य ज्येष्ठभ्राता च आसीदिति विश्रुतिः।

व्याख्यातॄणां परिचयः

1. तर्कतीर्थोपाधिकः श्रीकालीपदशर्म्मा सारदीपिकाख्यटीकाकर्ता, अयं तर्काचार्योपनामकः, श्रीहरिदासात्मजश्च आसीत्। यथा मङ्गलश्लोक-व्याख्यानावसरे स्वयं प्रतिपादितरीत्या अयं कोटालिपारनगरप्रभवः काश्यपान्वयश्च।

2. आशुबोधोपनामाख्यः विद्याभूषणशेषनामकः अयं द्वितीय-व्याख्यायाः कर्ता। अस्य विवरणं पूर्णशः नोपलभ्यते।

मुद्रितप्रतीनां विषये किञ्चित्

अस्माभिः, 1843 तमे वर्षे कोलकतास्थ आश्रवप्रकाशनेन प्रकाशिता श्री कालीपदतर्काचार्य्यकृता सारदीपिकानाम्नीसारमञ्जरीव्याख्या एवञ्च इतरप्रकाशिता श्री आशुबोधविद्याभूषणविरचिता सारमञ्जरीव्याख्या च प्राप्ते। द्वेऽपि मुद्रितप्रती इति कारणतः ग्रन्थसंशोधनक्लेशता नानुभूता। अतः

In Public domain. Digitization Muthulakshmi Research Academy

एतयोः मुद्रितप्रतिकृतीः प्रदत्तवते आचार्य श्री वीरनारायणपाण्डुरङ्गिवर्याय धन्यवादान् वितरावः।

कृतज्ञताविनिवेदनम्

न्यायव्याकरणादिशास्त्रेषु शुकवत् शिक्षितेभ्यः पण्डितेन्द्रविद्वत्कुल-तिलकचतुस्तन्त्रकोविदेभ्यः परमपूज्येभ्यः मम (जालिहाळ सुकेशाचार्यस्य) गुरुभ्यः बाळगारु श्रीनिवासाचार्येभ्यः नमः शतम्।

पुस्तकमुद्रणावसरे प्रतिपदं मार्गदर्शनं दत्त्वा आमुखेनाशीर्वचनं दत्तवद्भ्यः अस्मद्गुरुभ्यः (सुब्रह्मण्यस्य) जयपुरस्थराजस्थानसंस्कृतविश्व-विद्यालयस्य कुलपतिचरेभ्यः न्यायव्याकरणशास्त्रविभूषितेभ्यः शिष्य-वत्सलेभ्यः श्रीमद्भ्यः आचार्य कम्दालै वेङ्कटरामकृष्णमाचार्येभ्यः सश्रद्धं सविनयं प्रणतिशतान् समर्पयामि।

ग्रन्थस्यास्य मुद्रणे सहकृतवद्भ्यः आचार्य श्रीनिवास-वरखेडिमहोदयेभ्यः, पुरातनमुद्रितप्रतीनामुपकल्पनेन सहकृतवद्भ्यः आचार्य -विरनारायणपाण्डुरङ्गिवर्येभ्यश्च धन्यवादान् समर्पयावः।

संशोधनसम्पादनकर्मणि पुरुषमात्रसाधारणा भ्रमप्रमादादिजनिताः दोषाः अत्रावश्यं भवेयुरेव, तथापि ये गुणैकपक्षपातिनो विद्वांसः क्षाम्यन्तु।

अस्तु श्रीः

जालिहाळ सुकेशाचार्यः

सुब्रह्मण्यः

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

विषयाः	पृ.सं.
कालत्रयनिरूपणम्	04
लकारादेः शक्तिनिरूपणम्	06
शाब्दबोधप्रकारः	21
द्विकर्म्मकविचारः	30
कारकविचारः	36
कर्त्तृलक्षणम्	41
क्रियालक्षणम्	42
कर्मलक्षणम्	43
करणलक्षणम्	50
सम्प्रदानलक्षणम्	52
अपादानलक्षणम्	55
अधिकरणलक्षणम्	62
समासवादः	65
कर्म्मधारयलक्षणम्	70
तत्पुरुषलक्षणम्	72
द्विगुलक्षणम्	73
बहुव्रीहिलक्षणम्	74
द्वन्द्वलक्षणम्	77
अव्ययीभावलक्षणम्	82
निर्द्धारणम्	83
एवकारविचारः	85
सर्वनामपदशक्तिविचारः	87
इवशब्दविचारः	90
उद्देश्यविधेयभावः	91
उपसर्गविचारः	93
क्त्वाप्रत्ययविचारः	94
नञर्थकथनम्	95
वैधहिंसाविचारः	100
पदशक्तिनिरूपणम्	102
शक्तिगाहकनिरूपणम्	103
शब्दविचारः	105
चतुर्विधिबाचकलक्षणम्	107
वाचकलक्षणम्	108
वीप्साविचारः	110
शाब्दबोधान्तरम्	111
एकादिसङ्ख्याशब्दविचारः	

In Public domain. Digitization Muthulakshmi Research Academy

सारमञ्जरी

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

तर्कालङ्कारोपाधिकेन पण्डितजयकृष्णशर्म्मणा कृता

सारमञ्जरी

हेरम्बचरणद्वन्द्वं विघ्ननाशकरं परम्।
प्रणम्य जयकृष्णेन क्रियते सारमञ्जरी॥

अथ काव्यव्याकरणतर्कतीर्थविद्यावारिधि-
श्री कालीपदतर्काचार्य्यकृता सारदीपिकानाम्नी-व्याख्या

मङ्गलाचरणम्

नानायोगविधानतो मुनिगणैराराधितामन्वहं
सर्वार्थप्रतिदानकल्पलतिकां सङ्ग्रामलीलावतीम्।
कैलासेश्वरविभ्रमप्रणयिनीं व्यामोहविध्वंसिनीं
शक्तिं कामपि भक्तियुक्तमनसा नित्यं भजे शाश्वतीम्॥
नत्वा शक्तिपदद्वन्द्वमप्रतिद्वन्द्वि सुन्दरम्।
अज्ञानतिमिरध्वंसि कंससूदनवन्दितम्॥
तर्कतीर्थोपाधिकश्रीहरिदासद्विजात्मजः।
कोटालिपार नगरप्रभवः काश्यपान्वयः।
श्रीकालीपदशर्म्मायं तर्काचार्योपनामकः॥
व्याख्यां प्रतनुते सारमञ्जर्य्याः सारदीपिकाम्॥
हे सन्तः करुणाधीना दीनस्य वचनेष्वमी।
पदे पदे सतो दोषान् कृपया ज्ञापयन्तु नः॥

अथ श्री आशुबोधविद्याभूषणविरचिता सारमञ्जरीव्याख्या

नत्वादावरविन्दसुन्दररुचिं वागीश्वरीं सिद्धये।
शब्दानामनुशासनं सरलया वाचा स्फुटं दर्शयन्॥
व्याचष्टे जयकृष्णसूरिरचितां सारादिमां मञ्जरीम्।
विद्याभूषणशेषनाममहितो विप्राशुबोधः सुधीः॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रारिप्सितवस्तुसमाप्तिप्रतिबन्धकीभूतविघ्नविध्वंसनकारणीभूतां गणपत्यात्मकस्य परमेश्वरस्य प्रणतिं शिष्याणामवधानाय प्रतिज्ञारूपां ग्रन्थकृत् निबध्नाति - **हेरम्बेत्यादि। विघ्नेति** - विघ्नः अभीष्टवस्तुसिद्धिप्रत्यूहभूतदुरितरूपः, तस्य नाशकरं ध्वंसकारणम्। एतेन प्रणामे हेतुर्दर्शितः, अभीष्टवस्तुसिद्धिप्रतिबन्धकीभूतविघ्ननाशस्यापि इष्टत्वात् तत्साधकतया हेरम्बचरणद्वन्द्वस्य तत्प्रणामेऽपि प्रवृत्तिः सफला प्रणामविषयतया एव हेरम्बचरणद्वन्द्वस्य अभीष्टसाधकत्वात् न स्वरूपत एवेति।

ननु कथमन्यान् देवान् परित्यज्य हेरम्बचरणस्तुतिः प्रस्तुतेत्याकाङ्क्षायामाह - **परमिति**। परम् उत्कृष्टम्। तथाहि - विघ्ननाशं प्रति देवतान्तरापेक्षया स्वातन्त्र्येण विघ्नराजस्य हेरम्बस्यैव समुत्कर्षात् तत्प्रणाम एव सप्रयोजन इति। हेरम्बचरणद्वन्द्वं गणपतिपादद्वयम्। ननु हेरम्बस्य एकमपि चरणमर्च्यमानम् अभीष्टफलनिर्व्वर्त्तकं भवितुमर्हति, किं पादद्वयप्रणामेन इत्याकाङ्क्षायां केचिदाहुः। ग्रन्थसम्पादने विघ्नध्वंसः तद्द्वारा समाप्तिश्चेति द्वे एव अभीष्टफले, तत्र द्वयोरेव प्रकृते अभीष्टत्वमभिव्यज्यते, पादद्वयेन अर्च्यमानेन फलद्वयी साधयिष्यत इति भावः।

प्रणम्य स्वावधिकोत्कर्षवत्तया ज्ञापयित्वा, प्रपूर्व्वनमधात्वर्थस्य स्वावधिकोत्कर्षवत्तया ज्ञापनरूपत्वात्, द्वितीयाया विषयत्वं विषयित्वं वा अर्थः। तस्य च निरूपकत्वसम्बन्धेन स्वरूपेण वा प्रणामपदार्थैकदेशे ज्ञाने अन्वयः। ल्यप्प्रत्ययस्य

इह खलु व्याकरणं नाम शब्दानुशासनम् *"अथ शब्दानुशासनम्"* इति भाष्योक्तेः। किञ्च *"एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुक् भवति"* इत्यादिवेदवाक्येभ्यश्च सुप्रतीतमेव शिष्टशब्दानामुपादेयत्वम्। तत्र किल शब्दप्रयोगावबोधे वैयाकारणसारांशस्यैव प्रतिनियन्तृत्वात् सुकुमारमतीनामशेषतो वैयाकरणसिद्धान्तबुभुत्सूनां सुखावगमाय सारमञ्जर्य्याख्यं ग्रन्थं चिकीर्षुस्तर्कालङ्कारो निर्विघ्नेनारिप्सितपरिसमाप्तिकामोऽविगीतशिष्टाचारविषयं विघ्नविनाशक-विनायकप्रणामरूपं मङ्गलमाचरन्नाह **प्रणम्येति**। विघ्नविनाशकरं परं हेरम्बचरणद्वन्द्वं प्रणम्य, तर्कालङ्कारोपाधिकेन जयकृष्णशर्म्मणा, इयं वक्ष्यमाणा सारमञ्जरी, साराणां व्याकरणशास्त्रस्येति शेषः, मञ्जरीव यथोक्ता क्रियते।

In Public domain. Digitization Muthulakshmi Research Academy

आनन्तर्य्यमर्थः। तथा च उक्तविशेषणद्वयविशिष्टहेरम्बचरणद्वन्द्वविषयकस्वावधिको-त्कर्षप्रकारकज्ञानानुकूलव्यापारानन्तरमित्यर्थः।

जयकृष्णेन तदाख्येन पण्डितेन मयेति ऊह्यम्। **सारमञ्जरी** तदाख्यो ग्रन्थः क्रियते निरूप्यते, कृधातोर्धात्वर्थसामान्यवाचित्वात् निरूपणमर्थः, अथवा सारमञ्जर्य्याः ग्रन्थरूपत्वात् शब्दमय्या उत्पादनमेव ज्ञानानुकूलव्यापारः, शब्दमय-वस्तूत्पादनस्य शाब्दोच्चारणरूपतायामेव पर्य्यवसानात्। **क्रियते** इत्यत्र भविष्यत्सामीप्ये वर्त्तमानता, करिष्यते निरूपयिष्यते इत्यर्थः। एतेन शिष्यावधान-फलिका प्रतिज्ञा दर्शिता, प्रतिज्ञा हि उत्तरकालकर्त्तव्यत्वप्रकारकबोधानुकूल-व्यापारः। एतद्वाक्योच्चारणेन सारमञ्जरीनिरूपणमुत्तरकालकर्त्तव्यमित्याकारक-बोधोदयात् उच्चारणोच्चार्यमाणयोरभेदविवक्षया च एतद्वाक्यस्य प्रतिज्ञावाक्यत्व-मव्याहतम्।

सारस्य स्थिरांशस्य उत्कृष्टभागस्य इत्यर्थः, **मञ्जरी** कारणीभूतवस्तुविशेषः, तथाहि यथा प्रथमतो मञ्जरी जाता अनन्तरं क्रमेण सैव वृक्षस्य सारवत्तामनुकूलयति तथैव अयं ग्रन्थः व्युत्पत्तिविशेषलाभे उपयोगितां गमिष्यतीति नामतात्पर्य्यम्।

ननु अकृतप्रणामस्य ग्रन्थकर्त्तुरपि ग्रन्थे दृष्टा निर्विघ्नपरिसमाप्तिः नापि च दृष्टा सकलदेवतानमस्कारकर्त्तुरपि बाणभट्टादेर्ग्रन्थे सा इति प्रणामस्य अन्वयव्यभिचार-तो व्यतिरेकव्यभिचारतश्च न समाप्तिं प्रति विघ्नध्वंसं प्रति वा कारणत्वमुपपद्यते इति चेन्न। यत्र सत्यपि नमस्कारे नाभिप्रेतसिद्धिः तत्र विघ्नप्राचुर्य्यं कल्प्यते। यत्र च असति नमस्कारे समाप्तिर्दृश्यते तत्र जन्मान्तरीयशुभादृष्टपरम्परा समाप्तिहेतुः कल्प्यते। तदिदं निष्कृष्टं यद् विघ्नध्वंसद्वारा नमस्कारादयः ग्रन्थसमाप्तिं प्रति कारणं, स्वतः सिद्धविघ्नविरहस्थले च विघ्नशङ्कया तदाचरणम्। आदिपदग्राह्यं क्रियान्तरञ्च अदृष्टद्वारेण तत्र कारणं, केचित्तु विघ्नात्यन्ताभावेन समाप्तिसाधनं ब्रुवते तेषां न काप्यनुपपत्तिरिति। नमस्कारश्लोकस्य निष्कृष्टशाब्दबोधो यथा - उत्कर्षविशिष्ट-विघ्नध्वंसहेतुभूतहेरम्बचरणद्वन्द्वविषयकस्वावधिकोत्कर्षप्रकारकबोधानुकूलव्यापा-रानन्तरत्वविशिष्टजयकृष्णवृत्तिकृतिप्रयोज्यशिष्यसमवेतबोधानुकूलव्यापारविषय-तावती सारमञ्जरीति।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र प्रथमतः कालत्रयनिरूपणम्।

तत्र सारमञ्जरीनिबद्धविषयाणां मध्ये **प्रथमतः** ग्रन्थस्य प्रवृत्तिकाले, आद्य-कृताविति यावत्। कालत्रयस्य अतीतवर्त्तमानभविष्यदुपाधिभेदात् त्रिधा विभक्तस्य कालाख्यपदार्थस्य निरूपणं ज्ञापनम्। एकस्यापि कालस्य अतीतत्वादिविलक्षण-धर्म्मवत्तया भेदात् त्रयेत्याख्यानम्। अत एव निरुक्तविभाग उपपद्यते *"सामान्य-धर्म्मावच्छिन्नानां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण ज्ञापनस्य"* विभाग-पदार्थत्वात्।

तत्रेत्यत्र निर्द्धारणे सप्तमी, न तु अधिकरणे, वाक्यरूपस्य सारमञ्जरीग्रन्थस्य प्रकृतनिरूपणविषयात्मककालाधिकरणत्वायोगात्। उद्देश्यतावच्छेदकशून्ये सामान्य-धर्म्मावच्छिन्ने विधेयाभाववत्त्वरूपनिर्द्धारणार्थस्तु उपपद्यत एव प्रथमनिरूपण-विषयत्वरूपस्य विधेयस्य उद्देश्यतावच्छेदकशून्ये कालत्रयातिरिक्ते सारमञ्जरीग्रन्थ-प्रतिपाद्यविषये सामान्यधर्म्मावच्छिन्ने अभावात्।

लडादीनां वर्त्तमानकालादौ शक्ततया तदर्थनिरूपणं कालत्रयनिरूपण-सापेक्षमिति, प्रथमतः सामान्येन कालत्रयनिरूपणम्, एषापि शिष्यावधानफलिका प्रतिज्ञैवेति क्रियत इत्यस्य अध्याहारेण तत्सामञ्जस्यात् पूर्व्ववत्।

वर्त्तमानेत्यादि - वर्त्तमानः वर्त्तमानक्षणवृत्तिः यो ध्वंसः तत्प्रतियोगित्वम् अतीतत्वम्। अतीतोपाधिकस्य खण्डकालस्य वर्त्तमानक्षणे नाशसत्त्वात् तत्कालस्य अतीतत्वम्। अत्रेदमवधेयं - यथा यस्य अभावः स एव प्रतियोगी, अभावश्च आदौ द्विविधः, संसर्गाभावान्योन्याभावभेदात्, अनन्तरञ्च संसर्गाभावोऽपि त्रिविधः। प्रागभावध्वंसाभावात्यन्ताभावभेदात्, जन्यस्य वस्तुनः उत्पत्तेः पूर्व्वं योऽभावः स प्रागभावः तस्य प्रतियोगि भविष्यदुत्पत्तिकं तद्वस्तु एव, यश्च घटो नष्ट इत्यादिव्यवहारविषयोऽभावः स ध्वंसाभावः तस्य च प्रतियोगी घटो नष्ट इत्यादौ घटादिरेव, तत् यस्य नाशः भवति स एव ध्वंसाभावप्रतियोगीति स्पष्टम्।

तत्रादौ सर्व्वनियामकतया कालमेव निरूपयति - तत्रेति। तत्र निरूपणीयेषु कालस्यापरिच्छिन्नस्यापि तद्वृत्त्यतीतानामतीतादिवस्तुभेदेन त्रित्वं सङ्गच्छते।

वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वम्। वर्त्तमानप्रागभावप्रतियोगित्वं भविष्यत्त्वम्। स्वावच्छिन्नकालवृत्तित्वं वर्त्तमानत्वम्।

अत्यन्ताभावश्च सदातनाभावः, भूतले घटो नास्ति इत्यादिप्रतीतिविषयः, तस्य च प्रतियोगी प्रकृते घट इत्येवम्। वर्त्तमाने क्षणे अतीतक्षणानां ध्वंसो वर्त्तते क्षणानां तत्तदनन्तरक्षणेष्वेव नाशात्, अत एव तत्तत्क्षणानन्तरक्षणमपेक्ष्य तत्तत्क्षणानाम् अतीतत्वं सिद्धम्। वर्त्तमानत्वं ध्वंसविशेषणं, वर्त्तमानत्वञ्च वक्ष्यमाणं, ध्वंसस्य च निरूपितत्वसम्बन्धेन प्रतियोगितायाम् अन्वयः, तदयं लक्षणार्थबोधः – स्वावच्छिन्नकालवृत्तित्वविशिष्टध्वंसनिरूपितप्रतियोगित्वमतीतत्वमिति।

वर्त्तमानप्रागभावेति – वर्त्तमानत्वं प्रागभावविशेषणम्। वर्त्तमानो यः प्रागभावः, तन्निरूपितं प्रतियोगित्वं भविष्यत्त्वं, तथाहि – यद्वस्तु नाद्य वर्त्तते, परं भविष्यत्काले भविष्यति, तस्य प्रागभावो वर्त्तमानः तत्प्रतियोगित्वञ्च भविष्यदुत्पत्स्यमानपदार्थवृत्तिः। अत एव वर्त्तमानक्षणमपेक्ष्य अनन्तरजातस्य क्षणस्य प्रागभावो वर्त्तमानक्षणे वर्त्तत इति अनन्तरक्षणस्य भविष्यत्त्वं, भविष्यत्त्वेन वर्त्तमानक्षणापेक्षया अनन्तरक्षणानां सर्व्वेषां तुल्यत्वेऽपि अद्य घटो भविष्यति श्वो घटो भविष्यतीत्यादिव्यवहारेषु कालवाचकपदप्रतिपाद्यार्थस्य उत्पत्तौ अन्वयात्। अर्थवैलक्षण्यं वैपरीत्येन व्यवहारबाधश्च बाधज्ञानस्य तादृशव्यवहारप्रतिबन्धकत्वात्।

वर्त्तमानेत्यादि। वर्त्तमानध्वंसप्रतियोगित्वम्, आरब्धपरिसमाप्तत्वमित्यर्थः स किलातीतः कालोऽद्यतनानद्यतनभेदेन द्विविधः। अतीताया रात्रेः पश्चार्धेण आगमिन्याः पूर्वार्द्धेण सहितो यः कालः तत्र वृत्तिध्वंसप्रतियोगी अद्यतनातीतः, तदतिरिक्तः अनद्यतन इति।

वर्त्तमानेति। वर्त्तमानकालोत्तरकालोत्पत्तिकत्वम् इत्यर्थः।

स्वावच्छिन्नेत्यादि। प्रयोगसमानकालीनत्वम्, आरब्धापरिसमाप्तत्वं वा तदर्थः। येन वस्तुना यः कालोऽवच्छिद्यते स तस्य वर्त्तमानः, यथा इदानीं घटो वर्त्तत इत्यत्र घटो वर्त्तमान इति। स पुनश्चतुर्धा भिद्यते। तथाहि– *“प्रवृत्तोपरतश्चैव वृत्ताविरत एव च। नित्यप्रवृत्तः सामीप्यः वर्त्तमानश्चतुर्विधः”॥* इति क्रमेणैतेषामुदाहरणं यथा

In Public domain. Digitization Muthulakshmi Research Academy

अथ लकारादेः शक्तिनिरूपणम्।

अथ अतीतत्वभविष्यत्त्वलक्षणघटकीभूतवर्त्तमानपदार्थः क इत्याकाङ्क्षायां तल्लक्षणमाह – स्वावच्छिन्नेत्यादि। स्वपदं लक्ष्यपरम्। तथा च स्वावच्छिन्नकाल-वृत्तिर्यः स एव वर्तमानः। अयम्भावः – यस्मिन् क्षणे यद् वर्तते, स क्षणः तस्य वर्तमानः क्षणः। स एव च स्वावच्छिन्नोऽपि स्वविशिष्ट इति तदर्थः। तथा च घटस्य सत्ताकाल एव घटावच्छिन्नकालः, तत्र वृत्तित्वं घटस्य अव्याहतमिति घटस्य वर्त्तमानत्वम्। वर्त्तमानलक्षणानां वर्त्तमानत्वन्तु स्वावच्छिन्नकालपदेन शब्दादि-रूपस्य क्षणस्य आदानात् समन्वेतव्यम्। कालवृत्तित्वमित्यत्र वृत्तित्वं कालिक-सम्बन्धेन बोध्यम्। सम्बन्धान्तरेण तत्स्वीकारे अतीतादिक्षणानामपि परम्परया वर्त्तमानकालवृत्तित्वात् वर्त्तमानत्वापत्तेः। तदेवं कालत्रयविमर्शो हि प्रकृतोपयोगी, लडादिषु व्याख्यातव्येषु कालत्रयस्यैव आदानात् पूर्व्वाचार्य्यसिद्धत्वात्।

अथेत्यादि – अथशब्द आनन्तर्य्ये, अथेति कालनिरूपणानन्तरमित्यर्थः। लकारादेः लट्प्रभृतिविभक्तेः शक्तेः ईश्वरेच्छाविषयत्वरूपाया वृत्तेः निरूपणं ज्ञानानुकूलव्यापारः, तथा च लट्प्रभृतीनां वर्त्तमानत्वादौ शक्तिरिति प्रस्तोष्यते, तत्प्रतिज्ञेयं शिष्याणामवधानसम्पादनाय।

– मांसं न खादति, आदौ मांसभोजनप्रवृत्तः परतः उपरतः इत्यवगमः। इह कुमाराः क्रीडन्ति, तदानीन्तनक्रीडाभावेऽपि पूर्वक्रीडानां बुद्धौ वर्त्तमानत्वात्। पर्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात्, किञ्च पर्वतानां स्थितत्वेन वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया, पर्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात्। सामीप्यश्च पुनर्द्विविधः भूतसामीप्यः भविष्यत्सामीप्यश्च। भूतसामीप्यो यथा – कदागतोऽसीति प्रश्ने अध्वखेदादेर्वर्त्तमानत्वात् एषोऽहमागच्छामीति आगतोऽपि वदति, भविष्यत्सामीप्ये यथा – कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामीति गमने क्रियमाणोद्यमो वदतीति।

अथेत्यादि। अथ कालत्रयनिरूपणानन्तरं कालविशेषवाचकलडादीनां शक्तिं निरूपयति। लकाराः खलु दशविधाः। लट् लिट् लुट् लृट् लेट् लोट् चेति टकारेतः

In Public domain. Digitization by Muthulakshmi Research Academy

तत्र लटो वर्त्तमानत्वम्। विधिलिङो भविष्यत्त्वं, विधिः, सम्भावना च। विधिः – कर्त्तव्यतोपदेशः।

लडादिभेदेन आख्यातस्य दशविधत्वम्, आख्याततत्वञ्च स्वेतरप्रथमान्तनामार्थ–धर्म्मिकस्वार्थसङ्ख्याप्रकारकान्वयबोधजनकप्रत्ययत्वम्, स्वपदम् आख्यात–परम्, तथाहि – 'देवदत्तः पचति' इत्यादौ आख्यातप्रत्ययस्य वर्त्तमानत्वं सङ्ख्या कृतिश्च अर्थाः, स्वेतरप्रथमान्तनामार्थः देवदत्तपदार्थः तद्धर्मिकः तद्विशेष्यकः स्वार्थसङ्ख्याप्रकारकः तिप्रत्ययार्थैकत्वप्रकारकः यः अन्वयबोधः तज्जनक–प्रत्ययः तिप्रत्यय एव प्रकृते, प्रत्ययार्थसङ्ख्यायाः कर्त्तृवाच्ये कर्त्तरि कर्म्मवाच्ये च कर्म्मण्येव अन्वयात् तथात्वम्। अत एव कर्त्तृवाच्ये च कर्त्रनुगता कर्म्मवाच्ये कर्म्मानुगतैव धातूत्तरप्रत्ययवचनव्यवस्था। यथा जनः पचति, जनौ पचतः जनः दृश्यते, जनौ दृश्येते इत्यादि। तत्रेत्यस्य निर्द्धारणार्थकत्वं पूर्व्ववत्।

विधिलिङः लिङ्विभक्तेः **भविष्यत्त्वं** वर्त्तमानप्रागभावप्रतियोगित्वरूपं पूर्व्वोक्तं, **विधिः** – न प्रवर्त्तकवाक्यमात्रं, 'तरति मृत्युं, तरति ब्रह्महत्याम्' इत्याद्यर्थवादस्यापि प्रवर्त्तकवाक्यत्वात्। यद्यपि इष्टसाधनताबोधकवाक्यस्यैव विधित्वस्वीकारे प्रागुक्तदोषविरहस्तथापि 'पङ्गुः समुद्रं तरेत्' इत्यस्यापि इष्ट–साधनताबोधकवाक्यत्वात् विधित्वप्रसक्तिरिति कृतिसाध्यत्वबलवदनिष्टाननु–बन्धित्वयोस्तत्र निवेशः कर्त्तव्यः। तथाहि – 'बलवदनिष्टाननुबन्धित्वे सति कृति–

षट्। लङ् लिङ् लुङ् लृङ् इति ङितश्चत्वारः इति। तर्कालङ्कारेणैतेषां विशेषतः प्रयोगस्थानानि उदाह्रियन्ते विशदम्। अत्राह हरिः – *"वर्त्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति। विध्यादौप्रार्थनादौ च क्रमाज्ज्ञेया लडादयः।। ह्यो भूतेप्रेरणादौ च भूतमात्रे लडादयः। सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः।"*[2] इति।

विधिरिति। विधिर्नाम प्रेषणमिति भाष्यकारः। भृत्यादेः कस्याञ्चित् क्रियायां नियोजनमिति च तदर्थः। यथा – अग्निहोत्रं जुहुयात् स्वर्गकाम इति।

---

1. वै.सि.भू.सा. 22   2. वै.सि.भू.सा. 23

In Public domain. Digitization Muthulakshmi Research Academy

सम्भावना कल्पनम्। लोटो भविष्यत्त्वम् आशीः, प्रेरणा च। आशीः – शुभचिन्तनम्, प्रेरणं – प्रवर्तनम्। आशीर्लिङो भविष्यत्त्वम् अशीश्च। लुट् लृटोर्भविष्यत्त्वम्। तव्यानीययोर्भविष्यत्त्वम्, विधिश्च। लङ्लुङोरतीतत्वम्। लिटो वक्तृपरोक्षत्वम्, अतीतत्वञ्च। लृङोऽतीतत्वम्, क्रियातिक्रमश्च। कुतश्चिद्वैगुण्यात् क्रियाया अनिष्पत्तिः क्रियातिक्रमः।

साध्येष्टसाधनताबोधकवाक्यत्वमेव विधित्वमिति न दोषः। 'पङ्गुः समुद्रं तरेदि'त्यत्र समुद्रतरणस्य कृतिसाध्यत्वाभावात् न विधित्वम्। 'परदारान् गच्छेदि'त्यस्य बलवदनिष्टाननुबन्धित्वविरहात् न तथात्वम्। 'स्वर्गकामो यजेत अश्वमेधेन' इत्यादेः बलवदनिष्टाननुबन्धित्वात् कृतिसाध्येष्टसाधनताबोधजनकत्वाच्च विधित्वम् इति। कर्त्तव्यतोपदेश इत्यत्र तव्यप्रत्ययस्यापि उक्तार्थविशेषः।

सम्भावनेति – सम्भावनात्वाख्यः विषयताविशेषः तद्विशिष्टं ज्ञानं सम्भावना तदेव कल्पनं सा च विषयता एककोट्यंशे औत्कट्यरूपा, सैव सामान्यसंशयादस्य पदार्थस्य वैलक्षण्यं सम्पादयति, तदेवं त्रयोऽर्था लिङ्विभक्तेः। **आशीः** दृष्टविषयिणी इच्छा, शुभचिन्तनमपि तदेव, **प्रेरणं** प्रवर्त्तनं प्रवृत्तानुकूलव्यापारः।

वक्तृपरोक्षत्वं प्रयोगकर्त्तुः प्रत्यक्षाविषयत्वम्, यत्क्रियावाचकपदोत्तरं लिट् प्रत्ययः तत्क्रिया यदि प्रयोक्तुः प्रत्यक्षविषयो न स्यात् तदा तदुत्तरं लिड् विभक्तिः। यथा कथकेन प्रयुक्ते 'जघान कंसं किल वासुदेव' इति वाक्ये जघानेति पदोत्तरम्।

लिट इत्यादि। लिटोऽनद्यतन भूतत्वं पारोक्ष्यञ्चार्थः। पारोक्ष्यन्तु चक्षुरादीन्द्रिया –णामविषयत्वं साक्षात्कारभिन्नविषयत्वमिति यावत्। तेन हि साक्षात्कृतव्यापारे न लिट् प्रयोगः। ननु अहं पपाचेत्यादौ उत्तमपुरुषे कथं लिट्प्रवृत्तिः इह खलु प्राचीनैरुक्तं चित्तव्यासङ्गादिति। ततः साक्षात्करोमीत्यादि ज्ञानाविषयत्वमिति फलितार्थः।

लृङ् इति। लृङो भूतत्वं भविष्यत्वं जन्यजनकत्वञ्चार्थः *"लिङ् निमित्ते लृङ् क्रियातिपत्तौ"* (पा 3.3.139) इति सूत्रात्।

In Public domain. Digitization Muthulakshmi Research Academy

यङ क्रियासमभिहारः अतिशयित्वञ्च। सनो धात्वर्थविषयेच्छासमानकर्त्तृ-कत्वेऽभिधानम्।

कंसवधस्य युगान्तरे जातत्वात् वर्त्तमानयुगवर्त्तिनः कथकस्य न तत्र प्रत्यक्षविषयता इति तत्र लिड् विभक्त्युपपत्तिः।

वैगुण्यात् प्रतिबन्धात्, **अनिष्पत्तिः** सिद्धिविरहः यथा 'एधांश्चेदलप्स्यत ओदनमपक्ष्यत्' इत्यत्र एधलाभक्रियाविरहरूपप्रतिबन्धकात् ओदनपाकरूप-क्रियायाः सिद्धिविरहः प्रतीयते, अत एव तद्वाचकधातूत्तरं लृङ् विभक्तिः, केचित् भविष्यदर्थेऽपि क्रियातिक्रमे लृङ् प्रयोगमिच्छन्ति।

आदौ तिङर्थं निर्णीय यङादीनामपि अर्थान् निर्व्वक्ति – **यङ इत्यादिना।** यङः यङ्प्रत्ययस्य मतान्तरे चेक्रीयितादिसंज्ञाभाजः प्रत्ययस्य इत्यर्थः। क्रियासमभिहारः क्रियायाः पौनःपुन्यं, तत्स्वरूपञ्च प्रकृतधात्वर्थजातीयक्रियोत्तरतादृशक्रियानन्तर्यं, तथाहि 'पापच्यते' इत्यादौ प्रकृतधात्वर्थजातीयक्रिया पाकक्रिया एव तदुत्तरवर्त्तिनी तादृशक्रियापि पाकक्रिया तदानन्तर्य्यम्, अत एव पाकक्रियाया एव उत्तरोत्तरप्रवृत्तौ पापच्यते इत्यादिव्यवहारसिद्धिः। उक्तमानन्तर्यं च पाककृतौ अन्वेति तथाचाय-मन्वयबोधः यथा पाकोत्तरकालवृत्तिपाकोत्तरपाककर्त्ता इति।

सनः सन्प्रत्ययस्य धात्वर्थविषयिणीच्छा, यादृशक्रियावाचकपदोत्तरं सन्प्रत्ययः तादृशक्रियागोचरा या इच्छा तत्समानकर्तृकत्वे अभिधानम्, इच्छासमानकर्त्तृक-धात्वर्थवाचकतुमन्तपदोत्तरमेव सन्प्रत्ययस्य विधानात्। तद्यथा- पक्तुमिच्छतीति वाक्यात् पचधातूत्तरं सन्प्रत्ययेन पाकविषयकेच्छासमानकर्त्तृकत्वं धात्वर्थस्य प्रत्याय्यते, अत एव न 'परस्य भोजनमिच्छति' इत्यादौ भुजादिधातुभ्यः

यङ इत्यादि। क्रियायाः समभिहारः पौनः पुन्यं भृशार्थो वा। तत्रायं विशेषः प्रधानक्रियाणां पौनःपुन्यं, प्रधानक्रियोपकारकाणाम् अधिश्रयणादीनां भृशता, तथाहि – 'पापच्यते' इत्यत्र पुनः पुनः पचतीत्येव सङ्गच्छते, न पुनर्भृशं पचतीति प्रधानक्रियास्वरूपत्वात्। जाज्वल्यते इत्यत्र च भृशं ज्वलतीत्येव युज्यते, न खलु पुनः पुनर्ज्वलतीति, प्रधानक्रियोपकारकत्वात्।

In Public domain. Digitization Muthulakshmi Research Academy

णिचः कर्त्तृत्त्वप्रयोजकव्यापारो हेतुमानर्थः।

सन्प्रत्ययः, इच्छया धात्वर्थस्य समानकर्त्तृकत्वाभावात्। उदाहरणं यथा - पिपक्षति इति। अत्र (स्वनिष्ठकृतिप्रयोज्य) पाकविषयकेच्छावानिति तात्पर्य्यम्, 'पाकं चिकीर्षति' इत्यादौ इच्छामात्रं सन्प्रत्ययार्थः कृधात्वर्थस्य अतिरिक्तस्य अन्वयबोधे अप्रवेशात्, सन्प्रत्ययप्रतिपाद्येच्छायाश्च द्वितीयान्तपदप्रतिपाद्यस्य पाकविशेष्यताकत्वस्य स्वरूपेण अन्वयः, धात्वर्थस्य कृत्यादेः स्वसाध्यत्वप्रकार-वन्निष्ठस्वसमानकर्त्तृकत्वसम्बन्धेन अन्वयात् उक्तसम्बन्धेन कृतिविशिष्टा पाक-विशेष्यिका या इच्छा तद्वान् इति शाब्दबोधः। अत्र धात्वर्थस्य इच्छाकर्म्मत्वे सत्येव विधिरयम्। अत एव 'स्थातुं गृहमिच्छतीत्यादि' वाक्यस्थले इच्छाया धात्वर्थविषयकत्वाभावात् न तादृशार्थे सन्प्रत्ययः, 'गृहे स्थातुमिच्छती'त्यादि वाक्यप्रतिपद्यर्थतात्पर्य्यस्थले तु भवत्येव सन् प्रत्ययः, स्थाधातोरर्थस्य इच्छा-गोचरत्वात् इति प्राहुः। मुमूर्षति इत्यादौ मरणेच्छादेरारोपात् प्रयोगो न विरुध्यते।

फलसाधनयोग्यः पदार्थो लौकिको हेतुः, स नात्र गृह्यते, 'अध्ययनेन वसति' इत्यादौ अध्ययनादेः वासादिरूपफलसाधनयोग्यतासत्त्वात् अनिष्टप्रसङ्गात्, शास्त्रीयो हेतुश्च *"कारयति यः स हेतुश्च"* [1] इत्यादि संज्ञाविषयः, अत्र तु णिच् प्रत्ययस्य हेतुकर्त्तृव्यापार एव अर्थः, तथा च णिच्प्रत्ययप्रकृतिभूतधात्वर्थस्य प्रयोजकीभूतस्य कर्त्तुर्व्यापार एव स इत्यर्थः। तथा च 'कटं कारयति' इत्यादौ द्वितीयार्थो विषयत्वं, ज्ञानेच्छाकृतिद्वेषाः सविषयका इति नियमेन कृधात्वर्थ-निरूपितकर्म्मत्वस्य विषयतारूपत्वस्वीकारात्, कृतिर्मूलधात्वर्थः तस्य अनुकूलता -सम्बन्धेन णिच्प्रत्ययार्थे व्यापारे तस्य च अनुकूलतासम्बन्धेन तिप्रत्ययार्थकृतौ तस्याश्च आश्रयतया कर्त्तरि अन्वयः, तथा च कटविषयककृतिविशिष्टव्यापारानु-कूलकृत्याश्रयः कर्त्ता इति बोधः। अपदार्थस्य शाब्दबोधे सम्बन्धविधया एव भाननियमात् अनुकूलत्वस्य उभयत्रैव सम्बन्धविधया भानम्। उक्तञ्च *"प्रेषणाध्येषणे कुर्व्वन् तत्समर्थानि वाचरन्। कर्त्तैव विहितः शास्त्रे हेतुसंज्ञां*

---

1. कातन्त्रव्याकरण. चतुष्टय. 221

In Public domain. Digitization Muthulakshmi Research Academy

तृचो वर्त्तमानत्वम्। शतृशानचोर्वर्त्तमानत्वमेककालीनत्वं च। क्तक्तवत् प्रत्यययोरतीतत्वम्। तुम्वुणोः[1] क्रियार्था क्रिया, एककर्त्तृकत्वं च। उद्देश्यता-सम्बन्धेन क्रियानिमित्तीभूतक्रिया क्रियार्था।

प्रपद्यते"[2] इति। अत एव यथाकथञ्चित् परम्परया वा साक्षाद्वा प्रयोजकव्यापार एव णिच्प्रत्ययार्थः, तेन 'भिक्षा वासयति, कारीषोऽध्यापयति' इत्यादावपि णिच्प्रत्ययेन अन्वयबोधसिद्धिः। चुरादि गणीयधातूत्तरविहितस्य णिच्प्रत्ययस्य न प्रयोजक-व्यापारोऽर्थः, किन्तु स्वरूपमात्रमेव, णिजन्तचुरादिधातूत्तरं णिचः प्रयोजकव्यापार-रूपार्थो भवत्येव, अतः चोरयति इत्यादौ चोर्य्यक्रियाश्रय इत्यन्वयबोधः, 'चोरः पुत्रेण धनं चोरयति' इत्यादौ तु णिचः चौर्य्यक्रियाप्रयोजकव्यापारानुकूलकृत्याश्रय-श्चोर इत्यन्वयबोधः।

तृचः वर्त्तमानत्वं तृच्प्रत्ययप्रकृतिभूतधात्वर्थविशिष्टकालवृत्तित्वम् अर्थ इति शेषः। तद्यथा पक्ता भोक्ता इत्यादि, उक्तस्थलेषु पाकादिक्रियाणां स्वावच्छिन्नकाल-वृत्तित्वं प्रतीतिविषयः। ननु 'योद्धारो गच्छन्ति' इत्यादौ योधनक्रियाया गमनकाले अवृत्तित्वात् का गतिरिति चेत् यथा 'अपचन्नपि सूपकारः पचनयोग्यतया पाचक' इत्युच्यते, तथा तादृशस्थलेष्वदोषः।

शतृशानचोरिति शतृप्रत्ययस्य शानच्प्रत्ययस्य च इत्यर्थः। एककर्त्तृकत्वं शतृशानचोः प्रकृतिभूता ये धातवः तदर्थेन मुख्यक्रियाया अभिन्नकर्त्तृकत्वम्। एककालीनत्वम् उभयोरेव क्रिययोरेककालवृत्तित्वं, "*धातुसम्बन्धे प्रत्यया*"[3] इत्यनुशासनप्रमाणात्। तथा च 'हसन् गच्छति' इत्यादौ शतृप्रकृतिभूतहस्धातोर-र्थस्य हासस्य गतिक्रियायाश्च एक एव कर्त्ता, उभयोरेव च वर्त्तमानकालवृत्तित्वेन एककर्त्तृकत्वम् एककालीनत्वञ्च। ननु एककालीनत्वमित्युक्तावेव सामञ्जस्ये किमिति पुनः शतृशानचोः वर्त्तमानत्वरूपमर्थं स्वीकुर्म्महे इति चेत्?

---

1. एतौ कातन्त्ररीत्या (कातन्त्र. कृत्. 314)। पाणिनीये एतौ तुमुन्-ण्वुल् इति प्रसिद्धौ।
2. वाक्यपदीयम् पदकाण्डम् 3.7.125
3. कातन्त्र. कृत् - 430

In Public domain. Digitization Muthulakshmi Research Academy

क्तिन्-घञ्-ल्युटां कालसामान्यो भावश्च। भावो धात्वर्थः। क्त्वाच्-ल्यपोर्भावः आनन्तर्य्यम्, क्रियासमानकर्त्तृकत्वमपीति सङ्क्षेपः।

अत्राहुः - वर्त्तमानत्वमिति वस्तुकथनमेव नातिरिक्तः अर्थः, अथवा *"धातुसम्बन्धे प्रत्ययाः"*[1] इति सूत्रस्य विषयत्वमेव तादृशार्थनिर्देशेन स्फुटीकृतमिति न दोषः। क्तप्रत्ययस्य क्तवतुप्रत्ययस्य च अतीतत्वं वर्त्तमानकालवृत्तिध्वंसप्रतियोगित्वमर्थ इत्यन्वयशेषः। यथा - 'हरिणा कंसो हतः, हरिः कंसं हतवान्' इत्यादौ क्तप्रत्ययस्य अर्थान्तरेऽपि प्रवृत्तिर्दृश्यते, यथा अनुशासनं *"ञ्यनुबन्धमतिबुद्धि-पूजार्थेभ्यः क्तः"*[2] इति *"आदिकर्म्मणि क्तः"*[3] इति च, अत एव कदाचित् वर्त्तमानत्वमपि क्तप्रत्ययार्थः, उदाहरणं यथा 'राज्ञां मतम्' इत्यादि, तदर्थे विहितक्त-प्रत्ययान्तधातोरेव कर्त्तरि षष्ठ्याः श्रवणात्।

तुम्प्रत्ययस्य वुण्प्रत्ययस्य च, **क्रियार्था** क्रियाफलिका क्रिया, क्रियाफलकत्वमिति भावः, तस्य च उपपदीभूतक्रियायामन्वयः, **एककर्त्तृकत्वम्** उपपदीभूतक्रियायाः फलीभूतक्रियायाः च समानकर्त्तृकत्वम्, यथा 'पक्तुं गच्छति, पाचको गच्छति' इत्यादि, अत्र स्वकर्त्तृकपाकफलगमनाश्रय इति वाक्यार्थबोधः इति केचित्। सारमञ्जरीकृतस्तु इत्याचक्षते- **उद्देश्यतासम्बन्धेन** इत्यादि क्रियार्थेति पदार्थः। तथा च उद्देश्यतया क्रियाया गमनादिक्रियाया निमित्तीभूता क्रिया पाकादिक्रिया एव, एतन्मते क्रियार्थत्वस्य पाकादिक्रियायामेव अन्वयः, तुम्वुणोः भविष्यत्त्वमप्यर्थः, तुल्यवित्तिवेद्यतया गमनफलीभूतपाकक्रियायाः प्रयोजकत्वस्य गमने प्रत्ययात् भविष्यत्कालवृत्तिपाकप्रयोजकसमानाधिकरणगमनाश्रय इत्येवं बोधः।

क्तिन्प्रभृतीनां कालसामान्यः अविशेषेण अतीतवर्त्तमानभविष्यतामन्यतमः काल एव अर्थः। तथा च क्तिन्प्रभृतिप्रत्ययान्तैः शब्दैः साधारण्येन कालत्रयवृत्तय एव भावाः प्रत्याय्यन्ते, क्रियान्तरसाहचर्य्यस्थले तु साहचर्य्यवशात् कालविशेष-

---

1. अष्टाध्यायी 3.4.1 2. कातन्त्र. कृत् 311
3. कातन्त्र. कृत् 478

In Public domain. Digitization Muthulakshmi Research Academy

अथ लकारस्थानीयतिङामाख्यातपदवाच्यत्वम्। स चाख्यातस्त्रिविधः – कर्तृविहितः, कर्मविहितः, भावविहितश्चेति।

प्रतिपत्तिः। **धात्वर्थ इति** – धातुर्हि स्वोत्तरजातकृत्प्रत्ययविरहप्रयोज्यस्वार्थे सुबर्थान्वयबोधं प्रति अयोग्यः शब्दः। स च धातुश्चतुर्धा विभज्यते, गणोक्तसौत्रिकयोगलभ्यार्थकप्रत्ययान्तभेदात्, तत्स्वरूपं यथा *"मूलधातुर्गणोक्तो यः सौत्रः सूत्रैकदर्शितः। योगलभ्यार्थको धातुः प्रत्ययान्त उदाहृतः"*॥ **भाव इति** – भूधातूत्तरं घञ्प्रत्यये सत्येव तदर्थे सुप्प्रत्ययस्य अन्वयः, नतु घञ् विनिर्मुक्तावस्थायाम् इति भूप्रकृतेर्धातुत्वसिद्धिः।

क्त्वाच्ल्यपोरित्यादि – **भावः** धात्वर्थः, **आनन्तर्यम्** उत्तरत्वं यत्क्रियावाचकपदोत्तरं क्त्वाच्प्रत्ययो ल्यप्प्रत्ययश्च तदानन्तर्य्यमर्थः। क्वचिच्च तत्क्रियासमानकालीनत्वमपि, क्रमेण उदाहरणं यथा – **भुक्त्वा गच्छति** इत्यादि। अत्र भोजनार्थवाचकपदोत्तरं क्त्वाच् प्रत्ययो जात इति भोजनानन्तर्य्यं गमने अन्वेति, **क्रियासमानकर्त्तृकत्वं** मुख्यक्रियायाः क्त्वान्तप्रतिपाद्यक्रियायाश्च एककर्तृकत्वम्, तथा च प्रकृते भोजनस्य गमनस्य च अभिन्नः कर्त्ता इति। समानकालीनताया उदाहरणं यथा – **मुखं व्यादाय स्वपिति** इत्यादि। अत्र निद्रासमानकाल एव मुखस्य व्यादानं, नतु निद्रानन्तरमिति आनन्तर्य्यस्य बाधसत्त्वात् समानकालीनत्वमपि ल्यप्प्रत्ययार्थः। अथ यदि सर्व्वत्र समानकर्त्तृकत्वं क्त्वाल्यप्प्रत्ययार्थः, तदा 'मृतं दृष्ट्वा दुःखं स्यात्, पुत्रं वीक्ष्य सुखं स्यात्' इत्यादौ का गतिः, दर्शनक्रियाया अस्तिक्रियायाश्च कर्त्रोभेदात्? अत्राहुः – अस्तिक्रियाया दर्शनक्रियायाश्च भिन्नकर्त्तृकत्वेऽपि यत्क्रियामपेक्ष्य आनन्तर्य्यं विवक्षितं, तया अध्याहृतस्थित्यादिक्रियया दर्शनक्रियाया एककर्त्तृकत्वम् अबाधितमेव, तथा च 'मृतं दृष्ट्वा स्थितस्य दुःखं स्यात्' इत्यादिवाक्यम्।

तिङां त्यादिविभक्तीनाम् **आख्यातपदवाच्यत्वम्** आख्यातपदप्रतिपाद्यत्वं, **स च पूर्व्वोद्दिष्टः** आख्यातः तिङादिः, **त्रिविधः** त्रिधा विभक्तः, उद्देश्यतावच्छेदकसमनियतवस्तुमदन्यसङ्ख्यावत्त्वम् (सङ्ख्यापर्य्याप्ताधिकरणधर्म्मावच्छिन्न) एवंविधप्रत्ययार्थः। वस्तुमदन्यत्वघटकीभूतवस्तुमत्त्वञ्च स्ववृत्तित्वस्वभिन्नस्व–

In Public domain. Digitization Muthulakshmi Research Academy

तत्र कर्त्तृविहिताख्यातस्य कृतावेव शक्तिः, कृतित्वरूपशक्यतावच्छेदक –लाघवात् न कर्त्तरि शक्यतावच्छेदककृतेरननुगमात्।

समानाधिकरणवृत्तित्वोभयसम्बन्धेन, समनियतत्वञ्च व्याप्यत्वे सति व्यापकत्वं, व्याप्यत्वं व्याकत्वञ्च स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन, उद्देश्यतावच्छेदक-वृत्तिव्याप्यत्वं व्यापकत्वञ्च स्वरूपसम्बन्धेनैव, सङ्ख्यावत्त्वमपि स्वाश्रयाश्रयत्व-रूपपरम्परासम्बन्धेनैव। समनियतत्वं सङ्ख्याविशेषणं, तथा च प्रकृते उद्देश्यता-वच्छेदकम् आख्यातत्वं स्वाश्रयत्वसम्बन्धेन तत्समनियतसङ्ख्याकर्त्तृविहितत्व-कर्म्मविहितत्वभावविहितत्वेति त्रितयगतं त्रित्वमेव, स्वाश्रयाश्रयत्वसम्बन्धेन तत्सङ्ख्याविशिष्टः कर्म्मविहितप्रत्ययादिरेव, कर्म्मविहितप्रत्ययादीनां यत्किञ्चिद् व्यक्तिगततद्व्यक्तित्ववृत्तिकर्म्मविहितत्वकर्त्तृविहितत्वभावविहितत्ववृत्तिचतुष्टयम् आदाय आख्यातस्य चतुर्व्विधत्ववारणाय वस्तुमदन्येति सङ्ख्याविशेषणम्। तथा च चतुष्टयत्वसङ्ख्यायाः स्ववृत्तित्वेत्याद्युभयसम्बन्धेन तद्व्यक्तित्वरूप-वस्तुमत्त्वात् न वस्तुमदन्यत्वम् इति चतुर्व्विधत्ववारणम्। तथा च आख्यातत्व-समनियतवस्तुमदन्यत्रित्वसङ्ख्याविशिष्टम् आख्यातम् इति बोधः।

आख्यातत्वञ्च धात्वर्थावच्छिन्नस्वार्थयत्नविधेयकान्वयबोधयोग्यशब्दत्वम् इति मतम्। तथा च आख्यातस्य कृतौ शक्तिरिति वक्ष्यते, तस्याश्च कृतौ अनुकूलतासम्बन्धेन धात्वर्थस्य विशेषणत्वं यत्नापराख्या कृतिरेव शाब्दबोधे विधेयत्वाख्यविषयतावती, तद्योग्यशब्दः तिङ् प्रत्ययादिः।

तत्रेति निर्द्धारणे सप्तमी नत्वाधारे पूर्व्वदोषात्। तत्र तेषु कर्म्मविहितकर्त्तृ-विहितभावविहिताख्यातेषु मध्ये, कर्त्तृविहिताख्यातस्य कृतौ यत्ने शक्तिः। शक्तिश्च *"अस्माच्छब्दादयमर्थो बोद्धव्य"* इत्याकारकेश्वरेच्छा तन्निरूपितविषयत्वं वा। उक्तशक्तिज्ञानञ्च स्थलभेदेन व्याकरणादिबहुपदार्थेभ्य एव भवति, तदुक्तं *"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्व्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः"* [1] इति। तद्यथा दाक्ष्यादिपदानां दक्षस्यापत्यम्

---

1. न्यायसिद्धान्तमुक्तावलीशब्दखण्डः – शक्तिग्रहनिरूपणम्

इत्याद्यर्थे *“दक्षादिशब्दादिण्”* [1] प्रत्ययपर्य्यालोचनेन दक्षापत्यरूपाद्यर्थस्य व्याकरणात् बोधः, गोसदृशपिण्डदर्शनात् गोसदृशो गवयपदवाच्यः इत्यतिदेश-वाक्यार्थस्मरणात् अयं गवयपदवाच्य इत्याकारकबोधः उपमानात्, विनायक-शब्दात् गणपतिरूपार्थप्रतीतिस्तु *“विनायको विघ्नराजद्वैमातुरगणाधिपा”* [2] इत्यादि – कोषात्, अयं गोपदवाच्य इत्यादिवाक्याद् यः बोधः सः आप्तवाक्यात्। उत्तम-वृद्धमध्यमवृद्धयोर्व्यवहारतो यः अर्थबोधः स व्यवहारतः। यवादिशब्दात् दीर्घ-शूकादिरूपार्थविशेषप्रतिपत्तिः वाक्यशेषात्। ‘अयं प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति’ इत्यादौ ‘प्रभिन्नकमलोदरे मधूनि पिबति’ इति पदान्तरसान्निध्यतः मधुकरशब्दात् यः भ्रमररूपार्थस्य बोधः, न तु मक्षिकादेः स एव सान्निध्यात्। उक्तञ्चान्यदन्यत्रापि *“संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः”*॥ [3] इति। यथा – सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसम्बन्धबोधकतया हरिपदेन विष्णुरेव अभिधीयते इत्येवमन्यदनुसन्धेयम्।

ननु आख्यातस्य कृतिमति एव कथं न शक्तिः कल्प्यते, कथं वा तत्परित्यागेन कृतावित्याकाङ्क्षायां शक्यतावच्छेदकस्य लाघवमेव विनिगमकमाह **कृतित्व** **इत्यादिना**। यदि आख्यातस्य कृतिमति शक्तिः स्यात्, तदा अननुगतायाः कृतेः शक्यतावच्छेदकत्वे गौरवम्। कृतौ शक्तिकल्पने अनुगतस्य कृतित्वस्य जाति-रूपस्य शक्यतावच्छेदकत्वे लाघवम्, अत एव लाघवज्ञानाधीनम् आख्यातस्य कृतौ शक्तिकल्पनम्। तत्र आख्यातं किञ्चिद्धर्म्मावच्छिन्नशक्यताकं साधुपदत्वादि-त्यनुमानेन किञ्चिद्धर्म्मशक्यतावच्छेदकत्वस्य सामान्यतो ग्रहात्, कृतेः शक्यताव-च्छेदकत्वे गौरवं कृतित्वस्य शक्यतावच्छेदकत्वे च लाघवमिति लाघवगौरवप्रति-सन्धानात् कृतित्वावच्छिन्नशक्यतावच्छेदकत्वकल्पनम्। **शक्यतावच्छेदककृतेरिति** शक्यतावच्छेदकतया अभिमतायाः कृतेः अननुगमात् प्रतिव्यक्तिभेदेन कृतीनां यत्नरूपाणां भेदात् बहुषु शक्यतावच्छेदकत्वकल्पनं गौरवग्रस्तम्। **न कर्त्तरि** इति

1. कातन्त्रे अदन्तेभ्यः अपत्यार्थे इण् – पाणिनीये तु ङीञ् इति विवेकः
2. अमरकोषः – प्रथमसर्गः – 1.1.93 3. वाक्यपदीयम् – 2.315, 2.316

In Public domain. Digitization Muthulakshmi Research Academy

न चाख्यातेन कर्त्तुरनभिधानेन चैत्रः पचतीत्यत्र चैत्रपदानन्तरं तृतीयापत्तिः लकारेणानभिहितत्वादिति वाच्यम्, कर्त्तृगतसङ्ख्याभिधानानभिधानाभ्यां तृतीयादेर्व्यवस्थापितत्वात्। एवं व्यापारेऽपि न शक्तिः कृत्यादि साधारणया-वद्व्यापारानुगतैकधर्माभावात्।

विशेषेण एवकारार्थविवरणम्। ननु प्रसक्तस्य एव विषयस्य निषेधः कर्त्तव्यः, तत् किमिति कर्त्तरि अप्रसक्ताया अपि शक्तेर्निषेधः, आदौ कुत्रापि आख्यातस्य शक्तेरनिरूपणात् इति चेत् अत्र नव्याः –आख्यातं किञ्चिद्धर्म्मावच्छिन्नशक्यताकम् इति सामान्यतोऽनुमानेन पदार्थमात्रेष्वेव आख्यातशक्तेः प्रसजन्त्या निषेधो न विरुध्यते इति प्राहुः।

परे तु *"कर्त्तरि परस्मैपद"*[1] मित्यनुशासनात् कृतिमति तिङः शक्तिर्लभ्यते अत एव प्रसक्तायास्तस्या निषेधः। अथ तर्हि बाधात् कथं तदनुशासनार्थबोध इति चेत् लाघवज्ञानात् कृतौ आख्यातस्य शक्तिनिर्णयेन विरोधखण्डनाय कर्त्तृपदस्य धर्म्मपरत्वस्वीकारेण सामञ्जस्यम्।

नचेत्यादि – अत्रेदमवधातव्यं यथा– *"अनभिहिते कर्त्तरि तृतीया"*[2] इत्यादि सूत्रैः अनभिहितकर्त्तृप्रभृतिषु अर्थेषु तृतीयादीनां विधानात् यत्र कर्त्तृप्रभृतीनां तिङ् प्रभृतिप्रत्ययैरभिहितत्वं तत्र न कर्त्रादिभ्यस्तृतीयादयः – तथाहि – 'चैत्रः पचति' इत्यत्र तिप्रत्ययेन प्रतिपिपादयिषितस्यार्थस्य अभिधानात् न चैत्रपदात् तृतीया, किन्तु [3]*लिङ्गार्थमात्रे प्रथमैव*, 'चैत्रेण पच्यते ओदन' इत्यादौ च कर्म्मविहितप्रत्ययेन कर्म्मणि विहिताया विभक्तेरर्थस्य एव उक्तत्वात् कर्म्मवाचकपदोत्तरं न कर्म्म-विभक्तिः, कर्त्तुरनभिहितत्वाच्च कर्त्तृवाचकपदोत्तरं तृतीया इत्यादि। अत एव नचेत्याद्यशङ्काया अवतारः। आख्यातेन यदि कर्त्ता एव नाभिधीयते, तर्हि *"अनभिहिते कर्त्तरि तृतीया"*[2] इत्यनुशासनस्य चैत्रः पचतीत्यादिस्थलेऽपि प्रसक्तिः, लकारस्य कृतौ शक्तिकल्पनया कृतिमति तृतीयार्थे शक्तिविरहेण लकारेण तस्य बोधयितुमशक्यत्वात्।

---

1. कातन्त्र. आख्यात. 81 2. कातन्त्र. चतुष्टय. – 239
3. "प्रथमाविभक्तिर्लिङ्गार्थवचने" (कातन्त्र. चतुष्टय. 223)

In Public domain. Digitization Muthulakshmi Research Academy

अथात्र कर्त्तृविहिताख्यातस्य कृतौ वर्त्तमानत्वादौ एकत्वादौ च शक्तिः सिद्धा। तत्र शाब्दबोधे कृतावेव वर्त्तमानत्वादिकम्, एकत्वादिकं च कर्त्तर्य्येव प्रतीयते। एकपदोपात्तपदार्थयोर्न विशेषणविशेष्यभावेनान्वयबोध इति व्युत्पत्तेः अस्वीकारादननुभवाच्च।

कर्त्तृगतेत्यादि नचेत्यादिना उद्भावितस्य प्रश्नस्य उत्तरम्। कर्त्तृगता या सङ्ख्या तस्याः **अभिधानं** प्रतिपादनम् **अनभिधानं** प्रतिपादनविरहः, तृतीयादेः कर्त्तृविहिता-यास्तृतीयादिविभक्तेः, **व्यवस्थापितत्वात्** नियमनात्। तथाहि–कर्त्तरि विहितास्तिङः कर्तृसङ्ख्यानुयायिनः कर्म्मविहितास्तिङः कर्म्मसङ्ख्यानुयायिनो भवन्ति, प्रत्ययेन कर्त्तृविहितेन कर्त्तृगतसङ्ख्याया अनभिधाने तृतीया, अभिधाने च न तृतीया, अपितु उक्तार्थकत्वात् तृतीयायाः अप्रयोगेण लिङ्गार्थमात्रे प्रथमैव, *"अनभिहिते कर्त्तरि तृतीया"* [1] इति सूत्रस्यैव तादृशार्थपरतया व्याख्यातत्वादिति। ननु मास्तु आख्यातस्य कर्त्तरि शक्तिः, व्यापारे शक्तिकल्पने कोऽन्तराय इत्याकाङ्क्षाया आह **एवमित्यादि**, एवं कृतौ यथा अननुगमात् न आख्यातशक्यतावच्छेदकत्वं तथा व्यापारत्वस्य अननुगमात् शक्यतावच्छेदकम् अनन्तं कल्पनीयमिति महद्गौरवमेव।

अथ आख्यातार्थस्य कृत्यादेः कस्य पदार्थस्य किमंशे शाब्दबोधे भानमित्याकाङ्क्षयामाह – **तत्रेत्यादिना**। कृतावेवेति कृत्यंशे एव वर्त्तमानत्वादिकं प्रतीयते विशेषणीभूय भासत इत्यर्थः। एवकारेण व्यापारो व्यवच्छिद्यते, अन्यथा कृत्यादिनाशदशायामपि अनुकूलक्रियायाः सत्त्वात् कृत्यसत्त्वदशायामपि चैत्रः पचतीति प्रयोगः स्यात् व्यापारे वर्त्तमानत्वस्य तदानीमबाधात्, कृतावन्वयस्वीकारे वर्त्तमानत्वस्य तत्र तदानीं बाधात् न तादृशप्रयोगापत्तिरिति भाव्यम्।

एकत्वादिकमित्यादि एकत्वादिसङ्ख्या इत्यर्थः। **कर्त्तर्य्येव** अत्र एवकारेण कृत्यादयो व्यवच्छिद्यन्ते, कृतेर्यत्नरूपाया गुणस्वरूपत्वात् गुणे गुणस्य सत्ताऽसम्भवाच्च, गुणे कृतौ गुणस्य एकत्वादिसङ्ख्यायाः बाधात् नोपपत्तिरिति तद्व्यवच्छेदः। कर्त्तृविहितप्रत्ययानां वचनव्यवस्थापि तथैव कर्त्तुं शक्यते यदि

---

1. कांतन्त्र. चतुष्टय. 239

In Public domain. Digitization Muthulakshmi Research Academy

अथ कर्म्मविहिताख्यातस्य फले शक्तिर्न कर्म्मणि। फलन्तु धात्वर्थतावच्छेदकम्। अत एव धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्म्मकत्वम्। तदबोधकत्वे चाकर्म्मकत्वमिति बोध्यम्। कर्म्माख्यातस्य फले वर्त्तमानत्वात्

सङ्ख्या कर्तुगतत्वेन प्रतीयते, अन्यथा किमनुरुध्य वचनव्यवस्था तत्र स्यात्, वचनव्यवस्थायाः कर्त्तृगतसङ्ख्यानुगतत्वेनैव सिद्धेः।

ननु एकपदोपात्तपदार्थयोर्न विशेष्यविशेषणभावेन अन्वयबोध इति नियमस्य विरोधः स्याद्यदि आख्यातप्रतिपाद्यकृत्यादिपदार्थानां विशेष्यविशेषणभावेन मिथोऽन्वयः स्याद् इति शङ्कायामाह - **एकेत्यादि,** एकपदोपात्तयोः एकस्मादेव पदात् गृहीतयोः पदार्थयोः, प्रकृते एकस्मादेव आख्यातवाचकपदात् उपस्थितयोः कृतिवर्त्तमानत्वयोः पदार्थयोः। इति उक्तरूपायाः व्युत्पत्तेः नियमस्य अस्वीकारात्। ननु यदि नानुभवविरोधः तदा कथमस्वीकार इत्याशङ्कायामाह - **अननुभवाच्चेति,** तथा च अनुभवविरोधात् न तादृशनियमः स्वीक्रियत इति भावः। अत एव प्रकृतस्थले एकपदोपात्तयोरपि कृतिवर्त्तमानत्वयोः परस्परं विशेष्यविशेषणभावेनान्वये न दोषः।

कर्म्मविहिताख्यातस्य कर्म्मणि अनुशिष्टस्य तेप्रत्ययादेः **फले** अनुकूलतासम्बन्धेन धात्वर्थांशे प्रकारीभूते पच्यते इत्यादौ विक्लित्त्यादिरूपे पदार्थे शक्तिः, न कर्म्मणि धात्वर्थतावच्छेदकीभूतफलाश्रये, पूर्व्ववत् गौरवात् लाघवाच्च फले शक्तिरिति, विशेषेण पूर्व्ववत् आलोच्यम्। धात्वर्थतावच्छेदकमनुकूलत्वसम्बन्धेन धात्वर्थांशे प्रकारीभूतं, यथा पच्यत इत्यादौ अनुकूलत्वसम्बन्धेन विक्लित्तिविशिष्टो व्यापारो धात्वर्थः, तत्र अनुकूलत्वसम्बन्धेन विक्लित्तिरूपं फलं प्रकारः, तच्च फलं कर्म्मणि अन्वेति।

फलावच्छिन्नव्यापारबोधकत्वं सकर्म्मकत्वं - यथा पच्धातुः अनुकूलत्वसम्बन्धेन विक्लित्तिविशिष्टं व्यापारं बोधयति, अत एव तस्य सकर्म्मकत्वम्, अनुकूलत्वसम्बन्धेन फलविशिष्टव्यापारबोधकस्यैव धातोः सकर्म्मकत्वात्। तादृशसम्बन्धेन फलानवच्छिन्नव्यापारबोधकस्य च अकर्म्मकत्वम् - यथा भवति

एकत्वादिकं च फलाश्रये कर्म्मण्येव प्रतीयते। तेन तण्डुलः पच्यत इत्यत्र तण्डुलपदोत्तरं न द्वितीया, कर्म्मगतसङ्ख्याभिधानेन द्वितीयाया बाधितत्वात्।

अथ भावविहिताख्यातस्य धात्वर्थ एव शक्तिः। अत्र सङ्ख्यानन्वितैव, तत्र प्रथमान्तपदाभावात्। आख्यातेन यत्र सङ्ख्योक्ता, तत्र प्रथमान्तपदोपस्थाप्यपदार्थान्वितत्वेन क्लृप्तत्वात्। एकवचनन्तु प्रयोग साधुत्वार्थमेवेति भावः।

इत्यादौ सत्तामात्रं धात्वर्थः। **वर्त्तमानत्वं** कर्म्मविहिताख्यातप्रतिपाद्यं स्वावच्छिन्नकालवृत्तित्वमित्यर्थः। **फले** कर्म्माख्यातप्रतिपाद्ये धात्वर्थतावच्छेदके, **एकत्वादिकं** कर्म्मविहिताख्यातप्रतिपाद्यसङ्ख्या, **फलाश्रये कर्म्मणि** तदंश एव प्रतीयते, एवकारेण फलं व्यवच्छिद्यते कर्म्मगतसङ्ख्याप्रतिपादनतदप्रतिपादनाभ्यामेव कर्म्मोत्तरप्रथमाद्वितीयाप्रतिपत्तेः, फलस्य बहुष्वेव स्थलेषु गुणादिरूपतया बाधेन तदंशे सङ्ख्यारूपस्य गुणभूतस्य एकत्वादेरन्वयासम्भवोऽपि द्रष्टव्यः। **कर्म्मगतसङ्ख्यायाः** प्रकृते तण्डुलगतैकत्वसङ्ख्यायाः **अभिधानेन** कर्म्मविहितप्रत्ययेन प्रतिपादनेन इत्यर्थः। **द्वितीयाया** बाधितत्वात् अनभिहिते कर्म्मण्येव द्वितीयायाः शास्त्रसिद्धत्वात्, अत एव कर्म्मगतैकत्वादेः कर्म्मप्रत्ययेन प्रतिपत्तौ लिङ्गार्थमात्रे तण्डुलपदात् प्रथमा।

कर्त्तृविहितस्य कर्म्मविहितस्य च आख्यातस्य शक्तिं प्रतिपाद्य भावविहितप्रत्ययस्य शक्तिं निर्व्वक्ति **अथेत्यादिना, धात्वर्थे** यत्क्रियावाचकपदोत्तरं भावप्रत्ययो विहितः तत्क्रियामात्रे शक्तिः यथा भूयते इत्यादौ तेप्रत्ययस्य सत्तामात्रे। ननु यदि भावविहितप्रत्ययस्य क्रियामात्रमर्थः तदा कथं तत्र सङ्ख्याया अन्वयः कर्म्मणो निर्गुणत्वाद् धात्वर्थे सङ्ख्याया अन्वयस्य असम्भवाद् इत्याकाङ्क्षायामाह – **अत्रेत्यादि**। सङ्ख्या अनन्विता, तत्रैव हेतुमाह – **तत्रेत्यादि**। तत्र भावविहिताख्यातप्रत्ययान्तपदघटिते वाक्ये, प्रथमान्तपदाभावात्, अत्र घटितत्वसम्बन्धेन प्रथमान्तपदाभावो बोध्यः।

ननु अस्तु प्रथमान्तपदाभावः का तत्र हानिरित्याकाङ्क्षायामाह – **आख्यातेनेत्यादि**। **प्रथमान्तपदेन** वाक्यघटकीभूतप्रथमाविभक्त्यन्तपदेन **उपस्थाप्यः**

In Public domain. Digitization Muthulakshmi Research Academy

अथाख्यातस्य विशेषार्थकथनम् – सविषयकपदार्थाभिधायिधातूत्तरकर्त्तृविहिताख्यातस्याश्रयत्वे लक्षणा। यथा – करोति, द्वेष्टि, यतते, जानाति, इच्छतीत्यादयः। एवमचेतने रथो गच्छतीत्यत्र व्यापाराश्रयत्वे लक्षणा। नश्यतीत्यत्र प्रतियोगित्वे लक्षणा। अत एव नश्यति, नङ्क्ष्यति, नष्ट इत्यादौ वर्त्तमानत्वादिकं प्रतियोगित्व एवान्वेति।

तज्जन्यप्रतीतिविषयः पदार्थः, तदन्वितत्वेन क्लृप्तत्वात्, नियमेन आख्यातोक्ता सङ्ख्या प्रथमान्तपदोपस्थाप्य एवार्थे अन्वेति इति, अत्र प्रथमान्तपदविरहात् न सङ्ख्यान्वयः। ननु सङ्ख्याया अनन्वये किमर्थं सङ्ख्याप्रतिपादकवचनप्रयोग इत्याकाङ्क्षायामाह – **एकवचनन्तु** इत्यादि, तु किन्तु, यद्यपि सङ्ख्या अनन्विता तथापीत्यर्थः। एकवचनं एकत्वसङ्ख्याप्रतिपादकं प्रयोगसाधुत्वार्थं *"नापदं प्रयुञ्जीत"* इति नियमेन अपदस्य प्रयोगनिषेधात् पदत्वसिद्धये तत् एकवचनन्तु औत्सर्गिकं, तथा च कौमारे- *"भावः सत्ता औत्सर्गिकमेकवचनमेवासङ्ख्यत्वात्"*[1] इति।

अथ कर्त्तृविहिताख्यातस्य कृतौ शक्तिकल्पने यत्र धात्वर्थः कृत्यादिस्तत्र का गतिः कृतेः ज्ञानादेश्च कृतिप्रयोज्यत्वविरहात् कृतौ अनुकूलत्वसम्बन्धेन कृत्यादेरन्वयायोगात् इति चेत् अत्र समाधानम्, सविषयकपदार्थाभिधायिनो ये धातवः कृप्रभृतयः, *"ज्ञानेच्छाकृतिद्वेषाः सविषयकाः"* इति नियमेन कृधातोः सविषयकपदार्थाभिधायित्वश्रवणात्, तदुत्तरकर्त्तृविहिताख्यातस्य आश्रयत्वे लक्षणा, अत एव कृतौ कृत्यन्वयासम्भवात् नानुपपत्तिलेशोऽपीति, तथा च करोति इत्यादौ उत्पत्त्यनुकूलकृत्याश्रयः कर्त्ता इत्यादिबोधः। ननु सविषयकपदार्थाभिधायकधातुस्थले तथा उपपत्तावपि कृतेश्चेतनधर्म्मतया अचेतने रथे कथं गमनकर्त्तृत्वबोधः, तत्र तद्बाधात् इत्याकाङ्क्षायामाह **एवमित्यादि**। तथाहि आख्यातस्य अचेतनकर्त्तृकस्थले व्यापाराश्रयत्वे लक्षणा, तेन रथस्पन्दादेः उत्तरदेशसंयोगानुकूलव्यापारत्वात् तदाश्रयत्वस्य रथादौ अक्षतत्वमिति।

---

1. कातन्त्र. आख्यात. दुर्ग.74

In Public domain. Digitization Muthulakshmi Research Academy

अथ शाब्दबोधप्रकारः कथ्यते

ननु तथापि नश्यति इत्यादौ कथमुपपत्तिः? आख्यातस्य आश्रयत्वार्थकत्वे नश्यतीत्यस्य नाशाश्रयरूपार्थकत्वे 'घटो नश्यती'त्यादौ घटस्य कर्त्तृत्वानुपपत्तिः, तत्रैव 'कपालं नश्यती'ति प्रयोगापत्तेश्च प्रतियोगिसमवायिदेशे एव नाशस्य वर्त्तमानत्वात्। अत्रैव समाधानमाह **प्रतियोगित्वे लक्षणा** इति, तथा च नाशस्य धात्वर्थस्य अभावरूपत्वात् तन्निरूपितं प्रतियोगित्वं घटे, तेन नाशप्रतियोगी घट इत्याद्यर्थबोध इति। **अत एव** आख्यातस्य प्रतियोगित्वे लक्षणात एव **वर्त्तमानत्वादिकम्** आख्यातप्रतिपाद्यवर्त्तमानकालवृत्तित्वादिकं, **प्रतियोगित्वे** लक्षणया प्रतिपाद्ये, न तु धात्वर्थे नाशे इति एवकारव्यवच्छेद्यम्। नाशांशे तदन्वये 'अतीतो घटो नश्यती'त्यपि प्रयोगः स्यात् नाशस्य वर्त्तमानकालेऽपि सत्त्वात् प्रतियोगित्वान्वये च प्रतियोगिनोऽभावेन प्रतियोगित्वस्यापि अभावात् नानिष्ट-प्रयोगाः।

वाक्यार्थबोधं प्रति शब्दार्थबोधस्य हेतुत्वात् प्रथमतः शब्दार्थान् निरूप्य वाक्यार्थानां परस्परमन्वयं प्रदर्शयितुं शिष्यावधानाय प्रतिज्ञां प्रस्तौति- **अथे**त्यादिना। **कथ्यते** इति भविष्यत्सामीप्ये वर्त्तमाना, प्रदर्शयिष्यते इत्यर्थः, तथाहि शाब्दबोधप्रकारप्रदर्शनं मत्कर्त्तव्यमिति बोधः, तेनैव उत्तरकालकर्त्तव्यत्त्वप्रकारक-बोधानुकूलव्यापाररूपत्वादस्य प्रतिज्ञात्वम्, उत्तरकालकर्त्तव्यत्वप्रकारकबोधानुकू-लव्यापारस्यैव प्रतिज्ञास्वरूपत्वव्यवस्थापनात्।

तण्डुलपदार्थोपस्थितिः तण्डुलरूपवस्तुस्मरणं तण्डुलत्वावच्छिन्ने एव तण्डुलपदस्य शक्तेः, **द्वितीयया** तण्डुलपदोत्तरद्वितीयाविभक्त्या, **कर्म्मतारूपस्य फलस्य** विक्लृत्यादेः उपस्थितिः क्रियाजन्यफलवत्त्वस्यैव कर्म्मतास्वरूपत्वात्,

---

अथेति। श्रोत्रग्रहणो योऽर्थः स शब्दः। असौ पुनर्द्विविधः ध्वन्यात्मकः वर्णात्मकश्च। तत्राद्यः भेर्य्यादौ प्रसिद्धः, अपरः संस्कृतादिभाषास्वरूपः। इह किल संस्कृतभाषारूपशब्दस्य अयं बोधः अवगमः अन्वयावगमप्रकारः इत्यर्थः **शाब्दबोध** इति।

In Public domain. Digitization Muthulakshmi Research Academy

यथा चैत्रस्तण्डुलं पचतीत्यत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः, द्वितीयया कर्म्मतारूपफलोपस्थितिः, वृत्तित्वं संसर्गः, तेन तण्डुलवृत्तिकर्म्मत्व –मित्यवान्तरबोधः। पच् धातुना पाकोपस्थितिः, तत्रानुकूलतासंसर्गेण तादृश–कर्म्मत्वान्वयः, तेन तण्डुलवृत्तिकर्म्मतानुकूलपाक इति बोधः। तत्र आख्यातेन कृत्युपस्थितिः, तत्रानुकूलतासंसर्गेण तादृशपाकान्वयः। तेन तण्डुलवृत्ति-कर्म्मतानुकूलपाकानुकूलकृतिरिति बोधः। ततश्चैत्रपदेन चैत्रोपस्थितिः, तत्र आश्रयत्वसंसर्गेण तादृशकृतेरन्वयः। तेन तण्डुलवृत्तिकर्म्मतानुकूलपाकानु-कूलकृत्याश्रयश्चैत्र इति महावाक्यार्थबोधः।

वृत्तित्वं संसर्गः तेन च संसर्गेण तण्डुलस्य फले अन्वयः, फलाश्रस्यैव कर्म्मतया वृत्तित्वसम्बन्धेन फले तण्डुलस्य अन्वयात्। **तेन** उक्तशब्दानां तादृशार्थकत्वेन परस्परं तथा अन्वयेन च इत्यर्थः। **अवान्तरबोधः** – महावाक्यार्थबोधं प्रति अवान्तरवाक्यार्थज्ञानस्य कारणत्वात् अवान्तरवाक्यार्थबोध एव प्राक्प्रदर्शित इति बोद्धव्यम्। **पाकस्य** व्यापारस्य उपस्थितिः व्यापारस्यैव धात्वर्थत्वात्। **तत्र** पाक-रूपधात्वर्थे **तादृशकर्म्मत्वस्य** तण्डुलवृत्तिकर्म्मत्वस्य, **तेन** पच्धात्वर्थेन द्वितीयान्त –पदार्थस्य तथा अन्वयस्वीकारेण, अन्यांशस्यापि अर्थं निर्व्वक्ति **तत** इति, ततः तादृशावान्तरबोधानन्तरं **तत्र** कृतौ **तादृशस्य** पाकस्य तण्डुलवृत्तिकर्म्मतानुकूल-

---

वाक्यार्थ इति। वाक्यं हि नाम कारकान्वितक्रियाप्राधान्यैकविशेष्यक-बोधसाधनपदकदम्बकम्। उक्तञ्च वाक्यपदीये– *"साकाङ्क्षावयवं भेदे परानाकाङ्क्ष-शब्दकम्। क्रियाप्रधानमेकार्थं सगुणं वाक्यमुच्यते"*॥ (वाक्यपदीयम् 2.3) इति। तथाभूतस्य वाक्यस्यार्थ एव तात्पर्य्यार्थः। न च वक्तुरिष्टं तात्पर्य्यमिति लक्षणम्, अर्थज्ञानानवच्छिन्नपुरुषेणोच्चारितस्य वेदादेः, शुकादिपठितगाथादीनाञ्चार्थावगत्य-सम्भवात्। अत एवोक्तं तत्प्रतीतिजननयोग्यत्वं तात्पर्य्यमिति। न तदपि सम्यक्, तथात्वे भोजनप्रकरणे सैन्धवमानयेत्युपदिष्टस्य सैन्धवपदात् लवणाश्वोभयार्थ-प्रतीतियोग्यत्वे युगपदुभयानयनप्रसङ्गः। स चानिष्टः। कथन्तर्हि निष्पत्तिरित्थम्? तदितरप्रतीतिजननेच्छयानुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वं तात्पर्य्यमिति।

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यार्थ एव तात्पर्य्यार्थः। वक्त्रा शाब्दीयतात्पर्यार्थरूपवाक्यार्थमवगत्य पश्चात् शब्दः प्रयुज्यते। सर्वत्र प्रथमान्तपदोपस्थाप्यपदार्थस्यैव शाब्दबोधे मुख्यविशेष्यत्वम्। प्रथमाविभक्तिस्तु साधुत्वार्था। एवं चैत्रेण पच्यते तण्डुल इत्यादौ चैत्रपदेन चैत्रोपस्थितिः, तृतीयया कृत्युपस्थितिः, वृत्तित्वं संसर्गः, तेन चैत्रवृत्तिकृतिरिति बोधः। ततः पच्धातुना पाकोपस्थितिः, जन्यता संसर्गः, तेन चैत्रवृत्तिकृतिजन्यः पाक इति बोधः। ततः कर्म्माख्यातेन फलोपस्थितिः, जन्यत्वं संसर्गः तेन तादृशपाकजन्यफलमिति बोधः। तण्डुलपदेन तण्डुल-पदार्थोपस्थितिः, तत्राश्रयत्वसंसर्गेण तादृशफलान्वयः, तेन चैत्रवृत्तिकृतिजन्य-पाकजन्यफलशाली तण्डुल इति वाक्यार्थबोधः। चैत्रनिष्ठकृतेस्तृतीयोपस्था-प्यत्वादिति।

पाकस्य इत्यर्थः, **अन्वयः** – **ततः** इति, एतदपि अवान्तरवाक्यार्थबोधप्रदर्शनाय उक्तम्। तत्र चैत्रपदार्थकर्त्तरीत्यर्थः। **तादृशकृतेः** तण्डुलवृत्तिकर्म्मतानुकूलपाकानुकू-लकृतेरित्यर्थः। **तेनेत्यादि** अयं सकलांशस्य मिलित्वा बोधः।

शाब्दबोधे बहूनि कारणान्यपेक्ष्यन्ते, तद्यथा आसत्तिज्ञानं योग्यताज्ञानं आकाङ्क्षाज्ञानं तात्पर्य्यज्ञानञ्च इति तत्र ***आसत्तिः*** यत्पदार्थेन यत्पदार्थस्य अन्वयोऽपेक्षितस्तयोरव्यवधानं, तेन 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादौ आसत्तिविरहात् न शाब्दबोधः।

योग्यता – एकपदार्थे अपरपदार्थसम्बन्धः, योग्यताज्ञानस्य अकारणत्वे 'वह्निना सिञ्चति' इति वाक्यादपि सेके वह्निकरणकत्वरूपार्थस्य बोधः स्यात्। योग्यताज्ञानस्य कारणत्वे च उक्तस्थले सेके वह्निकरणकत्वाभावरूपायोग्यता-निश्चयेन प्रतिबन्धात् न शाब्दबोधः। तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्य-दोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्। ननु तर्हि भ्रमरूपस्य शाब्दबोधस्य अनुपपत्तिः इति चेन्न। तत्रापि योग्यताभ्रमेण भ्रमात्मकशाब्दबोधस्य उपपत्त्या सामञ्जस्यात्।

In Public domain. Digitization Muthulakshmi Research Academy

'घटमानयती'त्यत्र घटपदेन घटोपस्थितिः द्वितीयया कर्म्मत्वोपस्थितिः, वृत्तित्वं संसर्गः, तेन घटवृत्तिकर्म्मत्वमिति बोधः। तत आङ्पूर्वनीञ्धातुना अभिमतदेशवृत्तिसंयोगानुकूलव्यापारजनकव्यापाररूपानयनोपस्थितिः, घट-वृत्तिकर्म्मतानुकूलमानयनमिति बोधः। तत आख्यातेन कृत्युपस्थितिः, अनु-कूलतासंसर्गेण तादृशानयनस्य कृतावन्वयस्तेन तादृशानयनानुकूलकृतिरिति बोधः। ततश्चैत्रपदेन चैत्रोपस्थितिः, तत्राश्रयत्वसंसर्गेण कृत्युपस्थितिः, तत्र अनुकूलतासंसर्गेण तादृशकृतेरन्वयः, तेन घटवृत्तिकर्म्मतानुकूलानयनानु-कूलकृतिमांश्चैत्र इति महावाक्यार्थबोधः।

यत्पदेन विना यस्य पदस्य अन्वयाननुभावकत्वं तेन सह तस्य *आकाङ्क्षा*, यथा 'घटमानय' इत्यादौ घटपदोत्तरद्वितीयाविभक्तिं विना घटस्य अन्वयानुभवो नास्ति प्रकृते, अत एव द्वितीयया घटपदस्य आकाङ्क्षा, घटकर्म्मताबोधं प्रति घटपदोत्तरं द्वितीयारूपाकाङ्क्षाज्ञानं कारणम्, तेन घटः कर्म्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः, तत्र आकाङ्क्षाविरहात्। तात्पर्य्यन्तु वक्तुरिच्छा एव 'अयं शब्द इममर्थं बोधयतु' इत्याकारिका तज्ज्ञानस्य अकारणत्वे 'सैन्धवमानय' इति वाक्यात् अनियमेन अश्वलवणप्रभृतीनामर्थानां बोधः स्यात्, तज्ज्ञानस्य कारणत्वे वक्ता यम् अर्थमुद्दिश्य शब्दं प्रयुक्तवान् तदर्थस्यैव बोध इति नानियमः। तात्पर्य्यग्राहक-प्रकरणादीनां तत्तदर्थप्रतिपत्तिहेतुत्वकल्पनन्तु अननुगमदोषादेव निरस्तमिति, नैयायिकास्तु तात्पर्य्यज्ञानार्थमवश्यं प्रकरणादिज्ञानस्यापेक्षणेन प्रकरणादिज्ञानमेव प्रयोजकमाहुरिति सङ्क्षेपः।

वक्त्रेत्यादि। **पश्चात् शब्दः प्रयुज्यत** इति शब्दप्रयोगात्मकव्यवहारं प्रति व्यवहार्य्यज्ञानस्य हेतुत्वात्। अथ शाब्दबोधे कः पदार्थो विशेषणविधया कश्च मुख्यविशेष्यविधया कुत्र अन्वयं लभेत इत्याकाङ्क्षायां मुख्यविशेष्यविधया अन्वय-योग्यं निर्व्वक्ति **सर्व्वत्रे**त्यादिना, सर्व्वत्र कर्त्तृविहितप्रत्ययस्थले कर्म्मविहित-प्रत्ययस्थले च इत्यर्थः। प्रथमान्तपदोपस्थाप्यपदार्थस्य एव न तु तृतीयान्ता-द्युपस्थाप्यपदार्थस्य इत्यर्थः। **मुख्यविशेष्यत्वं** विशेषणतानात्मकविशेष्यत्वम्

In Public domain. Digitization Muthulakshmi Research Academy

एवं करोतीत्यत्र कृधातुना कृत्युपस्थितिः, आख्यातेन लक्षणया चाश्रयत्वोपस्थितिः, तत्राश्रयत्वसंसर्गेण कृत्याश्रयत्वाश्रय इति शाब्दबोधः। एवं द्वेष्टि, यतते, जानाति, इच्छतीत्यादौ बोध्यम्। एवं रथो गच्छतीत्यत्र गम-धातुना उत्तरदेशसंयोगानुकूलव्यापारोपस्थितिः, आख्यातेन लक्षणया आश्रय-त्वोपस्थितिः, तदुपरि आश्रयत्वं संसर्गः, तेन उत्तरदेशसंयोगानुकूलव्यापारा-श्रयत्वाश्रयो रथ इति बोधः। त्यजतीत्यत्र त्यज्धातुना पूर्व्वदेशविभागानुकूल-क्रियोपस्थितिः, आख्यातेन शक्त्या कृत्युपस्थितिः, तत्रानुकूलतासंसर्गेण तादृशक्रियान्वयः, तत आश्रयत्वं संसर्गस्तेन पूर्वदेशविभागानुकूलक्रियानुकू-लकृत्याश्रय इति बोधः।

इत्यर्थः। मुख्यविशेष्यत्वस्य विशेषणत्वासमानाधिकरणत्वेन तदनात्मकत्वात् समानाधिकरणविषयतयोरेव ऐक्यात्।

क्रियायाः प्राधान्येन कर्त्तृसापेक्षत्वात् कर्त्तृविहिताख्यातघटितवाक्यार्थ-बोधप्रकारं प्रदर्श्य कर्म्मविहिताख्यातघटितवाक्यार्थबोधं प्रदर्शयति - **एवमित्यादिना**। **वृत्तित्वं संसर्ग** इति शब्दानुपस्थाप्यार्थस्य संसर्गविधया एव भाननियमात् वृत्तित्वं संसर्गविधया एव अन्वेति। एवं वक्ष्यमाणजन्यत्वमपि। शाब्दबोधे प्रथमान्तपदार्थस्यैव मुख्यविशेष्यतास्वीकारात् कर्म्मविशेष्यक एव कर्म्मविहिताख्यातघटितवाक्यार्थबोधः इति तण्डुलस्य मुख्यविशेष्यत्वम्। **अभिमतः** प्रयोक्तुरभिप्रेतः यः देशः 'गृहे घटमानय' इत्यादौ गृहादिः।

करोतीत्यत्र कृधातुना कृत्युपस्थितिः, **आख्यातेन** तिप्रत्ययेन आश्रयत्वस्य उपस्थितिः, न तु कृतेः पूर्व्वमेव तत्समाधानात्। **एवमित्यादि**, द्वेष्टि इत्यत्र द्वेषः, यतते इत्यत्र यत्नः, जानाति इत्यत्र ज्ञानम्, इच्छति इत्यत्र च इच्छा धात्वर्थः इत्येव विशेषः, अन्यांशे करोतिवद् अनुसन्धेयम्। तद्यथा 'विषं द्वेष्टि' इत्यादौ विषयत्वरूपं कर्म्मत्वं द्वितीयार्थः, तस्य निरूपकतासम्बन्धेन द्वेषे धात्वर्थे विषयतायाञ्च वृत्तित्वसंसर्गेण विषयस्य धात्वर्थस्य तिप्रत्ययार्थे आश्रयत्वे आश्रयत्वस्य आश्रयत्वेन कर्त्तरि अन्वय इत्येवम्। **पूर्व्वदेशविभागानुकूलक्रिया** पूर्व्वदेश-

In Public domain. Digitization Muthulakshmi Research Academy

एवं पततीत्यत्र पत्धातुनाऽधः संयोगानुकूलक्रियोपस्थितिः, आख्यातेन कृत्युपस्थितिः आश्रयत्वं संसर्गस्तेनाधःसंयोगानुकूलक्रियानुकूलकृत्याश्रय इति। एवं नश्यतीत्यत्र नश् धातुना नाशोपस्थितिः, आख्यातेन लक्षणया प्रतियोगित्वोपस्थितिः, आश्रयत्वं संसर्गस्तेन नाशप्रतियोगिताश्रयो घट इति बोधः। एवं विद्यते इत्यत्र विद्धातुना सत्तोपस्थितिः, आख्यातेन लक्षणया च आश्रयत्वोपस्थितिः, आश्रयत्वं संसर्गः, तेन सत्ताश्रयत्वाश्रय इति बोधः। एवं निद्रातीत्यादौ निद्राधातुना मेध्यामनःसंयोगोपस्थितिः, आख्यातेन कृत्युपस्थितिः, आश्रयत्वं संसर्गः, तेन मेध्यामनःसंयोगानुकूलकृत्याश्रय इति धीः।

विभागानुकूलव्यापारः, पूर्व्वदेशविभागः फलं तदाश्रयत्वेनैव 'वृक्षं त्यजति खग' इत्यदौ वृक्षादीनां कर्म्मत्वम्। **शक्त्येति**, आख्यातस्य कृतावेव लाघवतः शक्तिनिरूपणात्। तत्र कृतौ **तादृशक्रियायाः** फलानुकूलक्रियायाः।

पत्धातुनेति, ननु यदि अधस्संयोगानुकूलव्यापारः पत्धात्वर्थः, तदा 'भूमौ पर्णं पतति' इत्यादौ क्रियाजन्यफलशालित्वेन भूमेः कर्म्मत्वापत्तिरिति चेन्न, क्रियाजन्यधातुवाच्यफलभागित्वस्यैव कर्म्मत्वरूपत्वात्। प्रकृते अधस्संयोगस्य धातुवाच्यत्वास्वीकाराच्च न क्षतिः, तथाचाहुः **सुषेणाचार्य्याः**– *"अत्र च वृद्धिपतनयोरुत्तरदेशसंयोगो धातुवाच्यफलत्वेन न प्रतीयत इति"* अत एव प्रकृते अधस्संयोगो न धातुवाच्यफलत्वेन विवक्षितः, धात्वर्थस्तु केवलव्यापार एव। **मेध्या** नाडीविशेषः, तस्याः मनसि संयोगः, मेध्यामनस्संयोगस्यैव निद्रापदार्थत्वम्। **इति धीरिति** उक्ताकारकः शाब्दबोधः। अपरत्रापि एवमेव शाब्दबोधप्रणाली अणिजन्तस्थलेषु अवसेया।

अणिजन्तधातूनां शाब्दबोधप्रकारमुपदर्श्य सम्प्रति णिजन्तधातूनां शाब्दबोधप्रकारमाह **एवमित्यारभ्य**। **पूर्व्ववत्** इति पूर्व्वत्र यथा वृत्तित्वं द्वितीयार्थः तथा अत्र वृत्तित्वं तृतीयार्थ इति अन्यत्र तु तुल्यता प्रत्ययानामपि। **मैत्रस्येत्यादि** यथा मैत्रस्तण्डुलं पचतीत्यादौ तथा। कर्त्तरि तृतीयाविधानात् कर्त्तृत्वमपेक्ष्य तृतीयायाः कर्म्मणि द्वितीयाविधानात् कर्म्मत्वमपेक्ष्य द्वितीयायाश्च प्रसक्तौ एकत्र एकदा

In Public domain. Digitization Muthulakshmi Research Academy

एवं चैत्रो मैत्रं तण्डुलं पाचयतीत्यादौ मैत्रपदोत्तरद्वितीयया वृत्तित्वं, तण्डुलपदोत्तरद्वितीयया फलम्, णिजन्तपच्धातुना पाकानुकूलव्यापारोऽर्थः, आख्यातेन तदनुकूलव्यापारो बोध्यः, तदुपरि आश्रयत्वं संसर्गः, तेन तण्डुल–वृत्तिकर्म्मत्वानुकूलपाकानुकूलचेत्रवृत्तिव्यापारानुकूलव्यापारवांश्चैत्र इति बोधः। एवं यदा चेत्रो मैत्रेण तण्डुलं पाचयतीति प्रयोगः, तत्रापि पूर्ववदन्वयबोधः। मैत्रस्य स्वव्यापारापेक्षया कर्त्तृत्वं चैत्रव्यापारापेक्षया कर्म्मत्वं च, अतो द्वितीयातृतीययोर्वैकल्पिकत्वमिति बोध्यम्। एवं चैत्रेण मैत्रः तण्डुलं पाच्यत इत्यत्र चैत्रवृत्तिर्योव्यापारस्तज्जन्यो यस्तण्डुलवृत्तिकर्म्मतानु–कूलपाकानुकूलव्यापारः तदाश्रयो मैत्र इति बोधः। वृत्तित्वं संसर्गः, तृतीयया व्यापारो बोध्यते। पाचिधातुना पाकानुकूलव्यापारो बोध्यते, कर्म्माख्यातेना–श्रयत्वं, द्वितीयया कर्म्मत्वं च बोध्यते।

एवं पिपठिषतीत्यत्र पठ्धातुना पाठोपस्थितिः, सन्प्रत्ययेनेच्छोपस्थितिः, विषयता संसर्गः, आख्यातेन लक्षणया आश्रयत्वोपस्थितिः, तदुपरि

उभयासम्भवात् विकल्पेन उभयोरेव सम्पत्तिः। णिजन्तधातोः कर्म्मप्रत्ययेन साक्षात् तन्निरूपितकर्म्मताया एव अभिहितत्वात् तद्विशिष्टपदार्थवाचकमैत्रादिपदोत्तरं न द्वितीया, अपितु प्रथमा लिङ्गार्थमात्रे पदसाधुत्वार्था, शाब्दबोधस्य च प्रथमान्त–पदार्थमुख्यविशेष्यकत्वनियमात् मैत्रविशेष्यक एव शाब्दबोधः। इत्थमेवान्यत्रापि रीतिरवसेया।

विषयता संसर्ग इति, सा च विषयता इच्छानिरूपिता। **लक्षणया** इति, सन्प्रत्ययस्य इच्छारूपपदार्थाभिधायित्वात् सन्नन्तधातोः सविषयकपदार्थाभि–धायित्वमिति पूर्व्वोक्तसविषयकपदार्थाभिधायिधातूत्तराख्यातस्य नियमेन आश्रयत्वे लक्षणाश्रयणात् तथात्वम्। **एवमित्यादि,** – सन्नन्तपठ्धातोः पाठविषयिणी इच्छा अर्थः, तृतीयार्थः वृत्तित्वं, तस्य च धात्वर्थे इच्छायां तस्याश्च विषयतया पाठे धात्वर्थैकदेशे, तस्य जन्यतासम्बन्धेन फले कर्म्मप्रत्ययार्थे तस्य च आश्रयतया प्रथमान्तपदार्थे शास्त्रे अन्वयः।

In Public domain. Digitization Muthulakshmi Research Academy

पुनराश्रयत्वं संसर्गः, तेन पाठविषयकेच्छाश्रयत्वाश्रय इति धीः। एवं देवदत्तेन शास्त्रं पिपठिष्यत इत्यत्र देवदत्तवृत्तीच्छाविषयपाठजन्यफलशालि शास्त्रमिति बोधः। कृत्प्रत्ययस्य कृत्याश्रये शक्तिः, तेन अन्नस्य पक्तेत्यत्र षष्ठ्याः कर्म्मत्वं द्वितीयाप्रतिरूपत्वात्, पच्धातुना पाकः, तृचा च कृत्याश्रयो बोध्यते, अभेदः संसर्गः, तेन अन्नकर्म्मकपाकानुकूलकृत्याश्रयाभिन्नश्चैत्र इति शाब्दधीः। एवम् अन्नस्य पाचक इत्यत्रापि वुण्प्रत्ययेन कृत्याश्रयो बोध्यते।

आख्यातप्रत्ययस्य शक्तिं प्रतिपाद्य तज्ज्ञानाधीनपदार्थधीमूलकशाब्दबोध-प्रकारञ्च प्रदर्श्य सम्प्रति कृत्प्रत्ययानां शक्त्यादिकं निर्व्वक्ति – **अथेत्यादिना।** तत्र प्रथमतः प्रागुक्तहेतुनैव कर्त्तृविहितकृत्प्रत्ययशक्तिनिरूपणम्। **कृत्याश्रये** कृतिमति। ननु आख्यातस्य यथा लाघवात् कृतौ शक्तिः तथैव कृत्प्रत्ययस्यापि कृतौ शक्तिः कल्प्यतां, न कृतिमति, तत्र शक्तिकल्पनस्य गौरवज्ञानेन प्रतिबन्धात् इति चेदत्राहुः, 'अन्नस्य पक्ता' इत्यादौ तृच्प्रत्ययस्य यदि कृतिरर्थः स्यात्, तदा आश्रयत्वादि-सम्बन्धेनैव तदन्वयः कर्त्तरि अभ्युपेयः, अभेदसम्बन्धेन तदन्वयस्य कर्त्तरि बाधात्, स च असम्भव एव प्रथमाविभक्तेरभेदसम्बन्धेन अन्वयग्राहकत्वात्, अत एव कृत्प्रत्ययस्य कृतिमति शक्तिकल्पनेन अभेदसम्बन्धेन तदन्वयः कर्त्तरि स्वीकार्य्यः लाघवमात्रस्य अकिञ्चित्करत्वात्। **षष्ठ्याः कर्म्मत्वमिति,** यथा कर्म्मणि द्वितीया विहिता तथैव कृत्प्रत्यययोगे कर्म्मणि षष्ठी अपीति षष्ठ्याः कर्म्मत्वं द्वितीया-प्रतिरूपत्वञ्च।

एवम् अन्नस्य पाचक इति – अत्रापि षष्ठ्याः कर्म्मत्वम् इत्यादि पूर्व्ववत् शाब्दबोधोऽपि तथा, कर्त्तृविहितकृत्प्रत्ययस्थलमात्र एव एवं गतिराश्रयणीया। यथा 'ग्रामं गत' इत्यत्र कृत्प्रत्यययोगस्थले द्वितीयार्थः कर्म्मत्वं तस्मिन् ग्रामस्य वृत्तित्वसम्बन्धेन, संयोगानुकूलव्यापारो धात्वर्थः कृत्प्रत्ययस्य कृत्याश्रयः अर्थः, तदेकदेशकृतौ अनुकूलत्वसम्बन्धेन धात्वर्थस्य, कर्त्तरि अभेदेन कृत्याश्रयस्य च अन्वयः, तेन ग्रामवृत्तिकर्म्मतानुकूलव्यापारानुकूलकृत्याश्रयाभिन्नः कर्त्ता इति बोधः।

In Public domain. Digitization Muthulakshmi Research Academy

अथ भावकर्म्मविहितकृत्प्रत्ययस्य भावकर्म्मणी शक्ये, तेन 'चैत्रेण पक्वमन्नमि'त्यत्र चैत्रपदोत्तरतृतीयया कृत्युपस्थितिः वृत्तित्वं संसर्गः, पच् धातुना पाकोपस्थितिः, जन्यत्वं संसर्गः, निष्ठया फलशालित्वोपस्थितिः, अभेदः संसर्गः, तेन चेत्रवृत्तिकृतिजन्यपाकजन्यफलशाल्यभिन्नमन्नमित्यर्थः। भावस्थले तु 'चैत्रेण पक्वमि'त्यत्र चैत्रवृत्तिकृतिजन्यः पाक इति धीः। भावकृद्धञादीनां प्रयोगे साधुतामात्रं, द्विवचनादिकन्तु *"कृद्विहितो भावो द्रव्यवत् प्रकाशते"* [1] इति न्यायादिति। 'एधानाहर्त्तुं व्रजती'त्यत्र एधपदेन काष्ठोपस्थितिः, द्वितीयया कर्मत्वोपस्थितिः, आङ्पूर्वहृधातुना आहरणोपस्थितिः, तुम् प्रत्ययेन उद्देश्यत्वोपस्थितिः, (व्रजधातुना गमनोपस्थितिः) आख्यातेन कृत्युपस्थितिः, आश्रयत्वं संसर्गस्तेन एधवृत्तिकर्म्मतानुकूलाहरणोद्देश्यकव्रजनानुकूलकृत्याश्रय इति शाब्दधीः।

कर्त्तृविहितकृत्प्रत्ययस्य शक्त्यादिकं निरूप्य कर्म्मभावविहितकृत्प्रत्यययोः शक्त्यादिकं निरूपयति **अथे**त्यादिना। **भावः** धात्वर्थः, भावविहितकृत्प्रत्ययस्य शक्तौ भावविहिताख्यातापेक्षया न वैलक्षण्यं तस्यापि भावमात्रे शक्तत्वात्। कर्म्मविहितकृत्प्रत्ययस्य तु कर्म्मणि शक्तिः, कर्म्मपदेन फलाश्रयः बोध्यते, **निष्ठया** निष्ठाक्तप्रत्ययेन **फलशालित्वोपस्थितिः** फलाश्रयत्वबोधः। **भावस्थले** तु इत्यादि, - ननु पक्वमित्यत्र क्तप्रत्ययस्य धात्वर्थबोधकत्वे कथमन्वयबोधः। धात्वर्थेन क्तप्रत्ययार्थस्य अभेदात्, उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्ये अभेदसम्बन्धेन शाब्दबोधस्वीकारात् यथा *"घटो घट इति वाक्यात्"* न शाब्दधीः, इति चेन्न *"सम्भेदेनान्यतरवैयर्थ्यम्"* इति न्यायेन उभयोरेकपदार्थतास्थले अन्यतरवैयर्थ्यस्वीकारात् प्रतीतेः नानुपपत्तिः। ननु यदि एकस्य वैयर्थ्यं तत्कथं भावविहितकृत्प्रत्ययस्य वृथा प्रयोग इत्याकाङ्क्षायामाह **भावे**त्यादि, प्रयोगे व्यवहारे साधुतामात्रं तथा च प्रत्ययव्यतिरेकेण धातूनां प्रयोक्तुमशक्यत्वात् घञादि-

---

1. 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' प्रसिद्धः न्याय इति भावः

In Public domain. Digitization Muthulakshmi Research Academy

अथ द्विकर्म्मकविचारः।

साहचर्य्येण एव प्रयोगार्हत्वम् *"नापदं प्रयुञ्जीत"* इति नियमात्। ननु घञन्तपदात् क्रियामात्रप्रतीतौ पदसाधुत्वार्थम् एकवचनं तस्मात् भवतु, किन्तु पाकौ पाका इत्यादौ द्विवचनादिकं तु कथमुत्पद्यत इत्याकाक्षाङ्क्षायामाह - **द्विवचनादिकन्तु** इत्यादिं। तदुक्तं *"क्रियायाः साध्यतावस्था सिद्धता च प्रकीर्त्तिता। सिद्धता द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ्विधिम्।"*[1] इति।

एककर्म्मकाणां धातूनां शक्त्यादिकं निरूप्य द्विकर्म्मकाणां तन्निरूपणं प्रतिजानीते **अथे**त्यादिना। कर्त्तव्य इत्यध्याहारात् द्विकर्म्मकविचारस्य उत्तर-कालकर्त्तव्यताज्ञापनात्। द्विकर्म्मकाश्च दुहादिनीवहादयः, तद्यथा *"दुहिर्व्वदत्यर्थ-जिदण्डिमन्थः, प्रच्छार्थनार्थौ नयनार्थशासू। कृषीरुधिश्चित्र् च तथार्थवृत्तौ, द्विकर्म्मकोऽयं कथितो दुहादिः॥"* इति तत्र दुहादिः। नीवहादीनाञ्च कर्म्मविहितप्रत्ययेन उक्ताया वैलक्षण्यं परतः प्रतिपादयिष्यते। नीवहादयस्तु *"नयतिर्व्वहतिश्चैव हरतिः कर्षीतिस्तथा"*।

अथेति। सकर्म्मकाः खलु द्विविधाः, एककर्म्मकाः, द्विकर्म्मकाश्च। एक-कर्म्मान्वितस्वार्थबोधकाः गम्यादयः एककर्म्मकाः। द्विकर्म्मकाः खलु द्विविधाः, द्विकर्म्मकान्वितैकव्यापारार्थकाः द्विकर्म्मान्वितद्विव्यापारार्थकाश्चेति। तत्राद्याः दुह्यादयः, न च ते सिद्धान्ते द्विव्यापारार्थकाः, तथात्वे ईप्सिततमाभ्यामेव द्वाभ्यां कर्म्मभ्यां व्यापारद्वयेऽन्वयसम्भवेन द्वितीयाद्युत्पत्तौ *"अकथितञ्च"* (अ. 1.4.51) इति सूत्रेण दुह्यादेः कारकान्तरसंज्ञानापन्नस्य कर्म्मसंज्ञाविधानानौचित्यम्। द्विकर्म्मा-न्वितद्विव्यापारार्थकाः पुनर्णिजन्ताः एककर्म्मधातवः। तत्र च धातुनैकव्यापा-रोऽभिधीयते, द्वितीयस्तु णिचा। तद्व्यापारद्वये च ईप्सितकर्म्मणः प्रयोज्यकर्त्तृरूप-कर्म्मणश्च यथाक्रममन्वयः। तथात्वञ्च गम्यादीनामिति बोध्यम्। इतरेषान्तु नैवं, तद्योगे प्रयोज्यकर्त्तुः कर्म्मसंज्ञाभावेन व्यापारद्वये कर्म्मद्वयान्वयाभावात्।

---

1. वैयाकरणसिद्धान्तभूषणे वाक्यपदीयकारिकारूपेण उल्लिखितोऽयम् इदानीं प्रकाशते वाक्यपदीये न लभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

'अजां ग्रामं नयती'त्यत्र अजावृत्तिकर्म्मतानुकूला या ग्रामविषयिणी प्राप्तिस्तदनुकूलकृत्याश्रय इति बोधः। एवं 'नीयते ग्राममजा पथिकेन' इत्यत्र पथिकनिष्ठकृतिजन्या या ग्रामविषयिणी प्राप्तिस्तज्जन्यफलशालिन्यजेति शाब्दधीः। एवं 'गां दोग्धि पयो गोपालक' इत्यत्र गोसम्बन्धिपयोवृत्ति-कर्म्मतानुकूलदोहनानुकूलकृतिमानित्यन्वयधीः। एवं 'दुह्यते गौः क्षीरं गोपालकेन' इत्यत्र गोपालकनिष्ठकृतिजन्यक्षीरविषयकदोहननिमित्तं गौरित्य-न्वयः। एवं प्रकृतकर्म्माख्यातेनाप्रधानकर्म्मणो गवादेर्बोधजननादित्यकथितं कर्म्मेत्युक्तम्, कर्म्मत्वातिदेशस्तु द्वितीयालाभार्थः, न तु साक्षात् कर्म्मत्वम्। एवं 'चैत्रस्य पाकः, अद्भुतः समुद्रस्य बन्धो वानरै'रित्यादौ, चैत्रनिष्ठकृति-जन्यः पाकः एवं वानरीयकृतिजन्यसमुद्रविषयकबन्धनमद्भुतमिति बोधः। क्वचित् षष्ठ्यास्तृतीयाप्रतिनिधित्वात् कृतिरर्थः, क्वचित् द्वितीयाप्रतिनिधत्वात् कर्म्मत्वमर्थः। एवम् 'अधीती व्याकरणे, पठिती तन्त्रे' इत्यादौ व्याकरणमधी-तवान्, तन्त्रं पठितवान् इत्याद्यन्वयधीः "क्तस्येन्विषयस्य कर्म्मणी"[1]त्यनेन सप्तम्या द्वितीयाप्रतिनिधित्वात्।

"दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्व्वविधौ। ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना"॥ (म.भा.1.4.51)इत्यपि। उदाहरणं यथा **अजां नयति ग्राममित्यादि,** द्विकर्म्मणां धातूनां फलावच्छिन्नव्यापारानुकूल-व्यापारवाचित्वादेव द्विकर्म्मकता, तथा च मुख्यव्यापारजन्यफलीभूत-व्यापाराश्रयत्वेन अजायाः फलीभूतव्यापारजन्यसंयोगरूपफलाश्रयत्वेन च ग्रामस्य कर्म्मता, नीधातोः संयोगानुकूलव्यापारानुकूलव्यापारार्थकत्वात्, नीयत इत्यादौ द्विकर्म्मणोऽपि नयतेः प्रधानस्यैव कर्म्मण उक्तार्थता, तथाचानुशासनवचनं *"दुहादेर्गौणकं कर्म्म नीवहादेः प्रधानकम्"* इत्यादि। प्राधान्याप्राधान्यञ्च कर्म्मणाम्

अकथितमिति। अपादानादिविशेषसंज्ञाभिरविवक्षितं यत् कारकं तत् कर्म्मसंज्ञं स्यात्। *"अकथितञ्चेति"* (पा.1.4.51) सूत्रात्। एतत् कर्म्मसंज्ञाविधानं द्वितीयालाभाय।

---

1. क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम् – वा अष्टाध्यायी 2.3.36

In Public domain. Digitization Muthulakshmi Research Academy

एवं "चर्मणि द्वीपिनं हन्ति, दन्तयोर्हस्ति कुञ्जरम्। केशेषु चमरीं हन्ति, सीम्नि पुष्यलको हतः"। इत्यादौ "निमित्तात् कर्म्मसंयोगे"[1] इति

एवं मन्तव्यं यथा, *"अपादानादिकं कर्त्तुं शक्यते यस्य कर्म्मणः। दुहादेः कर्म्मणां मध्ये तस्याप्राधान्यमुच्यते"॥* इति। 'दुह्यते गौः क्षीरं गोपालकेन' इत्यादौ दुहादि-धातुघटितवाक्यस्थले गौणकर्म्मण एव उक्तार्थता, तेन कर्म्मविहितप्रत्यययोगे नीवहादेः प्रधानकर्म्मवाचकपदात् दुह्यादेश्च अप्रधानकर्म्मवाचकपदात् प्रथमा इति स्थितम्। स्नुत्यनुकूलव्यापारो दुहधात्वर्थः स्नुतिश्च अधःक्षरणानुकूलव्यापारः।

ननु यदि धात्वर्थतावच्छेदकफलशालिनः कर्म्मत्वमङ्गीक्रियते, तदा 'आकाशे लोष्टमुत्क्षिपति' इत्यादौ उत्पूर्व्वस्य क्षिपेः ऊर्द्ध्वसंयोगानुकूलव्यापारानुकूल-व्यापारार्थकतया संयोगरूपफलाश्रयत्वेन आकाशस्य कर्म्मत्वापत्तिवारणाय मुख्य-धात्वर्थतावच्छेदकफलशालित्वस्यैव कर्म्मत्वं विवक्षणीयम्, एवं दुहधातोः व्यापार -रूपफलाश्रयस्य गोः दुहधातोः कथं कर्म्मत्वमुपपादनीयम्, इत्याकाङ्क्षायामाह **कर्म्मत्वातिदेश** इति, कर्म्मसंज्ञाविधानं, कर्म्मत्वातिदेशः, चैत्रस्य पाक इत्यत्र कृत्प्रत्यययोगे कर्त्तरि षष्ठीविधानात् तृतीयावत् कर्त्तृत्वस्यैव प्रतिपादयितव्यत्वात् तृतीयाप्रतिनिधित्वं, 'समुद्रस्य बन्ध' इत्यत्र कर्म्मणि षष्ठ्याः द्वितीयाप्रतिनिधित्वम्। 'अधीती व्याकरणे' इत्यादौ सप्तम्याः कर्म्मत्वमर्थः, तस्य अध्ययने अन्वयः, इन्प्रत्ययस्य सम्बन्धित्वमर्थः व्याकरणविषयकाध्ययनसम्बन्ध्यभिन्न इत्यन्वय-बोधः। उक्तसप्तम्याः कर्म्मार्थ एव अनुशासनात् सप्तम्याः द्वितीयाप्रतिपाद्यार्थ-परत्वमक्षतम्।

चर्म्मणीत्यादि अत्र सप्तम्यर्थ उद्देश्यत्वं, तस्य निरूपकत्वेन हनने, द्वीपिनमित्यत्र द्वितीयार्थः कर्म्मत्वं, तस्यापि निरूपकत्वेन हनने अन्वयः। तिप्रत्ययार्थः कृतिः तस्याश्च कर्त्तरि अन्वयः, तथा च चर्म्मोद्देश्यकद्वीपिकर्म्मक-

---

चर्म्मणीति। *"निमित्तात् कर्म्मसंयोगे सप्तमीवाच्येति"*[1] दुर्गः। तेन हि चर्म्मणि चर्म्मनिमित्तमित्यर्थावगमः। निमित्तमिह क्रियाफलं, यदि तु कारणमित्युच्यते तर्हि

---

1. कातन्त्र. चतुष्टय. 225 वार्तिकम्

In Public domain. Digitization Muthulakshmi Research Academy

निमित्तसप्तमी, निमित्तादुद्देश्यात्तत् वाचकपदादित्यर्थः। तथा च निमित्तकर्म्मणो –रवयवावयवित्वसम्बन्धश्चेत्तदा निमित्तवाचकपदात् सप्तमी, तेन चर्मोद्देश्यकं यत् द्वीपिकर्म्मकहननं तदनुकूलकृतिमानित्यन्वयः, एवमन्यत्रापि बोध्यम्। पुष्पलको गन्धमृगः, सीम्नि अण्डकोषे।

हननानुकूलकृतिमान् इति बोधः। एवमन्यत्रापि **कर्म्मसंयोगे** कर्म्मणा सह सम्बन्धे, स चात्र सम्बन्धः समवायरूपः कर्म्मनिमित्तयोरवयवावयविभावसत्त्व एव निमित्त–भूतवस्तुवाचकपदात् सप्तम्याः शिष्टप्रयोगानुगतत्वात्। केचित्तु संयोगपदेन विशिष्ट–संयोगो व्यवस्थाप्यते, स च अवष्टम्भाख्यसंयोगः, तस्य संयोगस्य च दन्तकेशत्व–गादिषु सत्त्वं, तथा च *"अवष्टम्भाख्यसंयोगो दन्तकेशत्वगादिषु"* इति। सोऽपि समवायतुल्य एवेति नानुपपत्तिः। दन्तकेशत्वगादिषु एव तादृशसम्बन्धस्वीकारेण 'मुक्ताफलाय करिणं हरिणं पलाय' इत्यादौ कर्म्मणा सह निमित्तस्य तादृश–संयोगासत्त्वात् न सप्तमीति प्राहुः।

सतिसप्तम्या इत्यादि – **सामानाधिकरण्यं** समानाधिकरणवृत्तित्वं, *"यस्य च भावेन भावलक्षणमि"*[2] ति सूत्रानुशिष्टा सप्तमी सतिसप्तमी, तदर्थो यथा – यस्य भावेन भावः अन्यस्य क्रिया लक्ष्यते तद्वाचकपदात् सप्तमी, तथाहि – 'गोषु दुह्यमानासु आगत' इत्यत्र वक्ता प्रतिपाद्यपुरुषेण ज्ञातां दोहनक्रियां चिह्नतया

'जाड्येन बद्धः' इत्यादौ अतिप्रसङ्गः स्यात्। संयोगश्चेह संयोगसमवायसम्बन्धान्तर –रूपः, तत्र द्वीपिचर्म्मणोः गन्धमृगसीम्नोः अवयवावयविभावात् समवायः। हरदत्तस्तु पुष्पलकः शङ्कुः। **सीम्नि** सीमज्ञानार्थं, हतो निखात इत्याह। अस्मिंस्तु पक्षे सीमपुष्पलकयोः संयोगः। 'मुक्ताफलाय करिणं हरिणं पलाय' इत्यादौ *"क्रियार्थोपपदस्य"*[3] इत्यादिना चतुर्थी, मुक्ताफलान्याहर्त्तुमित्यर्थविवक्षया। अपप्रयोग एवायमिति बहवः। विधिरयं हेत्वर्थे तृतीयायाः तादर्थ्यचतुर्थ्याश्च प्रतिषेधक इत्यवगन्तव्यम्।

---

1. कातन्त्र. चतुष्टय. 225 वार्तिकम्   2. अष्टाध्यायी 2.3.37

3. अष्टाध्यायी 2.3.14

In Public domain. Digitization Muthulakshmi Research Academy

सतिसप्तम्याः सामानाधिकरण्यमर्थः। क्वचित् कालिकं, क्वचिद्देशिकं च। यथा 'गोषु दुह्यमानास्वागतः, दुग्धास्वागत' इत्यादौ समानकालीनत्वं भासते। तेन गोविषयकवर्त्तमानदोहनसमानकालीनवर्त्तमानगमनानुकूलकृतिमान्, एवं गोविषयकातीतदोहनसमानकालीनातीतगमनानुकूलकृतिमानित्यन्वयः।

दैशिकं यथा 'द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादि'त्यादौ, सत्त्वनिष्ठं गुण-कर्म्मणोर्भेदसमानदेशत्वं भासते, तेन गुणकर्म्मप्रतियोगिको यो भेदस्तस्य समानदेशा सत्तेति बोधः। द्रव्ये भेदसत्त्वयोर्दैशिकसामानाधिकरण्यादिति।

विज्ञाप्य आगमनक्रियायाः कालं निर्दिशति, अत एव कर्म्मतासम्बन्धेन दोहन-विशिष्टवाचकपदात् सप्तमी विशेष्यविशेषणयोः समानविभक्तिकत्वानुरोधाच्च पदान्तरात्। उक्तस्थले सामानाधिकरण्यम् उभयोः क्रिययोः कालिकसम्बन्धेन, क्वचित् 'दुह्यमानास्वागत' इत्यादौ कालिकं सामानाधिकरण्यम् एकाधिकरण-निरूपितकालिकसम्बन्धावच्छिन्नवृत्तित्वं, दैशिकं सामानाधिकरण्यम् एकाधिकरण-निरूपितं संयोगसमवायाद्यवच्छिन्नवृत्तित्वम्।

कालिकसामानाधिकरण्यस्थलं प्रदर्श्य दैशिकं दर्शयति, **द्रव्यमित्यादिना**– अत्र द्रव्यत्वसाध्यकगुणकर्म्मान्यत्वसमानाधिकरणसत्त्वहेतुः सद्धेतुः, नतु सामानाधिकर-ण्यांशपरित्यागेन, शुद्धसत्त्वस्य गुणकर्म्मणोरपि वर्त्तमानत्वात्, तत्र द्रव्यत्वस्य

सतीति। *"यस्य च भावेन भावलक्षणम्"*[1] इति सूत्रेण विहिता सप्तमी सति सप्तमी। इह खलु समानदेशकालाभ्यां परिच्छेदकत्वरूपलक्षणमर्थः, तेन 'गोषु दुह्यमानासु आगत' इत्यादौ गोदोहनक्रियाकालेनागमनकालपरिच्छेदात् गवादेः सप्तमी। 'गुणे सति द्रव्यत्वमस्ती'त्यादौ तु गुणसत्ताया द्रव्यत्वसत्वाधिकरणदेश-परिच्छेदकत्वात् गुणवाचकात् सप्तमीति बोध्यम्। प्रसिद्धश्च निर्ज्ञातदेशकाल-क्रियायाः अनिर्ज्ञातदेशकालयोः परिच्छेदकत्वं, तस्याश्च कदाचित् स्वसमान-कालेन कदाचिच्च स्वपूर्वोत्तरकालाभ्याञ्च तथात्वम्। तेन दुग्धासु धोक्ष्यमाणासु गोष्वित्यादौ सिद्धिः।

---

1. अष्टाध्यायी 2.3.37

In Public domain. Digitization Muthulakshmi Research Academy

'पितृव्यघाती पुत्रो जनिता' एवं 'गतो वनं श्वो भवितेति रामः' इत्यादौ पितृव्यं हतवानित्यर्थे पितृव्यघाती, जनिष्यतीत्यर्थे जनितेति। कथं भविष्यदुत्पत्तिकपुत्रे पितृव्यकर्म्मकातीतहननकर्त्तृत्वसम्बन्धोऽसम्भवात्। एव-मन्यत्राप्यसम्भव इति "धातुसम्बन्धे प्रत्ययाः"[1] सूत्रकरणम्। तस्यायमर्थः - धात्वर्थस्यावश्यकसम्बन्धे तद्धात्वर्थसमभिव्याहृतक्रियान्तरभिन्नकालीन-प्रत्ययाः साधवः स्युः। बोधे तु यथोचितकालमादायैव विषयीभवति, तेन भविष्यदुत्पत्तिकपुत्रे यद्यवश्यं पितृव्यकर्म्मकहननं भासते, तदैवायं प्रयोगः साधुः। तेनातीतकालविहितप्रत्ययेनावश्यकत्वं भासते। तेन भविष्यदुत्पत्तिक-पुत्रोऽवश्यं पितृव्यं हनिष्यतीति बोधः। एवं परदिनोत्पत्तिप्रतियोगी रामोऽवश्यं वनं गमिष्यतीति बोधः॥

अभावाच्च व्यभिचारात्। अतः प्रकृते विवक्षितं सामानाधिकरण्यं सप्तम्या अर्थः। अत्रेदमवधेयम् - यथा सप्तसु पदार्थेषु मध्ये द्रव्यगुणकर्म्मसु त्रिष्वेव सत्ताख्या जाति -र्व्वर्त्तते, तथाचोक्तं *"द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते"* (कारिकावली) इति। गुणकर्म्मातिरिक्ते द्रव्ये च द्रव्यत्ववति गुणकर्म्मान्यत्वं वर्त्तते सामानाधिकरण्य -सम्बन्धेन तद्विशिष्टं सत्त्वं, तत्सामानाधिकरण्यविशिष्टसत्त्वञ्च द्रव्यमात्रे एव, नतु गुणे कर्म्मणि वा, विशिष्टपदार्थस्य यदन्तर्भावेण वैशिष्ट्यं तस्य तदन्तर्भावेणैव सत्तास्वीकारात्, अत्र सामानाधिकरण्यघटकीभूतं अधिकरणत्वं स्वरूपेण, अन्यत्वस्य भेदरूपत्वात् स्वरूपेणैव वृत्तेः, वृत्तित्वञ्च समवायेन, समवायस्यैव जातेः द्रव्यवृत्तित्वनियामकत्वात्।

अन्यत्रापीति 'अग्निष्टोमयाजी पुत्रो जनिता' इत्यादौ अपि भविष्यत्कालोत्पत्तिकः पुत्रः अवश्यं अग्निष्टोमेन यक्ष्यति इत्यर्थः। *"धातुसम्बन्धे प्रत्ययाः"*[1] इति, अत्र कौमारा धात्वर्थानां सम्बन्धे विशेष्यविशेषणभावलक्षणे स्वं कालं त्यक्त्वा विशेष्यस्य धात्वर्थस्य काले कृत्संज्ञकाः प्रत्ययाः साधवः भवन्ति, न तु त्यादयः साध्यविहितत्वात्। अत्र प्रकरणबलात् कृतो लब्धाः, प्रत्ययग्रहणं

---

1. कातन्त्र. कृत् 430, अष्टाध्यायी 3.4.1

In Public domain. Digitization Muthulakshmi Research Academy

अथ कारकविचारः

अथ कारकनिरूपणम्। तत्र क्रियानिमित्तत्वं कारकत्वमिति वैयाकरणाः।

सामान्यार्थम्, अत एव 'गोमान् आसीत्' इत्यादौ वर्त्तमाने [1] *मन्तुरासीदित्यनेन* सम्बन्धे अतीते सिद्धः। प्रकृते तु जनितेत्यनेन सम्बन्धे अतीते णिनिप्रत्ययान्तस्यापि भविष्यत्कालवृत्तितया प्रतीतेः साधुत्वम्। एवमन्यदप्यनुसन्धेयम्।

शिष्यावधानाय कारकनिरूपणं प्रतिजानीते – **अथे**त्यादिना। क्रियत इति शेषः। अथ जिज्ञासाव्यतिरेकेण निरूपणमसङ्गतम्, असङ्गतमभिधानञ्च न ग्राह्यं, अत एव सामान्यमप्रतीतवतो विशेषजिज्ञासानुदयात् सामान्यधर्म्मावच्छिन्नजिज्ञासाया उदयाच्च प्रथमतः सामान्यलक्षणाभिधानमेव न्याय्यमिति आदौ कारकसामान्यलक्षणमाह **क्रियेत्या**दिना। तद्धर्म्मावान्तरधर्म्मप्रकारकज्ञानगोचरेच्छां प्रति स्वातन्त्र्येण इष्टसाधनताज्ञानधर्म्मितावच्छेदकसम्पादकतया वा तद्धर्म्मज्ञानस्य हेतुत्वादपि सामान्यलक्षणज्ञानम् अपेक्षितमित्याहुः।

अथेति। कारकत्वं नाम क्रियाजनकशक्तिमत्त्वं, भाष्ये करोति क्रियां निवर्त्तयति इति व्युत्पत्तिदर्शनात्, "साधकं क्रियानिष्पादकं कारकसंज्ञम्" इति वार्तिकोक्तेश्च। क्रियायाश्च शक्तेरेवान्वयव्यतिरेकसत्त्वात् कारकत्वम् इति मतान्तरं तदुक्तं हरिणा – *"स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे। क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः"*॥ [2] इति। शक्तिशक्तिमतोरभेदाच्च द्रव्यं कारकमिति व्यवहारः इति बोध्यम्। एवं च क्रियाजनकत्वेन सर्वेषां कर्त्तृत्वेऽपि स्वस्वावान्तरव्यापारविवक्षयैव करणत्वादिकमवगन्तव्यम्। अत्रोक्तं हरिणा – *"निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादि सम्भवः"*॥ [3] इति। अत्रावान्तरभेदपरिग्रहो यथा – कर्त्तुः कारकान्तरप्रवर्त्तनव्यापारः। करणस्य क्रियाजनकाव्यवहितव्यापारः। कर्म्मणः क्रियाफलेनोद्देश्यत्वव्यापारः। अधिकरणस्य कर्त्तृकर्म्मव्यवहितक्रियाधारणव्यापारः। सम्प्रदानस्य प्रेरणानुमत्यादिव्यापारः। अपादानस्य अवधिभावोऽपगमव्यापारः इति।

---

1. मन्तुः = मतुपः (मन्तु इति कातन्त्रे, मतुप् इति पाणिनीये)

2. वाक्यपदीयम् 3,7.1 3. वाक्यपदीयम् 3,7.18

In Public domain. Digitization Muthulakshmi Research Academy

करोति साक्षात् परम्परया वा क्रियाम् अनुकूलयति इति कारकः, कृञो वुणि कर्त्तृवाच्ये प्रत्यययात् क्रियां प्रति प्रयोजकत्वं गम्यते तेन क्रियानिमित्तत्वं कारकत्वम् इति प्राप्तम्। ननु यदि क्रियानिमित्तत्वमेव कारकत्वं तदा कथं उद्देश्यतावच्छेदक-विधेयतावच्छेदकयोरैक्ये अभेदेन शाब्दबोधः? उद्देश्यतावच्छेदकतासम्बन्धेन अभेदसम्बन्धावच्छिन्नप्रकारशाब्दबोधं प्रति स्वरूपेण विधेयतावच्छेदकत्वस्य तादात्म्येन विधेयतावच्छेदकस्य वा प्रतिबन्धकत्वनियमात्। येन घटत्वम् उद्देश्यता-वच्छेदकीकृत्य तादात्म्येन घटप्रकारकशाब्दबोधो न स्यात् 'घटो घट' इति चेदत्राहुः – कारकपदमत्र न क्रियानिमित्तमात्रपरं किन्तु कारकपदप्रतिपाद्यपरं, तथाहि क्रियानिमित्तत्वं कारकत्वपदप्रतिपाद्यमित्यर्थकरणात् उद्देश्यतावच्छेदक-विधेयतावच्छेदकयोः ऐक्याभावात् न शाब्दबोधस्य अनुपपत्तिः। प्रकृते क्रिया-निमित्तत्वमुद्देश्यं तद्वृत्त्युद्देश्यतावच्छेदकञ्च क्रियानिमित्तत्वत्वं विधेयतावच्छेदकन्तु न तत्, परं कारकत्वपदप्रतिपाद्यत्वम् एव, अतो न दोषः। इत्थमेव सर्व्वत्र लक्षणनिरूपणावसरे समाधानस्य पन्था अवलम्बनीय इति।

वैयाकरणा इति वदन्ति कारकलक्षणमिति शेषः। तदुक्तं कौमारे *"क्रियानिमित्तं कारकं लोकतः सिद्धम्"*[1] इति। तत्र 'देवदत्तो घटं करोति' इत्यादौ कर्त्तृर्देवदत्तादेः मुख्यभावेन एव धात्वर्थं प्रति जनकत्वम्, तस्य घटक्रियां प्रति अनन्यथासिद्धत्वात् नियतपूर्ववर्त्तित्वाच्च। अन्यथासिद्धत्वञ्च *"येन सह पूर्वभावः कारणमादाय वा यस्य। अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्। जनकं प्रति पूर्ववृत्तितामपरि-ज्ञाय न यस्य गृह्यते। अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविन"*[2] इत्युक्तेषु पदार्थेषु अवसेयम्। *"नियतपूर्व्ववर्त्तित्वञ्च कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कार्य्य-समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वम्"* इति। ईदृशमेव कारणत्वं कर्त्तरि।

कर्म्मणस्तु कार्य्याव्यवहितप्राक्क्षणे सत्त्वाभावात् न तादृशकारणत्वनिर्वाह इति न तत्र जनकत्वलक्षणं कारकत्वम्, किन्तु उद्देश्यत्वमात्रेण प्रयोजकत्वरूपमिति निमित्तपदस्य प्रयोजकमात्रपरता। करणस्य तु संयोगादिव्यापारं द्वारीकृत्य कार्य्या-

1. कातन्त्र. चतुष्टय. 221 दुर्गव्याख्या   2. कारिकावली

In Public domain. Digitization Muthulakshmi Research Academy

व्यवहितप्राक्क्षणावच्छेदेन कार्य्याधिकरणावृत्तित्वात् मुख्यमेव जनकत्वलक्षणं निमितत्वम्।

सम्प्रदानस्य अनुमत्यादिप्रकाशनद्वारा क्रियां प्रति निमित्तत्वं, तदपि जनकत्व-लक्षणमेव, तदनुमत्यादिसत्त्वेनैव दानादीनां प्रवृत्तेस्तदनुमत्याद्यभावेन तदभावाच्च, अन्वयव्यतिरेकाभ्यां क्रियां प्रति जनकत्वात्। अपादानस्यापि तथात्वं, वृक्षादेः स्वसत्त्वेनैव क्रियां प्रत्यनुकूलत्वात् यदि वृक्षादयो न स्युः, तदा कुतो वा पर्णादिकं विभजेत।

एवमधिकरणमपि 'देवदत्तः कटे आस्ते' इत्यादौ देवदत्तादेः स्थितिं प्रति कारणीभवत् कारकसंज्ञां भजते। तदुक्तम् *'उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृत''*[1] मिति।

एवं सर्वेषामेव कारकाणां क्रियानिमित्तत्वस्य अव्याहतत्वात् वैयाकरणोक्तं कारकलक्षणं सर्व्वत्र सोपपत्तिकम्। अथ वुण्प्रत्ययस्य कर्त्तर्य्येव विधानात् कृ-धातूत्तरवुण्प्रत्ययेन कारकशब्दनिष्पत्त्या कृत्यर्थकधातूत्तरकर्त्तृप्रत्ययस्य च आश्रयत्वे लक्षणया कारकशब्देन कृत्याश्रयो बोध्यते, तत्त्वञ्च केवलं कर्त्तर्य्येव वर्तेत नान्यत्र कर्म्मादौ कारके। उक्तं हि *'सविषयकपदार्थाभिधायिधातूत्तरकर्त्तृविहि-ताख्यातस्य आश्रयत्वे लक्षणा'* इति स्वयमेव। अथाङ्गीकृतमेव *'कारकशब्दस्य कर्त्तृप्रत्ययनिष्पन्नस्य कृत्याश्रयरूपोऽर्थ'* इति, किन्तु आश्रयाश्रयिभावः सम्बन्धमन्तरेण न भवति, सम्बन्धविशेषश्चात्र यदि न निरुच्यते, तदैव येन केनापि सम्बन्धेन कृत्याश्रयत्वव्याख्यानात् सर्व्वत्रैव निष्पत्तिः स्यात् इति चेत् कृत्याद्यर्थक-धातूत्तरतिङ्प्रत्ययार्थाश्रयत्वं समवायसम्बन्धेनैव स्वीकर्त्तव्यम्, अन्यथा 'घटो जानाति' इत्यादि प्रतीतिरपि प्रमा स्यात् कालिकसम्बन्धेन घटे ज्ञानाश्रयत्वस्य अव्याघातात्। अतः *"कारकशब्दोऽयमव्युत्पन्नो निमित्तपर्य्यायः स्वभावात् नपुंसक-लिङ्गः, यत् क्रियानिमित्तमात्रं प्रधानमप्रधानं वा तत् कारकमुच्यते"* इत्यादि कौमारव्याकरणप्रोक्तदिशा समाधेयम्। कैयटोऽपि क्रियानिर्व्वर्त्तकस्यैव कारक-संज्ञामाह। अत एवाह क्रियानिमित्तत्वं कारकत्वमिति। तथा च 'ओदनं

1. वाक्यपदीयम् 3,7.148

In Public domain. Digitization Muthulakshmi Research Academy

तन्न। 'मैत्रस्य तण्डुलं पचती'त्यादौ सम्बन्धिनि मैत्रे कारकत्वापत्तिः, सम्प्रदानादेरनुमतिप्रकाशनद्वारेव तण्डुलसम्पादनद्वारापि पाकनिमित्तत्वात्।

पचती'त्यादौ विक्लित्यवच्छिन्ना क्रिया पचेरर्थः तत्र अनुकूलत्वसम्बन्धेन विशेषणीभूते विक्लित्तिरूपार्थे निमित्तत्वेन ओदनादीनां क्रियानिमित्तत्वरूपं कारकत्वमव्याहतम्। ननु यदि क्रियानिमित्तत्वमेव कारकत्वमुच्यते तदा व्यापाररूपक्रियाया अपि कारकत्वापत्तिः, फलात्मकक्रियायां तस्या मुख्यतयैव निमित्तत्वादिति चेत् तत्तत्क्रियाभिन्नत्वे सति क्रियानिमित्तत्वं कारकत्वमिति वाच्यम्। 'विप्राय धनं ददाति' इत्यादौ तु दानात्मकक्रियां प्रति अनुमतिप्रकाशनद्वारा निमित्त्वात् सम्प्रदानादेः कारकत्वम्।

अथ उक्तलक्षणस्य दोषमवतारयति - तन्नेत्यादिना। सम्बन्धिनि स्वामित्व-सम्बन्धवति मैत्रे तण्डुलसम्पादनद्वारा पाकनिमित्तत्वात्, तथाहि - यदि मैत्रो न तण्डुलसम्पादनादिकमकरिष्यत्, तदा पाक एव नाभविष्यत् इति मैत्रस्य तत्सम्पादनादिद्वारा निमित्तत्वमव्याहतम्, अतस्तस्मिन् कारकलक्षणातिव्याप्तिः स्यादिति अन्यथैव कारकलक्षणं निर्व्वाच्यम्, 'सम्बन्धः कारकाद् भिन्न एवे'ति नियमात्।

अत्र केचित्। क्रियायां शक्तेरेव कारणत्वम्, अन्वयतो व्यतिरेकतश्च तस्या एव कारणत्वव्यवस्थितेः, तदुक्तं हरिणा, *"स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे। क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः"*[1] इति। सामर्थ्यस्य कारकत्वश्रुतावपि सामर्थ्यसामर्थ्यवतोरभेदविवक्षया शक्तिमतो द्रव्यस्यापि कारकत्वम्। क्रियाजनकत्व-लक्षणतुल्यतायामपि सर्व्वेषां स्वस्वावान्तरव्यापारविवक्षया भेदेन विलक्षण-कारकत्वम्। तदुक्तम् हरिणा *"निष्पत्तिमात्रे कर्तृत्वं सर्व्वत्रैवास्ति कारके। व्यापार-भेदापेक्षायां करणत्वादिसम्भवः"*॥[2] इति।

मैत्रस्येति। क्रियान्वयित्वं कारकत्वमित्याद्युक्तलक्षणात् तण्डुलसम्बन्धिमैत्र-पदस्य पचतीति क्रियया साक्षादन्वयाभावात् न कारकत्वमिति स्पष्टम्।

---

1. वाक्यपदीयम् - 3,7.1 2.वाक्यपदीयम् - 3,7.18

In Public domain. Digitization Muthulakshmi Research Academy

विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वमिति नैयायिकाः। अत एव नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वात् तद्द्वारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वं कल्प्यम्। विभक्तिस्तु क्वचित् सुबात्मिका क्वचित् तिङात्मिका च इति शेषः। 'स्तोकं पचती'त्यादौ क्रियाविशेषणेऽतिप्रसङ्गवारणाय विभक्त्यर्थद्वारेति। तत्र हि द्वितीया साधुत्वार्था। सम्बन्धिनः क्रियानिमित्तत्वेऽपि न क्रियान्वयित्वम्, अतो नातिव्याप्तिः। *'गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजै'*रित्यादौ तु नामाध्याहारः कर्त्तव्योऽतो नातिव्याप्तिः॥

अवान्तरव्यापारभेदो यथा, कारकान्तरप्रवर्त्तनव्यापारः कर्त्तृतायां प्रयोजकः, क्रियाजनकाव्यवहितव्यापारः करणत्वप्रयोजकः, क्रियाफलेनोद्देश्यत्वव्यापारः कर्म्मत्वे, कर्त्तृकर्म्मव्यवहितक्रियाधारणव्यापारश्च अधिकरणत्वे, प्रेरणानुमत्यादिव्यापारः सम्प्रदानत्वे, अवधिभावोऽपगमव्यापारः अपादानत्वे प्रयोजक इति।

अथ दोषनिर्मुक्तं नैयायिकाभिमतं लक्षणमाह – **विभक्त्येत्यादिना**। विभक्त्यर्थ-द्वारा विभक्त्यर्थमन्तराकृत्य, क्रियान्वयित्वं धात्वर्थसम्बन्धत्वं, विभक्त्यर्थद्वारा अन्वयित्वमात्रोक्तौ रक्तो घट इत्यादौ विशेषणवाचकपदोत्तरविहितप्रथमाविभक्त्यर्थाभेदरूपं सम्बन्धमन्तराकृत्य रक्तपदार्थस्य घटे अन्वयेन कारकत्वापत्तिवारणाय क्रियापदं, तथा च उक्तस्थले रक्तपदार्थस्य अभेदसम्बन्धेन नामार्थान्वयित्वं, न तु क्रियान्वयित्वमपीति न दोष इति मतम्।

अत एवेत्यादि – नामार्थधात्वर्थयोः प्रातिपदिकार्थक्रिययोः भेदेन भेदसम्बन्धेन अभेदातिरिक्तसम्बन्धेन इत्यर्थः। साक्षात् विभक्त्यर्थम् अनन्तराकृत्य अन्वयस्य अव्युत्पन्नत्वात् तद्द्वारीभूतविभक्त्यर्थोपस्थितेः विभक्त्यर्थज्ञानस्य **तन्त्रत्वं** प्रयोजकत्वं कल्प्यम्। **क्वचिदित्यादि** – यथा घटं जानाति इत्यादौ द्वितीयार्थविषयित्वसम्बन्धेन ज्ञाने धात्वर्थे घटरूपनामार्थस्य तिप्रत्ययार्थमाश्रयत्वं द्वारीकृत्य कर्त्तरि धात्वर्थस्य अन्वयः सम्भवति। अथ विभक्त्यर्थद्वारेत्यंशं परित्यज्य क्रियान्वयित्वमात्रं लक्षणमुच्यतां, तावता का हानिरित्याकाङ्क्षायामाह **स्तोकमित्यादि**। तथाहि तत्र द्वितीयाविभक्तेः पाके स्तोकशब्दार्थान्वयोपयोगी अभेदो नार्थः, द्वितीयायाः साधुत्वमात्रप्रयोजनकत्वात्, अभेदसम्बन्धेन क्रियान्वयित्वं तु स्तोकपदार्थस्य

In Public domain. Digitization Muthulakshmi Research Academy

अथ कर्त्तृलक्षणम्

क्रियानुकूलकृतिमत्त्वं कर्त्तृत्वम्, कर्त्तृपदस्य यत्नार्थकतृजन्तकृधातु-व्युत्पन्नत्वात्। अतोऽन्यत्र अचेतनादौ कर्त्तृत्वं भाक्तमिति॥

अस्त्येव इति अतिप्रसङ्गसम्भवः। सम्बन्धिनः षष्ठीप्रकृतिप्रतिपाद्यस्य मैत्रस्य तण्डुलादिरूपनामार्थान्वयित्वमेव प्रकृते, अत एव क्रियान्वयित्वदलमत्रातिप्रसङ्ग-वारणप्रयोजनकम्।

ननु गुरुविप्रेत्यादौ षष्ठ्यन्तस्य प्रतिपूर्व्वककृधात्वर्थान्वयित्वात् अतिव्याप्तिः इति तद्वारणमाह **नामाध्याहार** इत्यादिना। नामाध्याहारः रोगमित्यादिपदाध्याहारः कर्त्तव्यः, तेन रोगादिपदार्थेनैव षष्ठ्यन्तान्वयः, नतु क्रियया इति न दोषः। परे तु तत्र षष्ठ्याः कारकत्वमस्त्येव, *"प्रत्यनूपेभ्यः करोतेः कर्म्मणि षष्ठी"* ति कर्म्मण्येव षष्ठी -विधानात्, षष्ठ्या एव कर्म्मत्वार्थकत्वात्। ननु मम प्रतिभाति इत्यादौ षष्ठ्यन्तस्य निष्ठत्वरूपषष्ठीविभक्त्यर्थद्वारा प्रतिपूर्व्वकभाधात्वर्थे अन्वयेन कारकलक्षणयोगाद-तिव्याप्तिः कथं परिहरणीया इति चेदत्र निपुणाः - विभक्त्यर्थद्वारा क्रियान्वयित्व-मित्यत्र षष्ठीविभक्तिभिन्नत्वं विभक्तौ निवेश्यम्, तेन षष्ठीविभक्त्यन्तपदप्रतिपाद्य-स्थलमात्रस्यैव व्यावृत्तिरिति।

करोति स्वातन्त्र्येण क्रियां यः सः कर्त्ता, तथा च पाणिनिः *"स्वतन्त्रः कर्त्ते"*[1] ति। अथ किमिदं स्वातन्त्र्यं? न तावत् पराप्रयोज्यत्वं प्रयोज्यकर्त्तृः कर्त्तृत्वानुपपत्तेः,

---

कर्त्रीति। कर्त्तृत्वं नाम धातूपात्तव्यापाराश्रयत्वं *"धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यते"* इति हर्य्युक्तेः। स च द्विविधः, स्वतन्त्रस्तत्प्रयोजकश्चेतिभेदात्। तत्र स्वातन्त्र्यं नाम इतरव्यापारानधीनव्यापारवत्त्वं कारकान्तरप्रयोजकव्यापारवत्त्वं वा। अत्रोक्तं हरिणा - *"प्रागन्यतः शक्तिलाभात् प्राग्भावापादनादपि। तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात्। अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्। आरादप्युपकारि-त्वात् स्वातन्त्र्यं कर्त्तुरिष्यते।"*[2] इति। अस्यायमर्थः, - इतरव्यापारादावपि स्वव्यापार -सत्त्वात् कारकान्तराणां स्वाधीनप्रवृत्तिनिवृत्त्योर्दर्शनात् दात्रादेः कुठारादिवत् स्वस्य

---

1. अष्टाध्यायी 1.4.54   2. वाक्यपदीयम् - 3,7.101

In Public domain. Digitization Muthulakshmi Research Academy

अथ क्रियालक्षणम्।

धातोरर्थः क्रिया, सा च द्विधा, क्वचित् कर्त्तृस्था, क्वचित् कर्म्मस्था च।

नापि क्रियाश्रयत्वं कर्म्मस्थक्रियाधातूनां कर्म्मणि कर्त्तृत्वापत्तेः, *"कर्म्मस्थः पचतेर्भवः कर्म्मस्था च भिदेः क्रिया"* इत्यनुशासनात्। अत्राहुः प्राधान्येन धातु-वाच्यव्यापारवत्त्वं स्वतन्त्रत्वं, तदेव च कर्त्तृत्वमिति, तथा च पच्धातोः विक्लित्यनु-कूलव्यापरोऽर्थो वाच्यः, तद्वत्वञ्च कर्त्तर्य्येव, न कर्म्मणि, विक्लित्तिरूपस्य फलस्यैव कर्म्मणि वृत्तेः तदुक्तं *"धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यते। व्यापारे च प्रधानत्वात् स्वतन्त्र इति घोष्यते"।* इति। स च कर्त्ता द्विविधः स्वतन्त्रः तत्प्रयोजकश्चेति, स्वतन्त्रः 'देवदत्तो गच्छति' इत्यादौ देवदत्तादिः प्रयोजकश्च 'देवदत्तो यज्ञदत्तेन अन्नं पाचयती'त्यादौ हेतुकर्त्ता। क्रियानुकूलकृतिमत एव मुख्य-कर्त्तृत्वात् अचेतनादौ 'रथो गच्छती'त्यादौ कर्त्तृत्वं भाक्तं रथे गमनानुकूलकृतिमत्त्वा-भावात् मुख्यकर्त्तृत्वानुपपत्तेः।

अथ क्रियानुकूलकृतिमत्त्वं कर्त्तृत्वमिति कर्त्तृलक्षणघटकीभूता क्रिया का इति शिष्यजिज्ञासानन्तरं क्रियालक्षणं निरूपयितुं शिष्यावधानाय प्रतिजानीते **अथ**

प्रतिनिध्यसम्भवात् कारकान्तराप्रयोगेऽपि स्ववाचकपदप्रयोगात्, साक्षाद्धातूपात्त-फलजनकव्यापारवत्त्वाच्च कर्तुः स्वातन्त्र्यमिति। पाचयतीत्यादावपि प्रयोज्यस्य पाके स्वातन्त्र्यमस्त्येव वेतनादिलाभरूपस्वार्थसिद्धय एव तस्य प्रवृत्तेः।

क्रिया इति। एषा खलु क्रिया धातुवाच्या फलव्यापारोभयरूपा तद्विशिष्टरूपा वा, *"फलव्यापारयोर्धातुः"*[1] इत्यभिजनवचनात्।अत्र हरिणाप्युक्तं- *"व्यापारो भावना सैवोत्पादना सैव च क्रिया"*[2] इति। किञ्च *"यावत् सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते"।*[3] सिद्धं वर्त्तमानध्वंस-प्रतियोगि, भूतकालमित्यर्थः, तद्भिन्नमसिद्धं वर्त्तमानं भविष्यञ्च इत्यर्थः। तेनापचत् पक्ष्यति पचतीत्यादौ सर्वत्र साध्यत्वेन असत्त्वरूपत्वेनाभिधीयमाना क्रियेति क्रिया-शब्दस्य रूढिरनेन प्रदर्शिता इति भावः।

---

1. वै.सि.का – 2 2. वै.सि.का – 5 3. वाक्यपदीयम् 3,8.1

In Public domain. Digitization Muthulakshmi Research Academy

तत्र गमिपतिप्रभृतीनां कर्त्तृस्थैव क्रिया, तस्याः पञ्चविधकर्म्मान्यतम-रूपत्वात्। पचिभिदिप्रभृतीनां कर्मस्थैव क्रिया, क्वचिदधःसन्तापनादिरूपत्वात्, क्वचिदवयवविभागरूपत्वादिति सङ्क्षेपः।

अथ कर्म्मलक्षणम्

परसमवेतक्रियाजन्यफलशालित्वं कर्म्मत्वम्।

क्रियालक्षणमिति। कर्त्तृस्था कर्त्तृसमवायिनी, कर्म्मस्था कर्म्मसमवायिनी। गमधातोरर्थः उत्तरदेशसंयोगानुकूलव्यापारः, स च पादविहरणादिः कर्त्तृनिष्ठ एव। तथा च *"उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च।"* (कारिकावली) इत्युक्तपञ्चविधकर्म्माणि कर्त्तृगतान्येव, तदतिरिक्ता क्रिया कर्म्मस्था। कर्म्मस्थानां क्रियाणाम् उदाहरणं यथा - ओदनं पचति, काष्ठं भिनत्ति इत्यादि। अत्रेदम् अवधेयम् - यत्र कर्म्मदर्शनेन क्रियाया अवगमो भवति तत्रैव कर्म्मस्था क्रिया, कर्त्तृदर्शनेन यत्र क्रियाप्रतीतिस्तत्र कर्त्तृस्था क्रिया पूर्व्वोदाहृतेषु तथात्वमनुसन्धेयम्।

अथ क्रिया द्विविधा - कर्त्तृस्था कर्म्मस्था चेत्युक्तं, तत्र किं नाम कर्म्म इत्याकाङ्क्षायामाह- **अथ कर्म्मलक्षणमिति।** परसमवेतः कर्म्मभिन्ने समवाय-सम्बन्धेन वृत्तिमान् यः धात्वर्थः क्रिया तज्जन्यं यत्फलम् अनुकूलत्वसम्बन्धेन धात्वर्थांशे प्रकारीभूतो धर्म्मः तद्वत्वं कर्म्मत्वम्। तथा च 'ग्रामं गच्छति' इत्यादौ उत्तरदेशसंयोगानुकूलव्यापारस्य पादविहरणात्मकस्य ग्रामभिन्ने कर्त्तरि समवेतस्य जन्यं फलं संयोगः तद्वत्वं ग्रामे। यद्यपि संयोगस्य द्विष्ठतया तादृशफलवत्त्वं कर्त्तर्य्यपि, तथापि परशब्देन लक्ष्यत्वेनाभिमतप्रतियोगिकभेदवतो बोधनात्

पञ्चेति। तस्याः क्रियायाः पञ्चविधकर्मणाम् उत्क्षेपणापक्षेपणादिप्रकारभेदापन्न-स्वरूपाणाम् अन्यतमरूपत्वात् कर्मविशेषस्वरूपत्वात् कर्त्तृस्थत्वं तद्भिन्नानां कर्मस्थत्वम् इत्युच्यते।

कर्मत्वमिति। क्रियाजन्यतद्व्यधिकरणफलवत्त्वम् अथवा कर्त्रा स्वनिष्ठ-व्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणत्वं कर्मत्वमित्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

परसमवेतो यो धात्वर्थस्तज्जन्यं यत् फलं, तद्वत्त्वमित्यर्थः। परसमवेतेति विशेषणात् 'ग्रामं गच्छति' इत्यादौ संयोगरूपफलशालित्वेऽपि कर्त्तरि नातिव्याप्तिः। अत एव फलावच्छिन्नव्यापारबोधकत्वाद्धातोः सकर्म्मकत्व-व्यवहारः, गच्छतीत्यादौ तु उत्तरदेशसंयोगफलिका क्रिया गमनं धात्वर्थः। 'गां ददाति' इत्यत्र स्वस्वत्वध्वंसपूर्व्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागो दानं धात्वर्थः। तज्जन्यं फलं स्वस्वत्वध्वंसपूर्वकपरकीयस्वत्वं, तच्छालित्वात् गोः कर्मत्वम्।

जनकक्रियायाः कर्त्तृभिन्ने असमवायात् नातिव्याप्तिः। **संयोगफलिका** इति संयोग-जनिका क्रिया व्यापारात्मिका। ननु यदि लक्ष्यत्वेनाभिमतप्रतियोगिकभेदवान् परपदेन बोध्यते, तदा चैत्रश्चैत्रं गच्छति इत्यादिप्रयोगापत्तिः, चैत्रेऽपि चैत्रघटोभय-प्रतियोगिकभेदसत्त्वात्, यदि च प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिकभेदवान् तत्पदेन बोध्यः, तर्हि 'द्रव्यं गच्छति खग' इत्यादौ कर्म्मत्वानुपपत्तिः, प्रकृत्यर्थ-तावच्छेदकद्रव्यत्वावच्छिन्नप्रतियोगिकभेदस्य खगे असत्त्वात्। तदयं निष्कर्षः प्रकृत्यर्थानुयोगिकभेदप्रतियोगित्वम् एव परत्वं प्रकृते वाच्यं, समवेतत्वं च तादृश-भेदनिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकत्वमिति।

तथा च 'ग्रामं गच्छति' इत्यादौ संयोगः भेदश्च ग्रामपदोत्तरद्वितीयार्थः, तत्र च आधेयतया ग्रामस्य अन्वयः, संयोगस्य अनुकूलत्वसम्बन्धेन भेदस्य च प्रति-योगितावच्छेदकत्वसम्बन्धेन क्रियायामन्वयः, क्रियायाश्च अनुकूलत्वसम्बन्धेन तिप्रत्ययार्थे कृतौ तस्याश्च कर्त्तरि समवायेन अन्वयः, एवञ्च आधेयतया ग्राम-विशिष्टः यो भेदः प्रतियोगितावच्छेदकतासम्बन्धेन तद्विशिष्टत्वे सति आधेयतया ग्रामविशिष्टः यः संयोगः तद्विशिष्टा या क्रिया तदनुकूलकृतिमानिति अर्थः व्युत्पत्ति-वैचित्र्यबललभ्यः। पूर्व्वमेव कर्त्तृस्थत्वकर्म्मस्थत्वरूपधर्म्मद्वयभेदेन क्रियाया द्वै-विध्यमुक्तम्, कर्त्तृस्थक्रियायाः क्रियाजन्यत्वाभावात् मुख्यत्वं कर्म्मस्थक्रियायास्तु क्रियाजन्यत्वात् गौणत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

तण्डुलं पचतीत्यादावधःसन्तापनजन्यविक्लित्तिः फलं तच्छालित्वात् तण्डुलादेः कर्म्मत्वम्। अत एव यत्र क्रिया कर्त्तृगता, तत्र लक्षणं मुख्यं, यत्र कर्म्मगतक्रिया, तत्र गौणम्। एवम् ओदनं पचतीत्यादावोदनपदेन तण्डुले लक्षणा विक्लित्तिफलयोगात्। तच्च कर्म्म त्रिविधम्। प्राप्यं, निर्वर्त्त्यर्थं, विकार्य्यं चेति।

एवमित्यादि – यत्र शक्यार्थमादाय तात्पर्य्यं नोपपद्यते, तत्र लक्षणा स्वीक्रियते, तथा च नैयायिकाः, *"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तित"* इति। सा च लक्षणा, जहत्स्वार्थादिभेदेन बहुप्रकारा, तल्लक्षणं यथा शक्यावृत्ति-धर्म्मरूपेण लक्षणा जहत्स्वार्था, यथा 'गङ्गायां घोष' इत्यत्र भगीरथरथ-खातावच्छिन्नजलप्रवाहरूपे अर्थे घोषस्य वासो वक्तृतात्पर्य्यविषयः असम्भवः तत्सम्बन्धिनि तीरे लक्षणामनुकूलयति, गङ्गासम्बन्धितीरत्वञ्च शक्यार्थे गङ्गायाम् अवृत्तिः, इति जहत्स्वार्था लक्षणा। शक्यलक्ष्योभयवृत्तिधर्म्मरूपेण लक्षणा अजहत्स्वार्था, यथा 'काकेभ्यो दधि रक्ष्यतां', अत्र काकरूपशक्यार्थेभ्यः तत्सदृशेभ्योऽपरेभ्योऽपि दध्युपघातकेभ्यो दध्नो रक्षा वक्तृतात्पर्य्यविषय इति अजहत्स्वार्था। अस्या अपि लक्षितलक्षणाद्या भेदा वर्त्तन्ते तेषामुदाहरणानि यथासम्भवमूह्यानि।

तत् प्रागुक्तं त्रिविधं त्रिधा विभक्तम्। विधप्रत्ययार्थस्तु उद्देश्यतावच्छेदक-समनियतवस्तुमदन्यसङ्ख्यावत्त्वं प्रागेव प्रतिपादितम्। त्रैविध्यमेव दर्शयति प्राप्यमित्यादिना, अत्र हरिकारिका यथा – *"निर्व्वर्त्त्यञ्च विकार्य्यञ्च प्राप्यञ्चेति त्रिधा*

त्रिविधमित्यादि। अत्रोक्तं हरिणा – *"निर्वर्त्यञ्च विकार्य्यञ्च प्राप्यञ्चेति त्रिधा-मतम्। तच्चेप्सिततमं कर्म चतुर्धान्यत्तुकल्पितम्। औदासीन्येन यत्प्राप्तं यच्च कर्त्तुर -नीप्सितम्। संज्ञान्तरैरनाख्यातं यत् यच्चाप्यन्यपूर्वकम्।"*[1] इत्यादिना प्रकारभेदम् अभिधाय निर्वर्त्त्यादीनां लक्षणमुदाहरति – *"यदसज्जायते सद्वा जन्मना यत्प्रकाशते। तन्निर्वर्त्त्यं विकार्य्यञ्च कर्म द्वेधा व्यविस्थतम्। प्रकृतेस्तु प्रकृत्युच्छेदसम्भूतं*

1. वाक्यपदीयम् – 3,7.45,46

In Public domain. Digitization Muthulakshmi Research Academy

यत्र कर्म्मणो धात्वर्थजन्यफलवत्त्वं तत् प्राप्यम्। यथा गच्छति पश्यति हन्तीत्यादयः।

मतम्। तच्चेप्सिततमं कर्म्म चतुर्धान्यत्तु कल्पितम्। औदासीन्येन यत् प्राप्तं यच्च कर्त्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्व्वकम्।" [1] इत्यादि। तेषामेकैकशो लक्षणं यथा दौर्गे *"यदसज्जायते पूर्व्वं जन्मना यत् प्रकाशते। तन्निर्व्वर्त्त्यं विकार्य्यञ्च कर्म्मद्वेधा व्यवस्थितम्।। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्। किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।"* [2]

प्राप्यं यथा गोयीचन्द्रः - कर्त्तुः क्रियाव्याप्तिमात्रं, न निष्पत्तिर्नच विकृतिः तत् प्राप्यम्। क्रियागतासाधारणधर्म्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्य-फलवत्त्वेन उद्देश्यत्वमिति व्युत्पत्तिबलतः। 'ग्रामं गच्छति' इत्यादिस्थले ग्रामादेः प्राप्यकर्म्मत्वं संयोगरूपफलाश्रयत्वेन ग्रामस्य उद्देश्यत्वात्।

निर्व्वर्त्त्यकर्म्मत्वं यथा - प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्योत्पत्तिफलवत्त्वम्। तथा च 'घटं करोति' इत्यादौ घटस्य क्रिया-जन्योत्पत्तिफलवत्त्वं घटप्रकृतिभूतमृदादिवाचकपदासमभिव्याहृतत्वञ्च, अत एव निर्व्वर्त्त्यकर्म्मत्वं तस्य। अत्रैव यदि 'मृत्तिकां घटं करोति' इति प्रयोगः, तदा

किञ्चित्काष्ठादिभस्मवत्। किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृत-विशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।"[2] इति।

प्राप्यमिति। क्रियाकृतसाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलवत्त्वेनोद्देश्यत्वं प्राप्यत्वं, यथा - ग्रामं गच्छतीत्यादौ ग्रामादिः, संयोगरूपफलस्य क्रियाधिकरणवृत्तित्वेन साधारण्यात् असाधारणोत्पत्त्यादिफलस्य तत्रासत्त्वात् तथात्वम्। इति।

निर्वर्त्त्यमिति। प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्यो-त्पत्तिफलवत्त्वं निर्वर्त्त्यत्वम्। उत्पत्तिश्च आद्यक्षणसम्बन्धरूपा प्रथमप्रकाशरूपा वा,

---

1. वाक्यपदीयम् 3,7.45,46 2. वाक्यपदीयम् - 3,7.49,50,51

In Public domain. Digitization Muthulakshmi Research Academy

यत्र तु साध्यत्वेन विषयत्वरूपकर्म्मत्वं तन्निर्वर्त्यम्। यथा- 'घटङ्करोति' इत्यादयः। एवं 'घटङ्करोति' इत्यादौ सर्वत्र घटादिपदे मृत्पिण्डादौ लक्षणा, साक्षात् कृत्यादिविषयत्वानुरोधात्। एवम् इच्छति (सिञ्चति) द्वेष्टि यजति इत्यादीनाम्। यत्र तु प्रकृत्युच्छेदजनितरूपान्तरवत्त्वं तत् विकार्य्यम्।

विकार्य्यकर्म्मता। निर्व्वर्त्त्यम् उत्पाद्यमिति **पद्मनाभः**। उत्पत्तिराद्यक्षणसम्बन्धः - आद्यक्षणश्च स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वाधि-करणसमयध्वंसाधिकरणसमयः। अथवा प्रथमप्रकाश उत्पत्तिः, एतन्मते असतः उत्पत्त्यभावपक्षस्य आदृतत्वात्। तदुक्तं 'नासदुत्पद्यते न च सद् विनश्यति', उत्पत्तिविनाशयोराविर्भावतिरोभावस्वरूपत्वादिति **टीकाकारः**।

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्व्वर्त्त्यत्वं प्रचक्षते॥" [1] इति प्राचीनकारिकैकवाक्यतया प्रकृतिवाचकेत्यादि।

विकार्य्यमाह – यत्र प्रकृत्युच्छेदेन स्वरूपतो वा पूर्वरूपतो वा नाशेन रूपान्तर-मुत्पद्यते तत्र विकार्य्यकर्म्मता, तदिदं लक्षणं यथा प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्व्वाह्यविशिष्टासत्त्वोत्पत्तिरूपान्यतरफलशालित्वं विकार्य्यत्वम्।

यदसदित्याद्युक्तेः। *"सती वा विद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्त्यत्वं प्रचक्षते"*[1] इत्युक्तेः प्रकृतिवाचकेत्यादि। तथा हि 'घटं करोती'त्यादौ घटः, 'पुत्रं प्रसूते' इत्यादौ च पुत्रादिरिति।

विकार्य्यमिति। प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टा-सत्वोत्पत्तिरूपान्यतरफलवत्त्वं विकार्य्यत्वम्। यथा- 'सुवर्णं कुण्डलं करोति' इत्यादौ सुवर्णकुण्डलादिः, अत्र सुवर्णस्य पूर्वरूपासत्त्वरूपफलवत्त्वात् कुण्डलस्यो-त्पत्तिरूपफलवत्त्वाच्च तथात्वम्। हर्य्युक्तलक्षणे सुवर्णस्य किञ्चिद्गुणान्तराधानेन कुण्डलस्योत्पत्तिरित्यवधेयम्, एवं 'काष्ठं भस्म करोति' इत्यादावपि काष्ठभस्मादेः। तत्र च काष्ठस्य क्रियाजन्यविशिष्टासत्त्वप्रयोजकनाशवत्त्वात् तथात्वमिति विवेकः। हर्य्युक्तलक्षणे हि काष्ठप्रकृत्युच्छेदेन भस्मोत्पत्तिः इत्यवगम्यते।

---

1. वाक्यपदीयम् – 3,7.47

In Public domain. Digitization Muthulakshmi Research Academy

यथा– 'काष्ठं भस्म करोति', 'दुग्धं दधि करोति' 'तण्डुलानोदनं पचति', 'सुवर्णं कुण्डलं करोति'। अत्र भस्मादेः कर्म्मत्वं न काष्ठादेः, भस्मादिषु काष्ठादिसम्बन्ध्यभिन्नत्वबोधनाय भस्मादिपदसमनियतविभक्तिमत्त्वं काष्ठादेः। तथा च काष्ठसम्बन्ध्यभिन्नभस्मविषयककृत्याश्रय इति शाब्दधीः। एवमन्यत्रापि बोध्यम्।

अत्र 'काष्ठं भस्म करोति' इत्यादौ काष्ठस्य स्वरूपनाशात् विशिष्टासत्त्ववत्त्वात् भस्मनश्च स्वरूपनाशहेतुकरूपान्तरवत्त्वाल्लक्षणसमन्वयः, 'दुग्धं दधि करोति' इत्यादौ एकान्ततः स्वरूपस्य अनुच्छिन्नत्वात् पूर्व्वरूपमात्रनाशेन रूपान्तरलाभात् द्वितीयः प्रकार इति कश्चित्। मूलकारमते तु विकार्य्यकर्म्मलक्षणस्य रूपान्तरवन्मा–त्रपरत्वमिति स्थितम्।

ननु यदि काष्ठादीनां न विकार्य्यता तत्किमिति तद्वाचकशब्दोत्तरं द्वितीया जाता इत्याकाङ्क्षायां प्राह – **काष्ठादीत्यादि**।

एवम् उक्तरूपेण 'काष्ठं भस्म करोति' इति स्थानीयशाब्दधीवदित्यर्थः। अन्यत्र परोक्तेषु 'दुग्धं दधि करोति, तण्डुलान् ओदनं पचति' 'सुवर्णं कुण्डलं करोति' इति स्थलेषु इत्यर्थः। तथा च दुग्धसम्बन्ध्यभिन्नदधिविषयककृत्याश्रयः इत्यादिरेव तत्र शाब्दधीरिति।

एवमित्यादि। उक्तत्रितयमीप्सिततमं कर्त्तुः क्रियाफलेनोद्दिष्टतमत्वात्। एतद्भिन्नं चतुर्धा कल्पितं, पारिभाषिकमित्यर्थः। तानि च उदासीनद्वेधाकथितान्यपूर्वकाणि। तत्र कर्त्तुरनुद्देश्यत्वे सति क्रियाजन्यफलवत्त्वमुदासीनत्वम्। यथा – 'ग्रामं गच्छन् तृणं स्पृशति' इत्यादौ तृणादेरुद्देश्यत्वाभावेऽपि क्रियाजन्यसंयोगवत्त्वात् तथात्वम्। द्विष्टसाधनत्वे सति क्रियाजन्यफलवत्त्वं द्वेष्यत्वम्, यथा – 'अन्नं बुभुक्षमाणो विषं भुङ्क्ते' इत्यादौ विषादेः। अपरं पुनरकथितं कर्म्म, तथाहि कारकविशेषसंज्ञान्तरेणाविवक्षितत्वे सति कर्मोपकारकत्वम् अकथितत्वम्। यथा – 'गां दोग्धि पयः' त्यादौ गवादेर्दुग्धोपयोगितया अविवक्षितकारकान्तरसंज्ञकत्वेन च तथात्वम् इत्यादि विवेकतोऽवगन्तव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

किन्तु 'अजां ग्रामं नयति' इत्यादिवन्न द्विकर्म्मकत्वम्, अत्राभिन्नबोधात्। यथा अजावृत्तिकर्म्मतानुकूला या ग्रामविषयिणी प्राप्तिस्तदनुकूलकृतिमान् इत्यन्वयधीः। एवं 'गां दोग्धि पयो गोपः' इत्यादिबोधे गोसम्बन्धित्वं पयोनिष्ठं ज्ञेयम्। 'अजा ग्रामं नीयते पान्थेन' इत्यादौ पान्थवृत्तिकृतिजन्या या ग्राम-विषयिणी प्राप्तिः तज्जन्यफलशालिन्यजेत्यन्वयबुद्धिः। एवं 'दुह्यते गौः पयो गोपालकेन' इत्यादौ गोपालकवृत्तिकृतिजन्यदोहनजनितफलशालिपयोनिमित्ता गौरिति शाब्दधीः। एवं त्रिविधकर्म्मकारकमध्ये प्राप्यं कर्म्म मुख्यं, निर्वर्त्यं विकार्य्यञ्च गौणमिति सङ्क्षेपः।

अत्र केषाञ्चिन्मते *"यल्लब्धसत्ताकं वस्तु अवस्थान्तरमापद्यते तद्विकार्य्यम्"* इति विकार्य्यलक्षणात् 'काष्ठं भस्म करोति' इत्यादौ काष्ठं भस्म चेत्युभयमेव विकार्य्यलक्षणलक्ष्यं भवति। तथा च यत् लब्धसत्ताकं काष्ठादिवस्तु यत् अवस्थान्तरं भस्मादिरूपं रूपान्तरम् आपद्यते तदुभयमेव विकार्य्यम् इति। एतन्मते काष्ठपदोत्तरद्वितीयोत्पत्तौ न पर्य्यनुयोगः। यद्यपि विकार्य्यत्वं प्रकृतेरेव सम्भवतीति प्रकृतौ काष्ठादौ लक्षणसमन्वयस्तथापि अभेदविवक्षया प्रकृतिविकृत्योरुभयोरेव विकार्य्यपदार्थता इति नानुपपत्तिः।

अत्र विकार्य्यस्थले 'काशाः कटं क्रियन्ते' इति प्रयोगस्तु प्रकृत्यपेक्षया विकारस्य गौणत्वेन अनुक्तत्वमधिकृत्य, अत एव कटमित्यत्र द्वितीया। विकार्य्यकर्म्मकक्रियया दुहादीनामिव द्विकर्म्मकत्वसिद्ध्या प्रधानकर्म्मणा प्रकृतेरेव उक्तत्वव्याख्यानात्। कुलचन्द्रस्यापि मतमेतत्। अपरे तु यथा मुख्ये कर्म्मणि प्रत्ययः तथा गौणेऽपि कर्म्मणीति 'काशाः कटः क्रियन्ते' इत्येव प्रयुञ्जते। क्रियाया वचनन्तु प्रकृत्यनुगतमेव विकार्य्यकर्म्मस्थले स्वारसिकं सर्व्वेषाम्। **'प्रकृति-विकृत्योः प्रकृतिवच्च'** इति न्यायात्, यथा - एको वृक्षः पञ्च नौका भवतीत्यादौ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ करणलक्षणम्

तत्र "साधकतमं करणम्"[1] इति सूत्रम्। साधकतमञ्च कारकान्तरासहकृतत्वे सति फलहेतुत्वम्।

अथ किं करणमिति जिज्ञासायां करणलक्षणमाह – **साधकतमं करणमिति सूत्रेण**, "*साधकतमं करणमि*"[1] ति पाणिनिसूत्रम्। तमप्रत्ययेन साधकस्य प्रकृष्टत्वं विवक्ष्यते, तथा च साधकानां मध्ये यः प्रकृष्टः तत्करणम्। तथा च कौमारे त्रिलोचनः "*क्रियासिद्धौ यद्यपि बहूनि साधनानि व्याप्रियन्ते, तथापि तेषु मध्ये अनेनैतत् करोमीति कर्त्रा यत् प्रकृष्टोपकारकमन्तरङ्गं विवक्षितं तत् करणम्*"। तथाचोक्तम्, "*कारकाव्यवधानेन क्रियानिष्पत्तिकारणम्। यद्वै विवक्षितं तेषु करणन्तत् प्रकीर्त्तितम्॥*" प्रकृष्टत्वञ्च करणस्य कारकान्तराव्यवधानेन क्रियायाः साधकत्वम्। तदुक्तं – "*करणं खलु सर्व्वत्र कर्त्तृव्यापारगोचरम्। तिरोदधाति कर्त्तारं प्राधान्यं तन्निबन्धनम्॥*" इति। तच्च करणं द्विविधं बाह्यम् आभ्यन्तरञ्च, बाह्यं करणं यथा – 'परशुना छिनत्ति वृक्षम्', आभ्यन्तरं करणं यथा – 'मनसा पाटलिपुत्रं गच्छति' इत्यादि वक्ष्यमाणम्।

तत्रेति। क्रियासिद्धौ यत्प्रकृष्टोपकारकमन्तरङ्गं विवक्षितं तत्करणम्। यद् व्यापारानन्तरं फलनिष्पत्तिस्तत् प्रकृष्टम्। सूत्रे तमप्प्रत्ययेनाव्यवहितव्यापारवत्त्वरूप –प्रकर्षावबोधनात्। यथोक्तं हरिणा –

"*क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥*"[2] इत्यत्र विवक्ष्यते इत्यनेन कारकान्तराणामपि करणत्वमिति सूचितम्। तदपि उक्तं हरिणा– "*वस्तुतस्तदनिर्देश्यं न हि वस्तुव्यवस्थितम्। स्थाल्या पच्यते इत्येषः प्रयोगो दृश्यते यतः*"॥[3] इत्यत्र वस्तु करणपदार्थः। इति॥

---

1. अष्टाध्यायी 1.4.42 2. वाक्यपदीयम् 3,7.90
3. वाक्यपदीयम् 3,7.91

In Public domain. Digitization Muthulakshmi Research Academy

कारकान्तरव्यापारमनुत्पाद्य फलहेतुत्वमित्यर्थः। फलं धात्वर्थतावच्छेदकम्। 'परशुना छिनत्ति वृक्षम्' तृतीयायाः करणत्वमर्थः। एवं 'मनसा पाटलिपुत्रनगरं गच्छति' इति। अथ 'धनेन कुलं', 'विद्यया यशः', इत्यादौ तृतीयाया हेतुत्वमर्थः, क्रियान्वयित्वाभावात्। एवं [1]'धूमेन वह्निः', 'कृतकत्वेनानित्यः' इत्यादौ तृतीयार्थो हेतुता, धूमपदे धूमज्ञाने वह्निपदे च वह्निज्ञाने लक्षणा।

अथ साधकतमं करणमिति सूत्रघटकीभूतसाधकतमपदार्थमाह - **कारकेत्यादिना। कारकान्तरस्य** स्वभिन्नकारकस्य व्यापारम् **अनुत्पाद्य** अजनयित्वा फलहेतुत्वम्। केवलं फलहेतुत्वमित्युक्तौ कर्त्तुरपि फलहेतुतया करणलक्षणातिव्याप्तिः, अतो विशेषणदलम्, तथा च कर्त्तुः स्वभिन्नकरणकारकव्यपारमुत्पाद्य फलजनकत्वात् नातिव्याप्तिः। कारणं हि द्विविधं - स्वरूपसत् फलोपधायकञ्च, स्वरूपसत् कारणं हि कारणतावच्छेदकधर्म्मवन्मात्रं, फलोपधायकञ्च कारणम् अव्यवहितपूर्वत्वसम्बन्धेन फलविशिष्टं, यत्र फलोपधायकत्वरूपं कारणत्वं तत्रैव करणसंज्ञाविषयत्वं, यत्र च स्वरूपसत्त्वमात्रं तत्र न करणसज्ञाविषयत्वं किन्तु हेत्वर्थ इति सूत्रादेस्तत्र तत्र विषयता।

तत्र प्रथमतः 'परशुना छिनत्ति' इत्यादौ फलोपधायकत्वरूपं करणसंज्ञानिर्व्वाहकं हेतुत्वम् उदाहरणेन प्रतिपाद्य स्वरूपसन्मात्रस्थलमपि उदाहरति - **अथेत्यादिना। धनेन कुलम्** इत्यादि, अत्र तृतीयार्थः हेतुत्वं, तस्य च स्वनिरूपितजन्यतावत्त्वेन कुले अन्वयः, तथा च धननिष्ठजनकतानिरूपितजन्यतावत् कुलमिति बोधः। 'विद्यया यश' इत्यत्रापि पूर्ववत्।

एवमित्यादि - धूमपदं धूमज्ञानपरम्, तृतीयार्थः हेतुत्वं वह्निपदं वह्निज्ञानपरम्, तथा च धूमज्ञाननिष्ठजनकतानिरूपितजन्यताविशिष्टम् अथवा तृतीयार्थहेतुत्वस्य स्वनिरूपितजन्यताविशिष्टज्ञानविषयत्वसम्बन्धेन वह्न्यादौ अन्वयः, एवं 'कृत-

---

1. अत्र 'धूमाद् वह्निः', 'कृतकत्वादनित्यः' इत्यादौ पञ्चम्यर्थो हेतुता इति पाठान्तरम्। परन्त्वयं पाठः न व्याख्यातृसम्मतः।

In Public domain. Digitization Muthulakshmi Research Academy

अथ सम्प्रदानलक्षणम्

"कर्म्मणा यमभिप्रैति तत् सम्प्रदानम्" [1] इति सूत्रम्। अस्यार्थः- करणीभूतकर्म्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वमित्यर्थः।

कत्वेन अनित्य' इत्यत्रापि। अत्र केचित् धूमेन इत्यादौ पञ्चम्यन्तपाठं समीचीनं मन्यन्ते, तदस्माकं न मनोरमम्, करणप्रस्तावे तृतीयार्थविवेचनमेव युक्तं, न तु पञ्चम्यर्थविवेचनम् अप्रस्तुतत्वात्, कृतकत्वं कार्य्यत्वं तत् हेतूकृत्य अनित्यत्व-साधनम्।

अथ धूमपदेन धूमज्ञानस्य लक्षणया बोधे, पञ्चम्येव युज्यते *"गुणे हेता"* विति अनुशासनात्, अतः किं धूमेन वह्निरित्यादिस्थले तृतीयार्थसमन्वयार्थं तदुपन्यास इति शङ्कायां पञ्चम्या वैकल्पिकत्वात् पक्षे तृतीयोत्पत्तेरबाधितत्वात् अर्थजिज्ञासायां तन्निरूपणम्। तृप्त्यर्थकधातुयोगे करणे षष्ठ्यपि विहितेति षष्ठ्या अपि स्थलभेदेन हेतुत्वमर्थः। तथा च प्राचीनप्रयोगः – 'नाग्निस्तृप्यति काष्ठानामि'त्यादि।

अथ सम्प्रदानलक्षणमाह – **कर्म्मणेत्यादिना**। सम्यक् प्रकर्षेण दीयते यस्मै तत् सम्प्रदानम् इति व्युत्पत्त्या स्वस्वत्वपरित्यागपूर्वकपरस्वत्वापादनरूपो धात्वर्थो लभ्यते। अथ स्वस्वत्वपरित्यागपूर्वकपरस्वत्वापादनस्य ददात्यर्थत्वे कथं ब्राह्मणादेः सम्प्रदानत्वमुपपद्यते, यतः आदौ गवादेः स्वस्वत्वत्यागे जाते सति गवादौ दानकर्त्तुः पूर्वस्वामिनः औदासीन्यात् परस्वत्वापादनमशक्यमेव, स्वत्वे

सम्प्रदानत्वमिति। क्रियाजन्यफलभागित्वेनोद्देश्यत्वम् इत्यर्थः। तच्च त्रिविधम्, अनिराकर्त्तृप्रेरकमनुमन्तृ चेति। यथोक्तं हरिणा – *"अनिराकरणात् कर्त्तुः त्यागाङ्ग-कर्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्॥"* [2] इत्युक्तदानप्रयोजक-व्यापारत्रयभेदात्। तत्राद्यं देवतादि, यथा- 'नारायणाय तुलसीं ददाति', इत्यत्र कर्त्तुरनिराकरणेन प्रवृत्त्यप्रतिबन्धात्। द्वितीयं याचकादि, यथा – 'ब्राह्मणाय गां ददाति', देहि देहीत्यादिना कर्त्तुः प्रेरणात्। तृतीयन्तु गुर्वादि, यथा – 'गुरवे सर्वस्वं ददाति' प्रार्थनाव्यतिरेकेणानुमतिमात्रेण प्रेरणादिति।

---

1. अष्टाध्यायी 1.4.32 2. वाक्यपदीयम् 3,7.129

In Public domain. Digitization Muthulakshmi Research Academy

दाधातोः स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागः, अथवा उद्देश्यगतस्वामित्वसम्पादकत्यागोऽर्थः। तेन 'विप्राय गां ददाति' इत्यत्र विप्रोद्देश्यकं यत् गोवृत्तिस्वत्वं गोनिरूपितस्वामित्वं वा तज्जनको यस्त्यागः तदनुकूलकृतिमानित्यन्वयधीः।

स्थितेऽपि एकस्वत्वस्य अपरस्वत्वप्रतिबन्धकत्वात् ब्राह्मणादेः स्वत्वं दुर्घटम्। तदुक्तं – "*स्वस्वत्वे विद्यमाने तु परस्वत्वं न विद्यते। परित्यज्य च स्वस्वत्व-मौदासीन्यात् न सिध्यति॥*" इति। अत एव दोषात् स्वस्वत्वध्वंसपूर्व्व-केत्याद्यर्थमुक्त्वापि पुनरथवा पक्षं सारमञ्जरीकृतः संश्रयन्ति स्म, कर्म्मणा इत्यादि-सूत्रस्य निष्कर्षक्रमः कर्म्मणा कर्म्मकारकेण करणभूतेन यमभिप्रैति सम्बध्नाति तत् सम्प्रदानमिति।

तच्च सम्प्रदानं त्रिविधं – अनुमन्तृ, अनिराकर्त्तृ, प्रेरकमिति भेदात्, तदुक्तं "*अनुमन्त्रनिराकर्त्तृप्रेरकं त्यागकारणम्। व्याप्येनाप्तं ददातेस्तु सम्प्रदानं प्रकीर्त्तितम्॥ सम्प्रदानं तदेव स्यात् पूजानुग्रहकाम्यया। दीयमानेन संयोगात् स्वामित्वं लभते यदि॥*" अनुमन्तरि उदाहरणं यथा 'गुरवे गां ददाति' अत्र गुरुर्द्दानाय अभ्यर्थितः दीयतामिति अनुमन्यते इति तस्य अनुमन्तृत्वम्। अनिराकर्त्तृ यथा– 'सूर्य्याय अर्घ्यं ददाति' सूर्य्यो हि यद्यपि न याचते, तथापि अर्घ्यं पूजकप्रदत्तं न निराकरोति। प्रेरकं यथा – 'ब्राह्मणाय गां ददाति' ब्राह्मणो हि धनिनमुपसृत्य मह्यम् एकां गां देहीति प्रेरयति। तदयं निकृष्टार्थः – त्यागजन्यस्वत्वफलभागित्वं सम्प्रदानत्वम् इति त्यागस्तु परस्वत्वफलिका इच्छा, इदं ब्राह्मणस्य भवतु इत्याद्याकारा इच्छा त्याग-पदार्थः। मूले उद्देश्यत्वं स्वत्वनिरूपकतया तादृशेच्छाविषयत्वं, तथा च गौरियं ब्राह्मणस्य भवतु इति इच्छायां भासमानस्य षष्ठ्यर्थस्य स्वत्वस्य निरूपकतया ब्राह्मणो भासत इति ब्राह्मण उद्देश्यः। उद्देश्यगतेत्यादि – अनेन इच्छामात्रेणैव सम्प्रदानत्वनिष्पत्तिः प्राप्ता।

ननु अस्तु दानार्थकधातुयोगे सम्प्रदानत्वनिर्वाहः कथं "*देवदत्ताय रोचते मोदक*" इत्यादौ उक्तरूपत्यागाद्यर्थाभावेन चतुर्थीसम्पत्तिरित्याकाङ्क्षायां रुच्यादि-

In Public domain. Digitization Muthulakshmi Research Academy

'नारदाय रोचते कलहः' इत्यत्र चतुर्थ्याः सम्बन्धित्वमर्थः। तत्र सूत्रं "रुच्यर्थानां प्रीयमाणः"[1] इति। तथा च नारदसम्बन्धिनी या रुचिस्तद्विषयः कलह इति शाब्दधीः। 'नृपाय श्लाघते वन्दी' इत्यत्र चतुर्थ्या विषयत्वमर्थः। तत्र सूत्रम् – "श्लाघहुङ्स्थाशपां ज्ञीप्स्यमानः"[2]। ज्ञीप्स्यमानः आत्मज्ञापनेच्छाविषयीभूतः। तथा च 'नृपाय श्लाघते वन्दी' इत्यत्र नृपविषयकात्मज्ञापनेच्छावद्वन्दी कथनाश्रय इति धीः। एवं 'विप्राय शतं धारयते शूद्रः' इत्यत्र चतुर्थ्यर्थः सम्बन्धित्वम्। "धारेरुत्तमर्णः"[3] इति सूत्रम्। तथा च विप्रसम्बन्धिशतसङ्ख्याविशिष्टद्रव्यकर्म्मक–ऋणग्रहणाश्रयः शूद्र इति बोधः। 'देवदत्ताय क्रुध्यति' इत्यत्र चतुर्थ्याः कर्म्मत्वमर्थः। तत्र "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः"[4] इति सूत्रम्। तथा च देवदत्तकर्मकक्रोधाश्रय इति बोधः। क्रोधश्च परविषयकासूयाजनकव्यापारः। असूया द्वेषः। 'पुत्राय स्पृहयती'त्यत्र चतुर्थ्या ईप्सितकर्म्मत्वमर्थः। तत्र "स्पृहेरीप्सितः"[5] इति सूत्रम्। तथा च पुत्रविषयकस्पृहाश्रय इति बोधः॥

धातुयोगे सूत्रान्तरं सम्प्रदानसंज्ञाविधायकं प्रस्तौति – *"रुच्यर्थानाम् प्रीयमाण"*[1] इति। नारदाय रोचते कलह इत्यत्र सम्बन्धित्वं चतुर्थ्यर्थः, तस्य च रुचधात्वर्थे अन्वयः, तथा च नारदसम्बन्धिरुचिविषयः कलह इत्युक्त एव शाब्दबोधः। ननु *"रुच्यर्थानां धातूनां योगे यः प्रीयमाणः स सम्प्रदानम्"* इत्युक्तौ *"स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयति लोचनचकोरम्"* इत्यत्र रुच्यर्थधातुयोगे प्रीयमाणलोचनचकोरवाचकपदात् न कथं सम्प्रदाने चतुर्थी प्राप्ता, तथा च 'वदनचन्द्रमा अधरसीधुं लोचनचकोराय रोचयति' इत्येव स्यात् इति चेत् रुचिरत्र आस्वादनार्थः, ततश्च लोचनचकोरस्य आस्वादकर्त्तृत्वं विवक्षितं, रुच्यर्थानां प्रीयमाण इति सूत्रन्तु षष्ठ्याः कर्म्मणो वा बाधकमिति कलापटीकायामुक्तत्वात् नास्यात्र विषय इति। सीधवे इत्यत्र तादर्थ्ये चतुर्थीति न दोषः।

---

1. अष्टाध्यायी 1.4.33 2. अष्टाध्यायी 1.4.34 3. अष्टाध्यायी 1.4.35
4. अष्टाध्यायी 1.4.37 5. अष्टाध्यायी 1.4.36

In Public domain. Digitization Muthulakshmi Research Academy

अथापादानलक्षणम्

"ध्रुवमपायेऽपादानम्"[1] इति सूत्रम्। अपाये विभागविषये यत् ध्रुवं विभागजनकक्रियाशून्यं तदपादानकारकं भवतीत्यर्थकम्।

'नृपाय श्लाघते' इति श्लाघा च बोधविषयगुणवत्त्वप्रतिपादकशब्दप्रयोगः नृपं बोधयितुम् आत्मानं गुणवत्त्वेन रूपेण स्तौतीत्यर्थः।

विप्राय इत्यादि – ऋणतया ग्रहणं धारिधातोरर्थः, सम्बन्धित्वं चतुर्थ्यर्थः। तस्य शतपदार्थे अन्वयः, द्वितीयार्थः कर्म्मत्वं, तस्य च धारिधात्वर्थे ग्रहणे अन्वयः, ग्रहणस्य च तेप्रत्ययार्थकृतौ अनुकूलत्वसम्बन्धेन तस्याश्च कर्त्तरि शूद्रे अन्वयः, तेन विप्रसम्बन्धिशतकर्म्मक–ऋणग्रहणानुकूलकृतिमान् शूद्र इति बोधः। 'पुष्पाय स्पृहयति' इत्यत्र ईप्सितकर्म्मत्वमिति वस्तुकथनं, विषयत्वरूपं कर्म्मत्वमेवार्थः। स्पृहा इच्छामात्रं तस्याश्च विषयत्वरूपमेव कर्म्मत्वं *"ज्ञानेच्छा–कृतिद्वेषाः सविषयका"* इति नियमात्।

अथ सम्प्रदाननिरूपणानन्तरं क्रमप्राप्तस्य अपादानस्य निरूपणं प्रस्तौति – **अथेति**। अपादीयते पृथक्क्रियते यस्मात् तत् अपादानं विभागस्य अवधिभूतं वस्तु, अपपूर्व्वस्य दाधातोः अर्थः विभागः कृत्प्रत्ययस्य अपादाने विधानात् अवधित्वम् अर्थः, तथा च अपाये विभागविषये यत् ध्रुवं निश्चलं तत् अपादानम्। अत्र **दौर्गाः** *"यतोऽपैति भयमादत्ते वा तदपादानमि"*[2] ति सूत्रं ब्रुवते, तन्मतेऽपि आख्यातस्य क्रियाप्रधानतया अपैतीत्यनेन अपाय एव वाच्यः, यत इत्यनेन अवधिर्बोध्यते, दौर्गाणां 'चलमचलञ्च' इत्यादिसूत्रस्य प्रयोजनाभावेन लाघवम्, परेषान्तु 'अपसरतो मेषादपसरति मेष' इत्यादौ उभयोरेव चलत्वात् अपादानसंज्ञाप्रतिपत्तये चलमचलञ्च इति सूत्रमवश्यं वक्तव्यम्। *"ध्रुवमपाये"*[1] इत्यादिसूत्रस्याविषयत्वात् इति दौर्गा दूषयन्ति। ध्रुवमित्यस्यार्थः विभागजनकक्रियाशून्यमिति। विभागजनिका

ध्रुवमित्यादि। प्रकृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयः, ध्रुवं तच्चार्थात् अवधिरिति। अपायो विश्लेषः विभागः सम्बन्धध्वंस इति यावत्।

1.अष्टाध्यायी 1.4.24 2. कातन्त्र. चतुष्टय. 214

In Public domain. Digitization Muthulakshmi Research Academy

परकीयक्रियाजन्यविभागाश्रयत्वम् अपादानत्वमिति नैयायिकलक्षणम्। तदपादानं द्विविधं, चलमचलश्चेति।

क्रिया वृक्षात् पर्णं पततीत्यादौ पर्णगतस्पन्दनादिः, तच्छून्यं वृक्षादि अपादान-कारकम् अपादानसंज्ञकं भवति, एतदभिप्रायकमेव कलापटीकायां सुषेणवचनं *"विभागजनकीभूतस्पन्दनादिक्रियानाश्रयत्वे सति विभागाश्रयत्वम् अवधित्वम्"* इति। संयोगविभागयोर्द्विष्ठतया विभागाश्रयत्वं वृक्ष इव पर्णेऽपि अस्ति इति पर्णस्यापि अपादानत्वं प्रसक्तं, तद्वारणार्थं सत्यन्तदलं, तथा च पर्णस्य विभागा-श्रयत्ववत् विभागजनकस्पन्दनक्रियाया आश्रयत्वान्न अपादानत्वम्। सत्यन्तदल-मात्रनिवेशेन विशेष्यदलपरित्यागे उदासीने घटपटादौ तादृशस्पन्दनादिक्रियानधि-करणे अतिव्याप्तिरिति विशेष्यदलम्, विभागजनकीभूतेत्यनुपादाय स्पन्दनादि-क्रियानाश्रयत्वे सतीति सत्यन्तदलोक्तौ 'चलतो वृक्षात् पर्णं पतती'त्यादौ स्पन्दन-क्रियाश्रयस्य वृक्षस्य स्पन्दनादिक्रियाश्रयत्वेऽपि सा क्रिया न विभागजनिका इति नाव्याप्तिः, एवमन्यदप्यूह्यम्। एतदभिप्रायकमेव परकीयेत्यादि नैयायिकलक्षणमपि।

अत्र परकीयत्वं न लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिकभेदवत्प्रतियोगिकत्वं पर्णद्वयादिविभागस्थले 'पर्णात् पर्णं पतती'त्यादिप्रयोगानुपपत्तेः, किन्तु लक्ष्यप्रति-योगिकभेदवत्प्रतियोगिकत्वं तेन 'पर्णात् पर्णं पतती'त्यादौ अपादानत्वाश्रयतत्तत्पर्ण -व्यक्तिप्रतियोगिकभेदवत्पर्णान्तरव्यक्तिप्रतियोगिकक्रियाजन्यविभागाश्रयत्वमपा-दानीभूतपर्णव्यक्ताविति नानुपपत्तिः, 'वृक्षात् पर्णं पतती'त्यादौ तु न अनुपपत्ति-सम्भावनापि। दुर्गोक्तलक्षणस्यापि अयमेव निष्कर्षः। 'वृक्षात् पर्णं पतती'त्यत्र पञ्चम्यर्थः अवधित्वम् अधस्संयोगानुकूलव्यापारः धात्वर्थः, तिप्रत्ययार्थः आश्रयत्वम्। अचेतनस्थले 'रथो गच्छती'त्यादिस्थलवत् आश्रयत्वे आख्यातस्य लक्षणास्वीकारात्, पञ्चम्यर्थस्य अवधित्वस्य धात्वर्थैकदेशे अधस्संयोगनिरूप-कत्वेन, आश्रयत्वस्य तिप्रत्ययार्थस्य कर्त्तरि पर्णे अन्वयः, तथा च *"वृक्षवृत्त्य-वधितानिरूपकाधस्संयोगानुकूलव्यापाराश्रयत्वाश्रय"* इति शाब्दबोधः।

परकीयेति। विभागजनकतत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यविभागाश्रयत्वम् अपादानत्वमिति वा।

In Public domain. Digitization Muthulakshmi Research Academy

यथा 'वृक्षात् पत्रं पतती'त्यत्र वृक्षरूपमपादानमचलम्। 'धावतोऽश्वात् पतितोऽश्ववारः' इत्यत्राश्वरूपापादानं चलम्। अत्र पञ्चम्या अपादानत्वमर्थः अपादानत्वमवधित्वम्। तेन वृक्षावधिकाधःसंयोगानुकूला या क्रिया तद्वत् पत्रमिति शाब्दधीः। एवम् अश्वावधिकाधःसंयोगानुकूला या क्रिया तद्वानश्ववार इति। नन्वत्र कथमश्वस्यापादानत्वम्। पुरुषाश्वयोर्विभागं प्रति अश्वक्रियाया हेतुत्वादिति चेन्न, अश्वक्रिया नोभयोर्विभागहेतुः, किन्तु विभाग –जनकीभूतपुरुषक्रियां प्रति अश्वक्रियाया हेतुत्वात्।

अत्रेदमवधातव्यम् – एकस्य वृक्षस्य पत्रं यदि वृक्षान्तरसंयुक्तं सत् वाय्वाघातादिवशात् पतितं तदैव पञ्चमी, तदुक्तं *"काकादिभिः समानीतं वृक्षात् पर्णं पतेद् यदि। तदापादानसिद्धिः स्यात् षष्ठी स्यात् समवायिनः"* इति। समवायिस्थले तु वृक्षस्य पर्णं पततीत्येव प्रयोग इति सम्प्रदायः।

निर्दिष्टविषयादिभेदेनापि अपादानस्य त्रैविध्यमाह भर्त्तृहरिः यथा – *"निर्दिष्ट–विषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियश्चेति त्रिधापादानमिष्यते"*॥[1] इति। निर्दिष्टः शब्दतः प्रतिपन्नः विषयः तथाभूतं, यथा 'वृक्षात् पर्णं पतति' इत्यत्र पतनस्य शब्दत एव निर्देशः, उपात्तः क्रियान्तररूपेण गृहीतः विषयः यस्य तत् यथा – 'बलाहकाद् विद्योतते विद्युत्' इत्यादि, अत्र निस्सरणरूपक्रियान्तरम् उपात्तं तदपेक्षया एव बलाहकस्य अवधित्वप्रत्ययः, अपेक्षिता क्रिया यत्र तथाभूतं यथा 'कुतो भवान्' इति प्रश्नानन्तरं 'पाटलिपुत्रात्' इत्युत्तरे कृते प्रश्नोत्तरवाक्ययोः क्रियावाचकपदार्थानुसन्धानं विना नान्वयबोधः, अत एव आगमनादिक्रियायाः समनुसन्धानम् इति अपेक्षितक्रियम्, उपात्तविषयस्थले क्रियायाः मुख्यायाः

चलमिति। तत्रोक्तं हरिणा – *"अपाये यदुदासीनं चलं वा यदि वाचलम्। ध्रुवमेव तदावेशात् अपादानमितीष्यते॥"* अत्रोदासीनमवधिः। **आवेशात्** ईषत्प्रवेशात्।

वृक्षादिति। इत्यत्र काकादिभिरानीतपत्रस्य अन्यवृक्षात् पतने तद्वृक्षस्यावयवत्वाभावात् पञ्चमी। अवयवावयविभावे तु सम्बन्धविवक्षायां षष्ठ्येव।

---

1. वाक्यपदीयम् – 3,7.136

In Public domain. Digitization Muthulakshmi Research Academy

'हिमवतो गङ्गा प्रभवती'त्यादौ 'वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्ड -लस्य' इत्यादौ च पञ्चम्या अवच्छेकत्वमर्थः। तत्र "भुवः प्रभवः" [1] इति सूत्रम्। प्रभव आद्यप्रकाशः। तेन हिमवदवच्छिन्नाद्यप्रकाशोत्पत्तिमती गङ्गा। एवमन्यत्रापि बोध्यम्। 'सामग्रीतः फलं जायत' इत्यादौ पञ्चम्यर्थो हेतुता, तत्र "जनिकर्त्तुः प्रकृति" [2] रिति सूत्रम्। प्रकृतिःफलोन्मुखीभूतः कारणकलाप इति यावत्, तेन सामग्रीहेतुका या उत्पत्तिस्तत्प्रतियोगि फलमिति शाब्दधीः।

क्रियान्तरं विशेषणतया प्रतीयते अपेक्षितक्रियास्थले मुख्यापि किया न शब्दत उपास्यत इति।

चलाचलभेदेन द्विविधस्य अपादानस्य प्रत्येकं पुनर्निर्दिष्टविषयादिभेदेन त्रिधाभेदात् षड्विधत्वव्यवस्थितिरिति न द्विधा भेदमुक्त्वा पुनस्त्रिधाभेदकथनं विरुद्धवचनम्।

ननु अपायः विभागः तन्निरूपितावधिताकस्य अपादानसंज्ञा चेत् 'हिमवतो गङ्गा प्रभवति' इत्यत्र हिमवता सह गङ्गाया अपायाभावात् कथं हिमवतः अपादानत्वम्? तदेतदर्थं पुनरनुशासनान्तरमपेक्षणीयमित्याह– तत्र *"भुवः प्रभव"* [1] इति। अवच्छेदकत्वं स्वरूपसम्बन्धविशेषः। प्रभवशब्दो नोत्पत्तिमात्रार्थः *"जनिकर्त्तुः प्रकृतिः"* [2] इत्यनेनैव तत्प्रतिपाद्यसिद्धेः, अत एव प्रभवशब्दस्य अर्थविशेषं दर्शयति – **प्रभव आद्यप्रकाश** इति। गङ्गाया आद्यप्रकाशनं हिमालयाव -च्छेदेनेति, आद्यप्रकाशो गङ्गाया हिमवदवच्छिन्नः एवमन्यत्र वल्मीकाग्रादि-त्यादावपि इत्यर्थः। तथा च वल्मीकाग्रावच्छिन्नाद्यप्रकाशवदाखण्डलसम्बन्धि-धनुःखण्डमिति बोधः।

आद्यप्रकाशः प्रथमः बाह्यदेशसम्बन्धः, तथा च हिमालयावच्छिन्नप्रथम-बहिर्देशसम्बन्धाश्रयीभूता गङ्गा इति निकृष्टार्थः।

सामग्रीत इत्यादि – **सामग्रीतः** कारणकूटात्, **फलं** कार्य्यं जायते, **जनिकर्तुरि**ति जनेः उत्पत्तेः कर्त्तुः न तु जनधातोरेव कर्त्तुरिति 'प्राक् केकयीतो भरतस्ततोऽभू'

1.अष्टाध्यायी 1.4.31 2. अष्टाध्यायी 1.4.30

In Public domain. Digitization Muthulakshmi Research Academy

'अध्ययनात् परायजते छात्र' इत्यादौ पञ्चम्यर्थो विषयता, तत्र "पराजेरसोढ़:"[1] इति सूत्रम्। परापूर्वकजिधातुयोगे असोढ़: अपादानम्। असोढ़त्वमसाध्यत्वं, पराजयो निवृत्तिः। तेनाध्ययनविषयकनिवृत्तिमांश्चैत्र इति शाब्दधीः। 'शत्रून् पराजयत' इत्यत्र, पराजयः परिभवः। शक्रस्तु पराभवविषय एवातो न पञ्चमी 'कूपादन्धं वारयती'त्यत्र पञ्चम्यर्थः केवलमवधित्वम्।

दित्यादिस्थलेषु जनधातोः प्रयोगाभावेन तस्य अव्याप्तेः, तथा च सामग्रीत इत्यत्र पञ्चम्यर्थः हेतुत्वं तस्य निरूपकत्वसम्बन्धेन धात्वर्थे उत्पत्तौ तस्य च निरूपित-त्वसम्बन्धेन प्रत्ययार्थे प्रतियोगित्वे तस्य च कर्त्तरि अन्वयः, तेन सामग्री-हेतुकोत्पत्तिप्रतियोगि फलमिति बोधः।

असोढ़ इति अशक्यत्वज्ञानविषयः, तथा च प्रकृते अध्ययनम् अशक्यमिति ज्ञाने अशक्यत्वं प्रकारत्वाख्यविषयतावत् अध्ययनञ्च विशेष्यत्वाख्यविषयतावत्, प्रकृते च विशेष्यत्वाख्यविषयताया एव उपादानात् अध्ययनमेव तादृशविषय इति तद्वाचकपदात् अपादानार्थे पञ्चमी। सर्व्वत्रैवात्र असोढ़त्वम् अशक्यतया ज्ञातत्वम् बोध्यम्। ननु पराजयो यदि निवृत्तिस्तत् कथम् उपपद्यते इत्याकाङ्क्षायां केचिदाहुः, निवृत्तिरत्र न केवला अपि तु विशिष्टैव, तथाहि अशक्यत्वज्ञानपूर्व्विका निवृत्तिरेव धात्वर्थः। तेन अध्ययनात् पराजयत इत्यादौ अध्ययनधर्म्मिकाशक्यत्वज्ञान-पूर्व्वकनिवृत्तिमान् इति बोधः। निवृत्तिरपि तात्पर्य्यतः अध्ययनावधिका एव इति भाव्यम्। अथ यदि परापूर्व्वजिधातोर्य्योगे असोढः अपादानम्, तर्हि शत्रून् पराजयत इत्यादौ शत्रुपदार्थस्य न कथमपादानत्वम् इत्याकाङ्क्षायामाह – **शत्रून्** इत्यादि। तथाहि उक्तस्थले न पूर्व्वोक्तो धात्वर्थः, किन्तु अन्यथैव, अत एव तद्व्याप्यतया कर्म्मत्वम्, न असोढ़त्वज्ञानविषयतया अपादानत्वं शत्रोरसोढ़त्वाभवात्। अवसाद -विशेषानुकूलव्यापारः पराजेरर्थः इति निपुणाः, तेन अवसादरूपफलाश्रयत्वेन शत्रूणां कर्म्मत्वमुपपन्नम्। **न पञ्चमीति** अपादानत्वप्रसक्तावेव तदर्थे पञ्चमीविधानात् पञ्चमी स्यात् प्रकृते अपादानत्वमेव नास्तीति तदर्थे विहितपञ्चम्यपि न

---

1. अष्टाध्यायी 1.4.26

In Public domain. Digitization Muthulakshmi Research Academy

तत्र "वारणार्थानामीप्सितः"[1] इति सूत्रम्। कूपोऽपि पुरोगम्यदेशत्वेनेप्सितो भवत्येवं तेन कूपावधिकं यन्निवारणं तदनुकूलकृतिमानित्यन्वयधीः। अत्र कूपस्य न ध्रुवत्वं, अन्धकूपयोः संयोगविरहात्। अन्धत्वं, (गोलकाभाववत्त्वे सति) (गोलकवत्त्वे सति) चक्षुःशून्योभयगोलकतत्सामान्याभावान्यतरवत्त्वम्।

शत्रुप्रभृतिवाचकपदोत्तरम्, अपितु व्याप्यतया कर्म्मत्वात् कर्म्मविहिता द्वितीया एव इति परिष्कारः।

कूपादित्यादि - अत्र वारणम् अभावानुकूलव्यापारः अनुकूलत्वं प्रयोजकत्वं न तु जनकत्वम् अभावस्य नित्यतया तज्जनकव्यापारस्य असम्भवात्। कूपादिति पञ्चम्यर्थः आधेयत्वं, तस्य धात्वर्थैकदेशे अभावे, द्वितीयार्थः प्रतियोगित्वं तस्य निरूपकतया अभावे, व्यापारस्य कृतौ, कृतेश्च कर्त्तरि अन्वयः। अभावश्च पञ्चम्यन्तकूपादिपदसाहचर्य्येणपतनसम्बन्धेन ग्राह्यः, तथा च पतनसम्बन्धेन कूपवृत्तिः यः अन्धप्रतियोगिकोऽभावः तदनुकूलकृतिमानिति बोधः। ननु कथमेतदर्थं प्रयासान्तरं स्वीक्रियते? *"ध्रुवमपाये"*[2] इत्यादिसूत्रस्यापि समन्वयसम्भवात् इति चेन्न। विभागो हि संयुक्तयोरेव पदार्थयोः नत्वसंयुक्तयोः। तत्कूपेन अन्धस्य संयोगात् पूर्व्वमेव वारणात् संयुक्तताविरहेण विभागाभावात् न पूर्वेण सिद्धिरिति। अथ कूपादित्यादिवाक्यघटकीभूतान्यपदार्थमाह - **अन्धत्वमित्यादिना**, विद्यमानोभयगोलकस्य चक्षुरिन्द्रियासत्त्व इव गोलकसामान्यशून्यस्यापि अन्धत्वोपपत्त्यर्थम् अन्यतरनिवेशः। अत्र क्वचिद्ग्रन्थे गोलकवत्त्वे सति क्वचिच्च गोलकाभाववत्त्वे सति इति सत्यन्तदलं समुपलभ्यते। तदुभयोर्गतिश्चिन्तनीया निपुणधीभिः। **काणत्वमिति**, चक्षुर्युक्तैकगोलकमात्रवत्त्वमित्यत्र मात्रपदं चक्षुर्युक्तगोलकद्वयवतां कारणत्वनिराकरणाय, अन्यथा चक्षुर्युक्तैकगोलकमन्तरेण तादृशगोलकद्वयसत्त्वस्य अनुपपत्त्या प्रकृतलक्षणस्य दीप्तनेत्रद्वययुक्तेऽपि प्रसक्तिरिति अन्धत्वकारणत्वयोरिदं वैलक्षण्यमनुसन्धेयम्।

---

1. अष्टाध्यायी - 1.4.27 2. अष्टाध्यायी - 1.4.24

In Public domain. Digitization Muthulakshmi Research Academy

कारणत्वं, चक्षुर्युक्तैकगोलकमात्रवत्त्वम्। 'चौराद्बिभेति, व्याघ्राद्बिभेति दस्युभ्यो रक्षित' इत्यादौ पञ्चम्यर्थो हेतुता। तत्र "भीत्रार्थानां भयहेतुः" [1] इति सूत्रम्। भयार्थकत्राणार्थकधातुयोगे यो हेतुस्तदपादानं भवतीत्यर्थः। अत्र हेतोर्यदपा- दानत्वं विहितं तत्तृतीयानिवारणार्थमेव। 'उपाध्यायादन्तर्धत्ते छात्र' इत्यत्रापि पञ्चम्या हेतुत्वं तृतीयावारणार्थमेव।तत्र सूत्रम्- "अन्तर्द्धौ येनादर्शनमिच्छति"[2] इति। अन्तर्द्धिरात्मसङ्गोपनम्। तथा च उपाध्यायहेतुकं यदात्मसङ्गोपनं तद्विषयिणी येच्छा तदाश्रयश्चैत्र इति बोधः। 'उपाध्यायादधीत' इत्यत्र पञ्चम्यर्थो हेतुता। तत्र सूत्रं - "आख्यातोपयोगे" [3] नियमाद्वाक्यग्रहणे आख्यातोऽपादानं भवतीति। अत्रापादानत्वविधानं तृतीयावारणार्थम्। आख्याता वक्ता। तथा च उपाध्यायहेतुकं यन्नियमपूर्व्वकवाक्यग्रहणं तदनुकूल –कृतिमानित्यन्वयधीः।

भीत्रार्थानामित्यादि – अत्र भाविनोऽनिष्टस्य अप्रतिकार्य्यताशङ्का भयं, तच्च ज्ञानात्मकं, 'व्याघ्रात् बिभेति' इत्यादौ प्रयोज्यत्वं पञ्चम्यर्थः, तच्च भीधात्वर्थैक- देशे अनिष्टे अन्वेति, तथा च व्याघ्रप्रयोज्यभाव्यनिष्ठविषयकाप्रतिकार्य्यताशङ्कावान् कर्त्ता इति बोधः, 'उपाध्यायादन्तर्द्धत्ते' इत्यादौ स्वविषयकप्रत्यक्षविरोधिव्यापारः अन्तर्दधातेरर्थः, पञ्चम्यर्थः सम्बन्धित्वं तस्य धात्वर्थैकदेशे प्रत्यक्षे अन्वयः, तथा च उपाध्यायसम्बन्धिस्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमान् इति बोध इति कारकचक्रादौ परिष्कारः। आत्मसङ्गोपनमेव स्वविषयकप्रत्यक्षविरोधिव्यापारः। ननु यदि धात्वर्थस्तथा, तदा कथं तथाचेत्यादिबोध इत्यन्तग्रन्थसङ्गतिः? इच्छायाः धात्वादिप्रतिपाद्यत्वविरहात् वाक्यार्थबोधे अभानात् इति चेत् उक्तग्रन्थो न प्रकृतशाब्दबोधाभिप्रायकः किन्तु आदौ अन्तर्धाने इच्छा तदनन्तरम् अन्तर्धानमिति कृतलक्षणे अपेक्षणीयाया अन्तर्धानेच्छाया बोधनार्थमेव वस्तुकथनं, शाब्दबोधस्तु इच्छामविषयीकृत्यैवेति। तथैव कारकचक्रादौ शाब्दबोधप्रदर्शनात्।

---

1. अष्टाध्यायी 1.4.25 2. अष्टाध्यायी 1.4.28 3. अष्टाध्यीयी 1.4.29

In Public domain. Digitization Muthulakshmi Research Academy

अथाधिकरणलक्षणम्

तत्र पाणिनिसूत्रं "आधारोऽधिकरणम्"[1]। आधारोऽत्राश्रयः कर्त्तृ-कर्म्मान्यतरद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकत्वम् अधिकरणत्वमिति नैयायिकाः।

'उपाध्यायाद् अधीते' इति अध्ययनं हि नियमपूर्व्वकविद्याग्रहणं नियमश्च 'स्नात्वा नत्वा गुरुभिरनुज्ञातेन शिष्येण प्रवर्त्तितव्य'मित्यादिप्रतिपाद्यः उपयोग-शब्दस्यापि नियमपूर्व्वकविद्याग्रहणमर्थः, आख्याता वक्ता अध्यापयिता इत्यर्थः।

अथ कारकेषु निरुच्यमानेषु अपादानकारकनिर्णयानन्तरं कारकत्वेन अधिकरणस्यैव क्रमप्राप्तता न तु सम्बन्धस्य, सम्बन्धः कारकाद् भिन्न इति श्रवणात्, अतः क्रमप्राप्तमधिकरणं निर्णेतुं प्रतिजानीते – **अथे**त्यादिना। अथेत्यनेन सर्व्वत्र सङ्गतिः प्रदर्शिता, 'नासङ्गतं प्रयुञ्जीत' इति नियमेन निरूपयिष्यमाणपदार्थे निरूपितपदार्थनिरूपितसङ्गतिमत्त्वस्यापेक्षणात्।

अथ किमिदमधिकरणत्वम्? न तावत् धर्म्मसम्बन्धः, सम्बन्धस्य संयोगरूपस्य द्विष्ठत्वेन कुण्डे बदरमित्यादौ बदरादेरपि कुण्डाद्याधारतापत्तेः, न च कुण्डं न बदरधर्म्मः इति वाच्यं, तर्हि स्वधर्म्मसम्बन्धोऽधिकरणत्वमिति पर्य्यवसितम्, स्वधर्म्मत्वञ्च स्वाधेयत्वं, तच्च यदि स्वनिरूपिताधिकरणसम्बन्धित्वं तदा अन्योन्याश्रयः, अन्यादृशञ्च दुर्व्वचम्, इत्थं नानाविधमभिसन्धाय लक्षणदोष-परिजिहासया नैयायिकसम्मतं लक्षणमाह – **कर्त्तृकर्म्मे**त्यादिना कर्त्तृकर्म्मणोः लक्षणे प्रागुक्तेः, अन्यतरत्वञ्च भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वम्, प्रकृते तु कर्त्तृभिन्नं सत् यत् कर्म्मभिन्नं तत्प्रतियोगिकभेदवत्त्वम्, **क्रियाश्रयत्वे सति** स्वाश्रयकर्त्तृ-कर्म्मान्यतरवत्त्वसम्बन्धेन क्रियावत्त्वे सतीत्यर्थः, **तत्क्रियोपकारकत्वं** तथा च यत्र

अधिकरणत्वमिति। आध्रियन्ते क्रियाः यस्मिन्नित्याधारः। कर्त्तृकर्मव्यवहित-क्रियाश्रय इति स्पष्टम्। स एवाधिकरणम्। अत्रोक्तं हरिणा – "*कर्त्तृकर्मव्यवहिताम-साक्षात् धारयत् क्रियाम्। उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणस्मृतम्॥*"[2] इति

1. अष्टाध्यायी – 1.4.45. 2. वाक्यपदीयम् 3,7.148

In Public domain. Digitization: Muthulakshmi Research Academy

अत्रोपकारकत्वं निष्पादकत्वं तेन 'पीठे स्थित्वा गृहे स्थल्यामोदनं पचति' इत्यत्र, सप्तम्यर्थोऽधिकरणत्वम्। अत्र कर्त्तृप्रभृतीनामतिव्याप्तिवारणाय सत्यन्तम्। गेहस्य तु पाकक्रियाश्रयत्वं तदुपकारकत्वञ्च कर्त्तृद्वारा, स्थाल्याश्च ओदनरूपकर्म्मद्वारा क्रियाश्रयत्वं तदुपकारकत्वञ्चेति बोध्यम्। पीठस्य तु स्थितिक्रियापेक्षया एवेति निष्कर्षः॥

कर्त्तृस्था क्रिया तत्र स्वाश्रयकर्त्राश्रयत्वरूपपरम्परासम्बन्धेन, यत्र च कर्म्मस्था क्रिया तत्र स्वाश्रयकर्म्माश्रयत्वलक्षणपरम्परासम्बन्धेन अधिकरणलक्षणसमन्वयो बोध्यः। बहुषु स्थलेषु दृश्यते कर्म्मस्थक्रियाधातुस्थलेऽपि 'गृहे स्थाल्यामोदनं पचती'त्यादौ कर्त्राश्रयस्य कर्म्माश्रयस्य च अधिकरणत्वमिति तत् कथं पूर्व्वोक्तं न विरुध्यते इति चेत् तादृशस्थलेषु कर्त्तृस्थायाः स्थित्यादिक्रियायाः तात्पर्य्यगत्या प्रत्ययात् नानुपपत्तिः, न वा विरोधः इति निपुणाः।

अथ आध्रियन्ते क्रिया यस्मिन् इत्याधार इति व्युत्पत्त्या क्रियाश्रयमात्रस्यैव अधिकरणत्वप्रत्ययात् प्रतीतार्थमात्रं परिहाय कथं सत्यन्तदलेन लक्षणविशेषणम् इत्याकाङ्क्षायामाह – **अत्रे**त्यादि, तथा च कर्त्तृस्थक्रियाश्रयत्वेन कर्त्तुः कर्म्मस्थ-क्रियाश्रयत्वेन कर्म्मणश्च तत्र तत्र मुख्यतया एव क्रियाश्रयत्वात् परम्परया क्रियाधारत्वं न तयोः किन्तु कर्त्तृकर्म्मणोराश्रयस्यैव इति नातिप्रसङ्गः। ननु अस्तु कर्त्तृकर्म्मणोरधिकरणसंज्ञा तावतापि द्वयोः कारकयोरेकत्र प्रसक्तौ परस्यैव प्राप्तेरधिकरणकारकयोग्यविभक्तेस्ततोऽनुत्पादः सिद्ध इति चेत् तथापि लक्षणं यत् कर्त्तव्यं तदतिव्याप्त्यादिदोषरहितमेव कर्त्तव्यमिति नियमेन अतिव्याप्तिर्लक्षणदोषः

तच्च चतुर्विधं – *"सामीप्याश्लेषविषयैर्व्याप्याधारश्चतुर्विधः"* इति भेदक-सम्बन्धचातुर्विध्यात्। तत्र सामीप्यसम्बन्धेन प्रथमोदाहरणं– 'वने नदी आस्ते' इत्यादौ वनादिः सामीप्यसम्बन्धेनाधारः। द्वितीयम् एकदेशसम्बन्धेन यथा – 'कटे आस्ते' इत्यादौ कटादिः। आश्लेषाधिकरणं तृतीयं विषयतासम्बन्धेन यथा – 'मोक्षे इच्छास्ति' इत्यादौ मोक्षादिः विषयाधारः। व्याप्तिसम्बन्धेन चतुर्थं यथा – 'तैलं तिलेषु' इत्यादौ तिलादिर्व्याप्याधार इति।

In Public domain. Digitization Muthulakshmi Research Academy

स्यात् इति। 'पीठे स्थित्वा गृहे स्थाल्याम् ओदनं पचति' इत्यादौ स्थितिक्रियाया: परम्परया कर्त्तृद्वारा आश्रयत्वेन पीठस्य, गेहस्य तु विक्लित्त्यनुकूलव्यापाररूपक्रियाया कर्त्तृद्वारा आश्रयत्वेन, स्थाल्यास्तु फलीभूतविक्लित्तिरूपक्रियाया: कर्म्मद्वारा आश्रयत्वेन अधिकरणत्वमनुसन्धेयम्। तदुक्तं *"कर्त्तृकर्म्मव्यवहिताम-साक्षात् धारयत् क्रियाम्। उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्"॥*[1] इति। अधिकरणस्य क्रियोपकारकत्वञ्च कर्त्तृकर्म्मान्यतरधारणद्वारा इति भाव्यम्।

तच्च अधिकरणं त्रिविधम् औपश्लेषिकम् अभिव्यापकं वैषयिकञ्चेति। तदुक्तम् – *"औपश्लेषिको वैषयिकश्चाभिव्यापक एव च। आधारस्त्रिविधो ज्ञेय: कटाकाश-तिलादिषु॥"* इति। आधाराधेययोरन्यत्र सिद्धयो: संयोग उपश्लेष:, तत्र भव औप-श्लेषिक:, – उदाहरणं यथा कटे आस्ते चैत्र:। अत्र कटचैत्रयो: भिन्नदेशवर्त्तिनो: कादाचित्कसंयोगत: कटस्य औपश्लेषिकाधारत्वम्। आधाराधेययोस्तुल्यजन्म अपृथग्देशभागानभिव्याप्य तिष्ठतीत्यभिव्यापक:, उदाहरणं यथा 'तिलेषु तैलम् अस्ति'। अत्र आधारास्तिला:, आधेयं तैलं तयोर्युगपदेव जन्म अपृथग्देशवर्त्तितया अभिव्याप्य स्थितिश्च, अत एव तिला अभिव्यापकाधारा:। परे तु आधाराधेययो-स्तुल्यजन्मा य: शक्तिविशेष: स एव अभिव्यापकाधिकरणमिति स्वीकृत्य शक्ति-शक्तिमतोरभेदात् शक्तिमतस्तिलादे: अभिव्यापकाधारत्वं व्याचक्षते। विषयोऽनन्यत्र-भाव:, न विद्यते अन्यत्र भावो यस्मात् स विषय: यस्मादन्यत्र आधेयस्य सम्बन्धो न विद्यते, यथाहि चक्षुरादीनाम् इन्द्रियाणां रूपादिकं विहाय अन्यत्र अवर्त्तमानत्वात् चक्षुरादीनां विषया रूपादय इति तथैव दिवि इत्यादौ दिवोऽन्यत्र देवानां स्थित्यभावात् देवानां द्यौरेव विषय उच्यते। सामीपिकादिभेदेन चातुर्व्विध्यादिकमपि अधिकरणस्य केचित् स्वीकुर्व्वते, यत: गङ्गायां घोष इत्यादौ गङ्गया सह घोषस्य संयोगादेरभावात् औपश्लेषिकाद्यन्तर्गतत्वं न स्यात्, अत: अधिकभेद: स्वीकार्य इति तन्न। गङ्गापदेन गङ्गातीरबोधनात्, औपश्लेषिकाधिकर-णत्वमेव युक्तं, तयोरन्यत्र सिद्धयो: संयोगस्य अबाधात्, 'अङ्गुल्यग्रे करिशतमि'ति मतभेदात् औपचारिकस्थलेऽपि औपश्लेषिकेणैव अर्थसिद्धिरिति।

In Public domain. Digitization Muthulakshmi Research Academy

अथ समासवादः

तत्र समासत्वमखण्डोपाधिकविशेषः।

अथ कारकाणाम् अधिकरणान्तानां निरूपणानन्तरम् अवसरप्राप्तान् समासान् निरूपयितुं प्रतिजानीते – **अथे**त्यादिना, समासत्वमखण्डोपाधिविशेष इति स्वयमेव वक्ष्यते, तत् तादृशाखण्डधर्म्मवत्त्वमेव समासत्वमिति। **वादः** कथनं ज्ञानानुकूल-व्यापारः निरूपणमिति यावत्, इयमपि प्रतिज्ञा शिष्यावधानफलिका इति।

शब्दो हि द्वेधा भवति, साधुरपभ्रंशश्च, वृक्षादयः साधुशब्दाः विभक्ति-सहयोगात् प्रयोगमर्हन्ति, अपभ्रंशाश्च आधुनिका 'गाछ् माछ्' इत्यादिशब्दा न

तत्रेति। समासत्वं नाम शक्तिसम्बन्धेन समासपदत्वम् एकार्थीभावापन्नशक्ति-समुदायत्वं वा, समस्यते संश्लेष्यते एकार्थीक्रियते असौ इति व्युत्पत्तेः। द्व्यादि-पदानामेकपदतासम्पादकपदसाधुतार्थकाखण्डोपाधिविशिष्टत्वं समासत्वम् इति फलितार्थः। स च समासः षड्विधः। तथाहि – *"सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥"* (वै.सि.का-28) इति।

तत्र क्रमेणोदाहरणम्। सुपां सुपेति द्वयमपि पदं सुबन्तं यथा – 'राजपुरुषः' इति। सुपां तिङेति पूर्वपदं सुबन्तम्, उत्तरं तिङन्तं, यथा – पर्य्यभूषयत् इत्यादि। *"गतिमतोदात्तवता तिङापि समासः"* इति वार्त्तिकोक्तेः। सुपां नाम्नेति पूर्वपदसुबन्तमुत्तरं नाम, यथा – कुम्भकारः इत्यादि। *"उपपदमतिङ्"* [1] इत्युक्तविधानात् समासः, *"गतिकारकोपपदानां कृद्भिः समासवचनप्राक्सुबुत्पत्तेः"* [2] इति परिभाषया, सुबुत्पत्तेः प्रागेव नाम्ना समासः सिद्धः। अन्यथा चर्म्मकृदित्यादौ नलोपानुपपत्तेः। सुपां धातुनेति उत्तरपदं धातुमात्रं न तिङन्तम्। यथा-कटप्रूरित्यादिः, *"क्विब्वाचिप्रच्छ्ययायतस्तुकटप्रूजुश्रीणां दीर्घश्च"* इति वार्त्तिकात् समासः। तिङां तिङा यथा – पिबतखादत,पचतमृज्जत इत्यादिः। *"आख्यातमाख्यातेन क्रियासातत्ये"*, इति मयूरव्यंसकाद्यन्तर्गणीयसूत्रात्। तिङां सुबन्तेन यथा – जहिस्तम्भः, *"जहिकर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारश्चाभिदधाति"* इति मयूरव्यंसकाद्यन्तर्गणीयविधानात् समासः। अयं षड्विधः समासविभागः इति।

---

1. अष्टाध्यायी – 2.2.19 2. परिभाषेन्दुशेखरः – 75 परिभाषा

In Public domain. Digitization Muthulakshmi Research Academy

प्रयोगार्हाः। साधुशब्दो हि सार्थकः स च प्रकृतिप्रत्ययनिपातादिनानाविधं भेदम् अधितिष्ठति, नाम्नां धातूनाञ्च प्रकृतिसंज्ञा तिङादीनां प्रत्ययसंज्ञा, नञादीनामव्ययगणीयानां निपातसंज्ञा। नामरूपाः प्रकृतयो हि रूढलाक्षणिकयोगरूढयौगिकभेदेन चतुर्धा विभक्ताः, डित्थादिशब्दो रूढ्या अर्थोपस्थापक एव रूढः, गङ्गायां घोष इत्यादौ लक्षणाशक्त्या गङ्गातीरादिरूपमर्थं बोधयन् गङ्गादिशब्दो लाक्षणिकः, पङ्कजसरसिजादिशब्दा व्युत्पत्त्या रूढ्या च अर्थोपस्थापका एव योगरूढाः, पाचक –प्रभृतिशब्दाः व्युत्पत्तिमात्रपर्य्यालोचनया अर्थोपस्थापका एव यौगिका इति। स च यौगिकः समासान्तादिभेदेन बहुधा भिन्नः, तत्र समासजिज्ञसया समासनिर्व्वचनम्। स च समासः षोढ़ा भिद्यते, तदुक्तं *"सुपां सुपा तिङा नाम्ना धातूनामतिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥"*[1] सुपां सुपेत्यस्य सुबन्तयोरुभयपदयोः समासे एकः प्रकारः, एवमुत्तरत्रापि, क्रमेण उदाहरणं यथा – **राज्ञः पुरुष** इति वाक्ये उभयोः सुबन्तपदयोः षष्ठीतत्पुरुष इति, सुपां तिङा समासे एकः प्रभेदः, उदाहरणं यथा – **प्रभवतीत्यादि**। अत्र सुबन्तेन अव्ययेन उपसर्गेण प्रपदेन तिङः समासः, *"गतिमतोदात्तवता तिङापि समास"* इति वार्त्तिकोक्तेः। सुपां नाम्नेत्यस्य उदाहरणं यथा 'कुम्भकारः' इत्यादि। अत्र कुम्भम् इति सुबन्तपदेन कार इति नाम्नः समासे सुपां नाम्ना समासः। *"उपपदमतिङ्"*[2] इत्युक्ते समासः, *"गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्ते"*[3]रिति परिभाषाबलात् सुबुत्पत्तेः प्रागेव नाम्ना सह समासः सिद्धः। अन्यथा कर्म्मकृत् इत्यादौ न लोपस्य अनुपपत्तेः। सुपां धातुनेत्यस्य उदाहरणं यथा, कटप्रूरित्यादि, उत्तरपदं धातुमात्रं न तिङन्तम्, *"क्विब्विची"*त्यादिना वार्त्तिकवचनेन समासः। तिङां तिङा यथा, 'पिबतखादत' इत्यादि, *"आख्यातमाख्यातेन"* इत्यादि सूत्रेण समासः, तिङां सुबन्तेन यथा - जहिस्तम्भः इत्यादि, *"जहिकर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभिदधाति"* इति मयूरव्यंसकादि गणीयानुशासनात् समासः।

ननु केचित् कर्म्मधारयादिषट्कान्यतमत्वमिति समासलक्षणम् अभिदधति, तत् परित्यज्य कथमन्यथा वक्तुं समासत्वमखण्डोपाधिः स्वीक्रियते इत्याह – **न तु** इति।

1. वै.सि.का–28 2. अष्टाध्यायी – 2.2.19 3. परिभाषेन्दुशेखरः – 75

In Public domain. Digitization Muthulakshmi Research Academy

न तु कर्म्मधारयादिषडन्यतमत्वम् आत्माश्रयत्वात्। नैयायिकमते तु 'समासे न शक्तिर्न वा लक्षणा, वाक्यत्वात्'।

आत्माश्रयत्वादिति आत्माश्रयत्वञ्च स्वज्ञानसापेक्षज्ञानकत्वम्, आत्माश्रयः उत्पत्ति–स्थितिज्ञप्तिभेदात् त्रिधा, तद्यथा समासत्वं यदि समासत्वजन्यं स्यात् तदा समास–त्वानधिकरणक्षणाव्यवहितोत्तरं न स्यात्, द्वितीयं यथा समासत्वं यदि समासत्ववृत्ति स्यात् तदा समासत्वव्याप्यं न स्यात्, तृतीयं यथा समासत्वं यदि समासत्वज्ञान–सामग्रीजन्यं स्यात् तदा समासत्वभिन्नं स्यात् इत्यादितर्क एव आत्माश्रयस्य दूषकत्वम्। निष्कर्षस्तु समासत्वज्ञानस्य यदि समासज्ञानापेक्षणीयता तदा पूर्व्वपूर्व्व–क्रमेण समासत्वज्ञानस्य प्रयोजनीयतया समासत्वज्ञानमेव असम्भवं स्यादिति।

नैयायिकाः वाक्यशक्तिं नाङ्गीकुर्व्वन्ति, पदशक्तिमात्रेणैव परस्परमन्वयेन वाक्या–र्थावगमस्य यथायथं सम्भवात्। अत एव समासस्यापि वाक्यत्वेन शक्तिलक्षणयोः न स्वीकार इत्याह **नवेत्यादि**। **पदनिष्ठ एवेति** एवकारेण वाक्यगतत्वव्यवच्छेदः। ननु यदि शक्तिलक्षणयोः पदगतत्वमेव तदा कथं समासस्थले विशिष्टार्थबोधः, राजपुरुष इत्यादौ राजपदेन राजत्वविशिष्टः पुरुषपदेन च पुरुषत्वावच्छिन्नरूपः अर्थ उपस्थाप्यते, सम्बन्धस्य कस्यापि पदस्य अवाच्यत्वात् कथं राजसम्बन्धिपुरुषप्रतीतिरित्याकाङ्क्षायामाह – **तदर्थावगति–स्त्विति**, **क्वचिदित्यादि**। तथा च 'राजपुरुष' इत्यादौ तत्पुरुषसमासे **पूर्व्वपदे** राजपदादौ लक्षणया राजसम्बन्ध्यभिन्नः पुरुष इत्यर्थबोधः।

आत्मेति। स्वस्य सापेक्षितत्वेऽनिष्टप्रसङ्गः आत्माश्रयः। स खलु उत्पत्तिस्थितिज्ञप्तिभिस्त्रिधा। तथा हि, यदीदं समासत्वं समासत्वजन्यं स्यात् तदैतत् समासत्वानधिकरणक्षणोत्तरवर्त्ति न स्यात्। यदीदं समासत्वम् एतत्समासत्ववृत्ति स्यात् तदैतत् समासत्वव्याप्यं न स्यात् यदीदं समासत्वं समासत्वज्ञानाभिन्नं स्यात् (ज्ञानसामग्रीभिन्नं स्यात्) तर्हि एतत् समासत्वभिन्नं स्यात्। एतदवयवः आत्माश्रयः। अतः कर्म्मधारयादीनामन्यतमेऽसम्भावनेति बोध्यम्।

नवेति। नैयायिकाः वाक्ये शक्तिलक्षणे न स्वीकुर्वन्ति, तन्मते पद एव शक्तिर्लक्षणा च।

In Public domain. Digitization Muthulakshmi Research Academy

शक्तिलक्षणान्यतरसम्बन्धस्तु पदनिष्ठ एव, तदर्थावगतिस्तु क्वचित् पूर्वपदे क्वचिदुत्तरपदे क्वचिदुभयपदे वा लक्षणयेति। समासकरणञ्च पद-संस्कारार्थमेवेति ज्ञेयम्। किन्तु व्यासकालीनतत्तद्वाक्यार्थबोधानुकूलतत्तत्पदा-

---

क्वचित् अव्ययीभावे समासे कुम्भस्य समीपमित्यर्थे 'उपकुम्भमि'त्यादौ उत्तरपदे लक्षणया कुम्भसम्बन्ध्यभिन्नसमीपरूपार्थबोधः। क्वचिद् बहुव्रीहिस्थले 'आरूढ़ो वानरो यमि'त्यादि वाक्यात् समासे उभयपदलक्षणया स्वकर्म्मकारोहण-कर्त्तृवानरसम्बन्धिवृक्षबोधः। ननु समास एव कथं स्वीक्रियते विनापि समासम् अर्थबोधनस्य सुकरत्वात् इत्याकाङ्क्षायामाह **समासकरणञ्चेति**, पदानां समास-घटकानां संस्कारार्थं साधुत्वसम्पादनार्थं, तथा च 'राजपुरुष' इत्याकारकः शब्दः समासं विना स्वरूपतो नोपपन्नः, अथ च राजपुरुष इत्यादयः शिष्टप्रयोगा उपलभ्यन्ते, तेषां साधुत्वसम्पादनाय गतिरवलम्बनीया इति समास एव सा गतिरिति। यद्यपि समासान्तर्गतलिङ्गसङ्ख्ययोः कथं समस्तपदेन बोध्यत्वम्, समस्तपदे शक्तिविरहात्, तथापि प्रकरणादिवशात् तयोर्बोध इति न शक्त्य-स्वीकारेऽपि दोषः। यत्र तु लिङ्गादिप्रत्यायकं किमपि वर्त्तते, तत्र तु न प्रकरणादि-मात्रस्यापि बोधकत्वम्, अपि तु स्त्रीत्वादिबोधकस्य एव, यथा 'चित्राजरद्गुरि'-त्यादि। अत्र स्त्रियां चित्रशब्दात् परम् आप्रत्ययस्यैव लिङ्गप्रतिपादकत्वं समासा-न्तर्गतशब्दघटकस्यापि इति। 'अक्षपरि, शलाकापरि' इत्यादौ सङ्ख्यादेरपि प्रत्यायकत्वं तदुक्तं *"सङ्ख्या तु व्यञ्जकाभावादव्यक्ता प्रातरादिवत्। यत्र तु व्यञ्जकं किञ्चित्तत्र सङ्ख्या प्रकाशते॥ शलाकापरि हस्तं च पूर्व्वकायोऽर्ध्दपिप्पली॥"* इति तदेतद्विस्तरेण **शब्दशक्तिप्रकाशिकायामनुसन्धेयम्।**

समासव्यासयोः समासार्थोपस्थितिजनकत्वे अनुभवानुरोधात् समानपदार्थोप-स्थितिजनकत्वं प्रतिपादयति **किन्त्वित्यादिकमुपक्रम्य व्यासेत्यादिसमासघटकी-**भूतवाक्यदशाभावादिति व्यासकालीन इत्यस्यार्थः। तत्तद्वाक्यार्थबोधः राज्ञः पुरुष इत्यादि वाक्यार्थविषयकज्ञानम्, **तदनुकूला तत्तत्पदार्थानां** राज्ञः – प्रभृतिपदार्थानाम् **उपस्थितिः क्लृप्तशक्तिकानि तत्तत्पदानि** राजत्वावच्छिन्नाद्यर्थे शक्तानि राजपुरुष इति समासघटकीभूतानि राजादिपदानि।

In Public domain. Digitization Muthulakshmi Research Academy

र्थोपस्थितिः, क्लृप्तशक्तिकतत्तत्पदसमूहस्यैव शक्तिलक्षणान्यतरसम्बन्धेन समासकालेऽपि तत् जातीयशक्यार्थबोधानुकूलपदार्थोपस्थितिहेतुत्वं कल्प्यते लाघवात्। न तु वाक्यस्य पदत्वं, तत्पदस्यातिरिक्तापि शक्तिः कल्प्या गौरवात्। ननु नित्यसमासस्थले पङ्कजादिपदे का गतिः? तत्र समासाभावेन क्लृप्तशक्तिकपदाभावादिति चेन्न, तत्रागत्योभयोः समाधानसाम्यात्। तथा हि समुदाये शक्त्यनुरोधात् समुदायस्य पदत्वम्, अस्यावयवशक्त्यनुरोधेन पदैकदेशस्यापि पदत्वं भवद्भिः कल्पनीयम्। समानयोः "यत्रोभयोः समो दोषः परिहारोऽपि तत्सम" इति प्रवादोऽपि साधुरिति॥

ननु नित्येत्यादि – समासो हि नित्यानित्यभेदेन द्विधा, तदुक्तं *"विभक्तिमात्र-प्रक्षेपान्निजान्तर्गतनामसु। स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकौ"॥* इति। तथा च नित्यसमासस्थले यदि समासभावं परिहाय वाक्यरूपता विभक्तिप्रक्षेपेण सम्पाद्यते, तदा तादृशविजातीयार्थ एव नोपतिष्ठते, तद्यथा कृष्णसर्प इत्यादौ वैजात्यावच्छिन्नसर्पबोधः, तत्रैव कृष्णः सर्प इत्युक्तौ न तादृशवैजात्यावच्छिन्नसर्प-बोधः, अपि तु कृष्णवर्णविशिष्टसर्पमात्रप्रत्ययः इति कृष्णसर्प इत्यस्य नित्य-समासता। अनित्यसमासस्थले तु समासेऽपि यादृशार्थप्रतीतिः व्यासावस्थायां विभक्तिप्रक्षेपेऽपि तथैवार्थबोध इति। यथा राजपुरुष इत्यत्र समासस्थले राजसम्बन्धिपुरुषबोधः, राज्ञः पुरुष इत्यत्र व्यासावस्थायामपि राजसम्बन्धिपुरुष-रूपार्थबोध एवेति नित्यानित्यसमासयोः वैलक्षण्यम्। अत एव नित्यसमास्थले अवयवार्थस्य समस्तपदार्थाघटकतया कथं पूर्वोक्तनियमरक्षा इत्यभिप्रेत्य पृच्छति नन्वित्यादिना। **का गतिः** प्रकृतार्थबोधस्य क उपायः स्यादिति भावः। कथमित्याका-ङ्क्षायामाह – **तत्रेत्यादि**, तत्र नित्यसमासस्थले, व्यासाभावेन समासनिर्मुक्तावस्था-विरहेण क्लृप्तशक्तिकपदाभावात्, तथाहि- यदि अत्र व्यासावस्था स्यात् तदैव व्यासकालीनार्थोपस्थितिसाम्येन समासघटकानां पदानाम् अर्थोपस्थापकता निर्व्वाचयितुं शक्या स्यात्, किन्तु अत्र न तथा।

In Public domain. Digitization Muthulakshmi Research Academy

अथ कर्म्मधारयलक्षणम्

द्विगुभिन्नत्वे सति समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकत्वं कर्म्मधारयत्वम्। तेन नीलोत्पलमित्यत्र नीलपदेन नीलगुणविशिष्टं वस्तु,

---

तत्र **अगत्येत्यादि – उभयो:** नित्यानित्यसमासवतो: समाधानस्य **साम्यात्** तौल्यात्। तथाहि– अनित्यसमासस्थले यथा अवयवशक्त्या अर्थबोध: तथा नित्य –समासस्थलेऽपि तत्तदर्थे तत्तत्पदस्यैव शक्तिकल्पनात् अर्थबोध: नित्यसमासस्थले समुदायस्यैव शक्तिमत्त्वात्, तदेवाह – **तथाहीत्यादिना, समुदाये** पङ्कजेत्यादि समस्तपदे **शक्त्यनुरोधात्** शक्तिकल्पनात्। **पदैकदेशस्य** इत्यादि, तथा च यदि अनित्यसमासस्थले भवतापि पदैकदेशस्य पदत्वं स्वीकर्त्तुं शक्यते तदा नित्यसमासस्थले कथं समुदाये शक्ति: कल्पयितुं न शक्यतामिति।

एष: समाससामान्यलक्षणविचार:, अत: परं भेदेन कर्म्मधारयादिसमासा: प्रति –पादनीया:, तत्र प्रथमत: समासलक्षणप्रस्तावे निराकृतेन पक्षेण स्मारितस्य कर्म्मधारयस्य लक्षणमेव प्राक् निर्व्वचनीयमिति तदुपक्रम: परस्ताद् भविष्यति।

अथ कर्म्मधारयलक्षणमाह **द्विग्वित्यादि,** समानाधिकरणपदघटितत्वं द्विगु-समासे कर्म्मधारये च, **अत एव** समानेत्यादि मात्रस्य लक्षणत्वे द्विगुसमासे अति-व्याप्तिरिति द्विगुभिन्नत्वे सतीति दलम्। द्विगुभिन्नत्वे सति समानविभक्तिमत्पद-प्रकृतिकत्वं द्वन्द्वसमासेऽपि, अतः घटश्च पटश्च मठश्च ते घटपटमठा इत्यादि द्वन्द्व –समासे अतिव्याप्तिवारणाय अभेदबोधकत्वदलम्। द्वन्द्वस्थले समासस्य अभेद-बोधकत्वाभावान्नातिव्याप्ति:।

द्विगुभिन्नेत्यादि। द्विगुविषयपरिहारेण समानाधिकरणपदघटिततत्पुरुषः कर्म्मधारय:, *"तत्पुरुष: समानाधिकरण: कर्म्मधारय:"* [1] इति सूत्रात्। तत्राप्यपवादविधेर्बलवत्वात् *"विशेषणं विशेष्येण"* [2] इति विधिर्बलीयान्। एवं किल कर्म्मधारय:। सुतरां तत्र समानविभक्तिमत्पदकदम्बकत्वम् अभेदबोधकत्वञ्चेति। उत्तरपदप्रधानोऽयं समास:।

---

1. अष्टाध्यायी 1.2.42 2. अष्टाध्यायी 2.1.57

In Public domain. Digitization Muthulakshmi Research Academy

उत्पलपदेन उत्पलसामान्यमुपस्थाप्यते अभेदाख्यसंसर्गद्वारा नीलाभिन्नमुत्पलम् इति शाब्दधीः। नामार्थयोरभेदान्वयबोधं प्रति विरुद्धविभक्तिराहित्यस्य कारणत्वम्। एवं कर्म्मधारये न वा शक्तिर्न वा लक्षणेति प्रसिद्धिः। अत एव 'निषादस्थपतिं याजयेत्' इत्यत्र न षष्ठीतत्पुरुषः, न वा बहुव्रीहिः, पूर्वपदे परपदे वा लक्षणापत्तेः। तथाचात्र कर्म्मधारयसमासान्निषादाभिन्नस्थपतियाजनम् इति बोधः। न च निषादस्य सङ्करजातिविशेषत्वात् वेदानधिकारात् याजना-सम्भव इति वाच्यम्, अपूर्वविद्याप्रयुक्तेस्तत्र कल्प्यत्वात्। विद्याप्रयुक्तिस्तु निषिद्धकर्म्मकमन्त्रपाठ इति।

अभेदाख्यसंसर्गद्वारेति – अपदार्थस्य संसर्गतया शाब्दे भाननियमात् अपदार्थस्य अभेदस्य संसर्गतया एव भानमिति। ननु यथा नीलमुत्पलमित्यादौ नीलाभिन्नमुत्पलं बुध्यते तथा भिन्नविभक्तिस्थलेऽपि न कथम् अभेदः प्रतीयताम् इत्याकाङ्क्षायामाह – **विरुद्धविभक्तिराहित्यस्य** विजातीयविभक्तिशून्यत्वस्य अभेदा-न्वयबोधं प्रति कारणत्वम् अत एव भिन्नविभक्तिकस्थले विरुद्धविभक्तिराहित्या-भावात् न तादृशाभेदान्वयधीरिति। प्रकृते विरुद्धत्वं स्वसजातीयत्वाभाववत्त्वम्। साजात्यञ्च स्ववृत्तिसुब्विभाजकप्रथमात्वादिरूपेण न तु स्ववृत्तिसुप्त्वादिरूपेण, अत एव 'वेदाः प्रमाणं, स्मृतयः प्रमाण' मित्यादौ विरुद्धविभक्तिराहित्यस्य अक्षत-तया अभेदबोधकत्वमव्याहतम्, अन्यथा वेदा इत्यत्र बहुवचनस्य प्रमाणमित्येक-वचनस्य च परस्परं वैजात्येन विरुद्धविभक्तिराहित्यं न स्यात्।

असमानेत्यादिना तत्पुरुषलक्षणं क्रमपरिप्राप्ततया वक्ति। तथा च कर्म्मधारयेण सह समासघटकीभूतपदानां समानविभक्तिमत्त्वम् असमानविभक्तिमत्त्वञ्च आदाय वैलक्षण्यम्, अभेदबोधांशे तु साम्यमेव उभयोः, तद्यथा – 'राजपुरुष' इत्यत्र पूर्व्वपदे लक्षणया राजसम्बन्धिरूपार्थः प्रतीयते तस्य अभेदेन पुरुषे अन्वयात् राजसम्बन्ध्यभिन्नः पुरुषः इत्येव शाब्दबोधः।

निषादेत्यादि। तत्पुरुषे पूर्वपदे बहुव्रीहौ तूत्तरपदे लक्षणया अर्थप्रतीतिः। द्वन्द्वे च लक्षणामन्तरेणैव शक्यार्थेन तात्पर्य्योपपत्तौ लक्षणाकल्पनेनाप्यलमिति।

In Public domain. Digitization Muthulakshmi Research Academy

अथ तत्पुरुषलक्षणम्

असमानविभक्तिमत्प्रतिपदप्रकृतिकत्वे सत्यभेदबोधकपदत्वं तत्पुरुषत्वम्। राजपुरुष इत्यत्र पूर्वपदे लक्षणया राजसम्बन्धित्वमवगम्यते, तेन राज-सम्बन्ध्यभिन्नः पुरुष इत्यर्थः। नामार्थद्वयाभेदबोधं प्रति, विरुद्धविभक्तेरभावस्य तन्त्रत्वात्। अन्यथा पुरुषपदार्थे राजपदार्थस्य साक्षादन्वयो न स्यात्, निपातातिरिक्तनामार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वात्। तथा च तादृशबोधं प्रति द्वारीभूतविभक्तिरपेक्षणीयेति बोध्यम्। न च राजपुरुष इत्यत्र पुरुषपदे राज-सम्बन्धिनि लक्षणा, राजपदन्तु तात्पर्य्यग्राहकमिति वाच्यम्, उत्तरपदार्थ-प्रधानस्तत्पुरुष इति व्युत्पत्तेर्विरोधात्, पूर्वपदस्य च निरर्थकत्वात्।

अत एव 'चन्द्र इव मुखम्' इत्यत्र इवार्थान्वयबोधे चन्द्रपदोत्तरषष्ठी नापेक्ष्यते, प्रथमा च साधुत्वार्था। न च 'दधि पश्यति' इतिवल्लुप्तविभक्तेरनु-सन्धानेन तादृशबोधः सुलभ इति वाच्यम्। तदनभिज्ञस्य तादृशबोधानुदया-पत्तेः। 'राज्ञः पुरुष' इत्यत्र राजपदोत्तरषष्ठ्या राजसम्बन्धस्य पुरुषपदेन च पुरुषस्याश्रयत्वसंसर्गेणोपस्थितिः। राजसम्बन्धाश्रयः पुरुष इति शाब्दधीः।

अत्र विभक्तिं द्वारीकृत्यैव तादृशार्थबोधः, न तु विभक्त्यर्थमद्वारीकृत्य, नामार्थयोः साक्षात् भेदान्वयस्य अव्युत्पत्तेः। **उत्तरपदार्थप्रधान** इति, तथा च उत्तरपदार्थस्य कर्म्मधारये अर्थानवबोधकत्वं विशेष्यतया ज्ञानं, यदि अत्र पुरुषपदे लक्षणा स्यात्, तदा पुरुषपदार्थस्य गौणतया अप्राधान्यात् पूर्व्वपदस्य राजादिपदस्य निरर्थकत्वं, नामार्थयोरभेदान्वये उभयोर्वाचकपदयोः समानविभक्तिमत्त्वमपेक्षितम्। ननु यदि षष्ठीतत्पुरुषस्थले परपदे लक्षणया राजसम्बन्ध्यभिन्नरूपः पुरुषः प्रतीयते तदा राजपदस्य स्वीयार्थमात्रमुद्दिश्य प्रकृतेः केवलतात्पर्य्यापर्य्यालोचनया एव समाधेयम्।

तत्पुरुषत्वमिति। प्राधान्येनोत्तरपदार्थबोधकत्वञ्चेति। इह खलु पूर्वपदस्य लक्षणया उत्तरपदार्थावगमनसौकर्य्यम्। अर्द्धकायादेस्तथात्वाभावेऽपि *"अर्द्धं नपुंसकम्"* (अ.2.2.2) इत्यादि विशेषविधानेन तत्प्रकरणविहितत्वादेव तत्पुरुषत्वम्।

In Public domain. Digitization Mahalakshmi Research Academy

अथ द्विगुलक्षणम्

समानविभक्तिमत्पदप्रकृतिकत्वे सत्यभेदबोधकसङ्ख्यापूर्वपदत्वं द्विगुत्वम्। यथा पञ्चपुलीत्यादि। पञ्चानां पुलानां समाहार इति व्युत्पत्तेः, पुलपञ्चकस्य समाहार इति बोधः। समाहारोऽपेक्षाबुद्धिविषयत्वं तेन पुलपदेन लक्षणया पञ्चपुलसमाहारो बोध्यते। पञ्चपदञ्च तात्पर्य्यग्राहकमिति बोधः।

अथ द्विगुलक्षणमाह – **समानेत्यादि।** कर्म्मधारयेण द्विगुसमासस्य सङ्ख्यापूर्व्वपदत्वरूपमेव वैलक्षण्यमिति प्रागेवोक्तम्। अत्रापि तदनुसारि एव लक्षणमिति। अथ कर्म्मधारयसमासनिष्पन्नपञ्चाम्रादिपदे द्विगुलक्षणातिव्याप्तिः, तस्यापि सङ्ख्या-पूर्व्वपदत्वादिति, तद्वारणाय संज्ञानवबोधकत्वे सतीति विशेषणं देयं, तथा च पञ्चाम्रादिशब्दानां पारिभाषिकार्थबोधकरूपसंज्ञाशब्दत्वात् न संज्ञानवबोधकत्वम् इति नातिप्रसङ्गः। विशेष्यांशे तत्पुरुषत्वमपि निवेशनीयम्, अन्यथा 'द्विमूर्द्धा, त्रिमूर्द्धा' इत्यादौ बहुव्रीहावपि द्विगुलक्षणातिप्रसक्तेरिति तन्निवेशे च बहुव्रीहेस्तत्पुरुष-त्वाभावात् न दोषः। कर्म्मधारयस्यापि *"तत्पुरुषावुभौ"* इति नियमेन तत्पुरुषत्वात् न तन्मात्रेण वारणमिति पञ्चाम्रादिशब्दवारणाय गत्यन्तराश्रयणम्।

पञ्चपुलीत्यादि – पञ्चानां पुलानां समाहार इति समाहारार्थे द्विगुः, तथाहि द्विगुरयं त्रिषु प्रवर्तते, तदुक्तं कौमारे – *"तद्धितार्थोत्तरपदसमाहारेषु संज्ञेयमि"* (कातन्त्र. चतुष्टय. 264) ति। तद्धितार्थे इति समासगतसप्तमीयम् अर्थवशात् द्वेधा भिद्यते – तद्धितार्थे अभिधेये, तद्धितार्थे विषयभूते च, यत्र तद्धितार्थे अभिधेये द्विगुसमासः तत्र समासेनैव तद्धितार्थस्य उक्तत्वात् न तद्धितप्रत्ययः, यथा पञ्चसु कपालेषु संस्कृत ओदन इति वाक्ये पञ्चकपाल ओदन

द्विगुत्वमिति। संज्ञानवबोधकसङ्ख्यापूर्वकसमानाधिकरणपदघटिततत्पुरुषत्वं द्विगुत्वमिति। *"दिक्सङ्ख्ये संज्ञायाम्"* (अ 2.1.50) इति सूत्रेण विहितपञ्चाम्रादि कर्म्मधारयादिषु अतिप्रसङ्गवारणाय संज्ञानवबोधकेति। *"सङ्ख्यापूर्वो-द्विगुः" (अ.2.1.52)* इति सूत्रात् सङ्ख्यापूर्वकेति द्विमूर्द्धादौ तथात्ववारणाय तत्पुरुषेति।

In Public domain. Digitization Muthulakshmi Research Academy

अथ बहुव्रीहिलक्षणम्

नञ्तत्पुरुषभिन्नत्वे सति लाक्षणिकोत्तरपदत्वं बहुव्रीहित्वम्।

इति संस्कृतार्थस्य समासेन उक्तत्वात् न तद्धितम्। यत्र तु तद्धितार्थे विषयभूते समासः तत्र समासेन तद्धितार्थस्य अनुक्तत्वात् न तद्धितप्रत्ययाभावः, अपि तु समासानन्तरम् अपि तद्धितम्, यथा – पञ्चानां गर्गाणां भूतपूर्वो गर्गः पञ्चगर्गरूप्यः, पञ्चसु ब्राह्मणेषु साधुः पञ्चब्राह्मण्य इत्यादि। उक्तस्थले समासेन तत्तदर्थस्य वचनयोग्यतायामपि न उक्तिः परं तद्धितार्थविषये एव समासः परतश्च तद्धितप्रत्ययः।

उत्तरपदे उदाहरणं यथा – पञ्च गावो धनमस्य पञ्चगवधनः, समाहारे तु पञ्चपुलीत्यादि।

ननु 'पञ्चपुलीमानय' इत्यादौ समाहारस्य अपेक्षाबुद्धिविशेषविषयत्वरूपत्वात् कथं क्रियया सह कर्म्मतासम्बन्धेन अन्वयः, उक्तसमाहारस्य आनयने बाधात् इति चेन्न। यद्यपि समाहारार्थे विहितेन द्विगुना प्राधान्यतः तादृशविषयत्वमेव प्रतिपाद्यते, तथापि क्रियान्वयः समाह्रियमाणपदार्थैरेव भविष्यति इति अनुभवानुरोधात् कल्प्यते। समाहारे विहितस्य द्विगोर्नदादित्वस्वीकारात् पञ्चपुलीत्यादि ईप्प्रत्ययः, तदुक्तं कौमारे– *"अपात्रादिरदन्तोऽयं स्त्र्यादन्तो वा द्विगुस्तथा। अनन्तश्च समाहारो नदादिषु निगद्यते"।* [1] इति पात्रादीनान्तु अदन्तानां समाहारे द्विगावपि नदादि-त्वनिषेधात् द्विपात्रं त्रिभुवनमित्यादिसिद्धिः। ननु समाहारो हि अपेक्षाबुद्धिविशेष-विषयत्वं बहूनामेव न तु एकस्य तत् कथं एकपुलीति समाहारः इति चेत्, तत्र असतोऽपि समाहारस्य आरोपात् पदसाधुत्वमिति अवगन्तव्यम्।

अथ द्विगुलक्षणानन्तरम् अन्यपदार्थप्रधानबहुव्रीहिलक्षणमाह – **नञ्तत्पुरुष** इत्यादिना। नञ्तत्पुरुषनिष्पन्ने अब्राह्मण इत्यादावपि उत्तरपदे ब्राह्मणशब्दादौ

बहुव्रीहित्वमिति। समस्यमानपदातिरिक्तपदार्थबोधकत्वञ्चेति। स च द्विविधः। तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानश्च। समुदायोपस्थाप्ये गुणीभूतस्यापि पदार्थस्य

---

1. कातन्त्रदुर्गावृत्तिः– सू. चतुष्टय. 275

In Public domain. Digitization Muthulakshmi Research Academy

चित्रगुः इत्यत्र गोपदं गोस्वामिनि लाक्षणिकं, चित्रपदञ्च चित्ररूपविशिष्टगवि लाक्षणिकम्। तत्र चित्रपदार्थस्यापरपदार्थैकदेशे गवि अभेदान्वयस्तेन चित्राभिन्नगोस्वामीति वाक्यार्थबोधः। अथवा गोपदं गोस्वामिनि लाक्षणिकं, चित्रपदञ्च तात्पर्य्यग्राहकमिति बोधः।

तत्सदृशे लक्षणया अर्थप्रतीतेस्तस्यापि उत्तरपदलाक्षणिकत्वात् बहुव्रीहिलक्षणाति-व्याप्तिवारणाय सत्यन्तदलमिति स्वयमेव प्रतिपादयिष्यति, नञ्तत्पुरुषभिन्नत्वं कर्म्मधारयादौ समासान्तरे अतिव्याप्तमिति लाक्षणिकोत्तरपदत्वमिति विशेष्यदलेन तन्निरासः, तथा च कर्म्मधारयादेः पूर्व्वपदादौ लक्षणया लाक्षणिकोत्तरपदत्वाभावात् नातिव्याप्तिरिति।

स चायं बहुव्रीहिर्द्विविधः – तद्गुणसंविज्ञानातद्गुणसंविज्ञानभेदात्, यो बहुव्रीहिः स्वार्थस्य स्वार्थघटकपदार्थस्य क्रियादौ अन्वयानुकूलः स तद्गुणसंविज्ञानः, स्वघटकपदार्थस्य क्रियादौ अन्वये अननुकूलश्च अतद्गुणसंविज्ञान इति। तथा च जगदीशः – *'यो बहुव्रीहिः स्वार्थस्य अन्वयिनि स्वार्थघटकस्यापि अर्थस्य अन्वयबोधने समर्थः, स तयोस्तद्गुणसंविज्ञानः इत्यादि'* प्राह। उदाहरणं यथा तद्गुणसंविज्ञानस्य – दीर्घग्रीवं पश्य, दीर्घकेशमानय इत्यादि। एषु दर्शनादेः ग्रीवा-विशिष्टेन ग्रीवया च अन्वय आनुभविकः ग्रीवामन्तरेण विशिष्टव्यक्तेर्दर्शनादेर-सम्भवात् तथात्वम्। अतद्गुणसंविज्ञानस्य उदाहरणं यथा – **दृष्टसागरमानय** इत्यादि। अत्र सागरादेरानयनक्रियायामन्वयः सुतरामसम्भव एव, किन्तु केवलं स्वार्थस्य एव अन्वयः, तदुक्तं प्राचीनैः – *"तद्गुणोऽतद्गुणश्चैव बहुव्रीहिर्द्विधा मतः। प्रथमे लम्बकर्णादिर्द्वितीये दृष्टसागरः॥"* इति

समुदायान्विते अन्वयबोधकः तद्गुणबहुव्रीहिः, यथा 'लम्बकर्णमानय' इत्यादौ कर्णस्याप्यानयनेऽन्वयः, तद्विना धर्म्मिणोऽप्यानयनासम्भवात्। सम्भवे वा तद्वैशि-ष्ट्येनैवानयनान्वयात् तस्यानयनेऽन्वयः। तद्भिन्नः अतद्गुणः। तथाहि – 'दृष्ट-समुद्रमानय' इत्यादौ समुद्रस्यानयनानन्वयात् तथात्वमिति। किञ्च समानाधिकरण-पदघटितः, व्यधिकरणपदघटितश्चेति पुनर्द्विविधः, तत्र समानाधिकरणबहुव्रीहिर्यथा – 'नीलाम्बरादिः', व्यधिकरणसमासे तु 'दण्डपाणिः' इत्यादि।

In Public domain. Digitization Muthulakshmi Research Academy

तेन "पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन" इति व्युत्पत्तेर्न भङ्गः। ननु चित्रगुरित्यादौ विनिगमनाविरहात्[1] उभयपदे च लक्षणा कथं नोच्यते इति चेन्न, शक्तपदसमभिव्याहारं विना लाक्षणिकपदस्यानुभविकत्वाभावात्। न च पूर्वपद एव लक्षणेति वाच्यम्, उत्तरपदार्थस्य लाक्षणिकेऽर्थे साक्षादन्वयाभावात्। न च समासोत्तरपदं तात्पर्यग्राहकमिति वाच्यं, पूर्वपदस्य गवोपस्थापकत्वाभावात्। नञ्तत्पुरुषस्थले तु 'अब्राह्मण' इत्यादौ ब्राह्मणपदस्य तत् सदृशे लक्षणा, नञ् पदन्तु तात्पर्य्यग्राहकमित्यत उक्तं नञ्तत्पुरुषभिन्नत्वे सति इति विशेषणमिति।

स चायं बहुव्रीहिः पुनः समानाधिकरणव्यधिकरणभेदेन द्विविधः, यद् बहुव्रीहि-घटकपदानां परस्परं समानविभक्तिमत्तया विशेष्यविशेषणभावप्रत्यायकता सः समानाधिकरणबहुव्रीहिः, यद् बहुव्रीहिघटकपदानां विग्रहे परस्परं विभिन्नविभक्ति-मत्तया विशेष्यविशेषणभावप्रत्यायकता स व्यधिकरणबहुव्रीहिः। आद्योदाहरणं यथा - दीर्घा ग्रीवा यस्य स दीर्घग्रीव इति। **अत्र** समासघटकीभूतपदयोः विग्रहदशायां समानविभक्तिमत्तया विशेष्यविशेषणभावप्रतीतिरिति। द्वितीयोदाहरणं यथा - **शूलपाणिरित्यादि** अत्र यद्यपि *"विशेष्यस्य विशेषेण मिलितं युक्तमुच्यते"*[2] *"नाम्नां समासो युक्तार्थः"*[3] इति च नियमेन शूलं पाणौ यस्य इति वाक्यार्थपर्य्यालोचनया भिन्नविभक्तिमत्त्वस्थलेऽपि विशेष्यविशेषणभावो वर्त्तते समासघटकीभूतपदार्थानां, तथापि वाक्यघटकविशेषणविशेष्ययोः समानविभक्तित्वविरहेण न समानाधिकरण-बहुव्रीहित्वम् अपि तु विसदृशविभक्तिकतया व्यधिकरणबहुव्रीहित्वमेव।

चित्रगुरित्यत्रेति चित्रा गौः यस्य इति वाक्यम्। **गोपदमिति** इदन्तु एतत्समासस्य उत्तरपदलाक्षणिकत्वप्रदर्शनाय।

अथवेति पक्षस्तु *"पदार्थः पदार्थेनान्वेति"* इत्याद्युक्त्या सबीजः परकल्पे चित्र-पदार्थस्य पदार्थैकदेशे गवि अन्वयाभावात्।

---

1. एकतरपक्षपातिनी युक्तिः विनिगमना तदभावेन इत्यर्थः।
2. दुर्गवृत्तिः - कातन्त्र. चतुष्टय. सू. 259 3. कातन्त्र. चतुष्टय. 259

In Public domain. Digitization Muthulakshmi Research Academy

नञ्तत्पुरुषस्थले तु इत्यादि – नञः सादृश्यादयः षडर्थाः, प्रकृते सादृश्यार्थ एव विवक्षितः। तदुक्तं – *"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"* इति। अत्र उदाहरणानि सादृश्ये यथा – अब्राह्मण इति। अभावे घटस्य अभाव इत्यर्थे – अघटम्। तदन्यत्वं भेदः अन्योन्याभावः, तदुदाहरणं यथा – घटो न पटः, अत्र पटे घटत्वावच्छिन्न-प्रतियोगिताकभेदप्रतीतिः। तदल्पत्वे यथा– 'अनुदरा कन्या', अत्र उदरस्य न अभावः किन्तु अल्पत्वमेव क्षीणोदरा इति तदर्थः। 'यो न वीरः स न पुमान्' इत्यादौ द्वितीयनञः अप्राशस्त्यम्। असुखमित्यादौ विरोध इति। नञो विशेषविवृतिः स्वयमेव इतःपरं करिष्यते।

केचित् 'अब्राह्मण' इत्यादौ कर्म्मधारयं स्वीकुर्व्वते, ब्राह्मणसदृशक्षत्रियादि-वाचकत्वात् नञश्च तद्भिन्नवाचित्वात्, तन्न, नञः प्रकृते सादृश्यमर्थः, सादृश्यञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वं, तेन तदन्तर्गतभेदांशे प्रतियोगित्वसम्बन्धेन ब्राह्मणपदार्थान्वयात् भेदस्य च अनुयोगिनि क्षत्रियादौ अनुयोगितया अन्वयात् ब्राह्मणपदार्थेन तुल्याधिकरणत्वाभावात् न तथात्वम्, अपितु तत्पुरुष एव इति।

द्विपदवत् त्रिचतुरादिभिरपि बहुव्रीहिर्भवति, बहुपदे बहुव्रीहिरेवेति नियमात्, अन्यथा यदि समानाधिकरणबहुपदघटितसमासस्थले आदौ कर्म्मधारयसमासेन बहुव्रीहिः द्वाभ्यां पदाभ्यां क्रियते तदा चित्राजरद्गुरित्यादौ पूर्व्वपदस्य पुंवद्भावापत्त्या अनिष्टापत्तिः स्यात्, जरतीशब्दस्य कर्म्मधारयसमासे उत्तरपदतया तस्मिन् परतः पुंवद्भावस्य अनुशासनसत्त्वात्। एकस्य बहुव्रीहेः स्वीकारे तु जरतीशब्दो न समासे उत्तरपदं किन्तु गोपदमेवेति पुवंद्भावविधिर्नास्ति, पुंवद्भावविधौ समासान्त्यपदस्य एव उत्तरपदत्वव्याख्यानात्।

अथ द्वन्द्वलक्षणमाह – **पदेत्यादि**। *"चार्थे द्वन्द्व"* [1] इति पाणिनिः, चकारो भेदार्थक इति स्वयमेव वक्ष्यते। **पदेति** पदानि द्वन्द्वसमासघटकीभूतानि तज्जन्या या **प्रतिपत्तिः** ज्ञानं **तद्विषयाः** पदार्थाः पदार्थतावच्छेदकाश्च तेषां **भेदः** मिथो भिन्नत्वं

1.अष्टाध्यायी – 2.2.29

In Public domain. Digitization Muthulakshmi Research Academy

पदजन्यप्रतिपत्तिविषयभेदबोधकत्वे सति समानविभक्तिमत्पदप्रकृतिकत्वं द्वन्द्वत्वम्। स च द्वन्द्वश्चार्थे, चकारार्थो भेदः तत्र किं पदार्थभेदे किं वा पदार्थतावच्छेदकभेदे शक्तिः? तत्र नाद्यः, "प्रमाणप्रमेय" इत्यादि गौतमकृत-न्यायाद्यसूत्रे, अप्येकदन्तहेरम्ब इत्यादिपर्य्याये, नीलघटयोरभेद इत्यत्र च पदार्थभेदसत्त्वेऽपि द्वन्द्वस्य दर्शनात्। नान्त्यः, घटा इति स्वरूपैकशेषे द्वन्द्वापवादके व्यभिचारात् कथमस्य द्वन्द्वापवादकत्वम्? तस्योत्सर्गापवाद-भावयोः समानविषयकत्वेन नियन्त्रिततत्वात्। न च घटा इत्यत्र स्वरूपैकदेशे किं मानम् इति वाच्यम्, "सकृदुच्चरितः शब्दः सकृदर्थं गमयती"त्यादि-व्युत्पत्या त्रिचतुरादिघटोपस्थापकत्वाभावात्।

तद्बोधकत्वे सतीत्यर्थः। तदुक्तं - *"पदार्थानां प्रधानत्वात् परस्परविभेदतः। एकदैक-क्रियायोगाद् भवति द्वन्द्वसंज्ञकः"* इति। यथा घटपटौ इत्यादौ समासघटकीभूत-घटपटपदयोः अर्थौ परस्परं भिन्नौ इति तद्वाचकयोर्द्वन्द्वः।

अथ यदि द्वन्द्वे स्वघटकीभूतपदार्थानां भेदोऽपेक्षितः तदा बहुषु स्थलेषु द्वन्द्वानुपपत्तिरिति समाधातुं भूमिकामारचयति - **तत्रेत्यादिना**। तथा च पदजन्यप्रति-पत्तिविषयपदेन किं पदार्थः पदार्थतावच्छेदको वा गृहीत इति प्रश्नतात्पर्य्यम्, आद्यः पदार्थभेदे शक्तिरूपः। 'प्रमाणप्रमेय' इत्यादौ प्रमाणत्वं प्रमाकरणत्वं, प्रमेयत्वञ्च प्रमाविषयत्वं प्रमेयत्वस्य केवलान्वितया यावत्स्वेव पदार्थेषु सत्त्वात् प्रमाणेऽपि तत्सत्त्वमिति प्रमेयभेदः प्रमाणे दुर्घट एव, केवलान्वयिधर्म्मावच्छिन्नप्रतियोगिताक-भेदस्य अप्रसिद्धतयापि अनुपपत्तिरिति।

'अप्येकदन्त' इत्यादावपि सर्व्वेषामेव पदानां गणपतिवाचकतया पदार्थभेदो नोपपद्यते, 'नीलघटयोरभेद' इत्यत्र नीलपदस्य नीलगुणविशिष्टघटपरतया

द्वन्द्वत्वमिति। प्राधान्येन **सर्वपदार्थबोधकत्वञ्च**। प्राधान्यञ्चात्र स्वघटकपदार्थांशे विशेषणतानापन्नत्वम्। तेन परस्परं विशेष्यत्वाभावेऽपि नासम्भवः। स च द्वन्द्वः द्वि-विधः। इतरेतरः समाहारश्चेतिभेदात्। अगृहीतविशेषद्वित्वादिसङ्ख्याविशिष्टनामार्थ-बोधकत्वम् इतरेतरत्वम्। नामार्थवृत्तितादृशसङ्ख्याबोधकत्वं समाहारत्वमिति।

In Public domain. Digitization Muthulakshmi Research Academy

न च घटपदात् घटत्वसामान्यलक्षणाप्रत्यासत्त्या घटमात्रोपस्थितौ तात्पर्य्यवशात् त्रिचतुरादिघटोपस्थितिः किन्तेनेति वाच्यम्, हरय इत्यत्र तस्यावश्यककल्पनात्। न ह्यत्र हरित्वमनेकम् अस्ति, घटा इति सर्ववादि-सिद्धैकशेषलोपप्रसङ्गाच्च।

मिथोऽभिन्नपदार्थबोधकत्वात् कथं पदार्थभेदः? अथ आद्यकल्पपरित्यागेन द्वितीयकल्पादरेण सर्व्वत्रैव उक्तस्थलेषु उपपत्तिर्भवति तत् कथं स एव पक्षः न स्वीक्रियते इत्याकाङ्क्षायामन्तिममपि दूषयितुम् उपन्यस्यति - **नान्त्य** इत्यादिना। अन्त्यः द्वन्द्वस्य पदार्थतावच्छेदकभेदबोधकत्वरूपः, न, तत्रैव हेतुमाह **स्वरूपैक-शेषे** इत्यादि, तथा च घटा इत्यत्र बहुवचनानुमेयबहुघटपदार्थतावच्छेदकघटत्वस्य एकस्यैव भेदोऽनुपपन्नः, परन्तु स्वरूपैकशेषस्य द्वन्द्वापवादकतया द्वन्द्वविषय एव तत्प्रवृत्तेः कथं द्वन्द्वलक्षणायोगे तत्प्रवृत्तिः? अथ घटा इत्यादौ न स्वरूपैकशेषः, बहुत्वबोधस्तु एकघटपदोत्तरं बहुवचनविधानेनापि भवति, तत् किमर्थं तदर्थं द्वन्द्वस्य पदार्थतावच्छेदकभेदबोधकत्वस्वीकारे अनुपपत्तिं कल्पयाम इति चेन्न। *"सकृदुच्चारितः शब्दः सकृदर्थं गमयती"* ति न्यायात् एकेन घटपदेन बहुघटबोधना -सम्भवात्, बहुत्वस्य च एकस्मिन् घटे बाधात् शाब्दवैकल्यम्। अत एव घटा इत्यस्य यथा बहुघटपदप्रकृतिकत्वं स्यात् तथा निर्व्वाच्यमिति स्वरूपैकशेषो बहुघटपदप्रकृतिकः स्वीक्रियते। परे तु *"सकृदुच्चारितः शब्द"* इत्यादि व्युत्पत्तिमनादृत्य स्वरूपैकशेषं नैव स्वीकुर्व्वते तथा चानुमितौ भट्टाचार्य्यग्रन्थः *"नेष्यत एव एकशेषः सकृदित्यादि व्युत्पत्तेरनभ्युपगमा"* दिति।

क्वचित् इत्यादि - तथा च भिन्नघटतात्पर्य्येण प्रयुक्तयोः घटपदयोः समासस्थले पदार्थभेद आवश्यकः, तत्र एकस्यैव घटत्वस्य पदार्थतावच्छेदकत्वात् पदार्थतावच्छेदकभेदमात्रे द्वन्द्वस्वीकारे अनुपपत्तेः, पदार्थभेदमात्रे द्वन्द्वस्वीकारे मेयवाच्ययोरभेद इत्यादौ द्वन्द्वानुपपत्तिरिति पदार्थतावच्छेकभेदः स्वीकार्य्यः, तत्स्वीकारे च प्रकृते मेयपदार्थवाच्यपदार्थयोरभेदेऽपि मेयत्ववाच्यत्वयोर्भेदात् द्वन्द्वोपपत्तिरिति। अथ तथापि 'गगनाकाशयोरभेद' इत्यादौ कथं पदार्थपदार्थावच्छे-

In Public domain. Digitization Muthulakshmi Research Academy

अत एवात्र वदन्ति– क्वचित् पदार्थभेदे, क्वचित् पदार्थावच्छेदकभेदे च द्वन्द्वस्य दर्शनादुभयभेदेऽपि शक्तिः। न चाननुगमो जातः, पदजन्यप्रतिपत्ति-विषयत्वेनैवोभयानुगमात्। तथा चात्र यद्भेदेनैव द्वन्द्वस्तत्रैव द्वित्वबहुत्वान्वयः, अनयोर्भेदसापेक्षत्वात्। न चैकपदे द्वन्द्वापत्तिरिति वाच्यम्, "सुप्सुपा"[1] इति समासाधिकारसामान्याभावात्। स च द्विविधः, – इतरेतरः, समाहारश्च। इतरेतरस्थले साहित्यं विशेष्यत्वेन भासते। समाहारे तु विशेषणत्वेन एव इति विशेषः। साहित्यं चैकक्रियान्वयित्वम्।

दकयोर्भेदविरहात् द्वन्द्व उपपद्यते इति चेत् गगनाकाशपदयोर्गगनाकाशपद-वाच्यत्वाभिप्रायेण प्रयुक्ततया गगनपदवाच्यत्वाकाशपदवाच्यत्वयोः मिथो भेदात् द्वन्द्वः। तदयं निष्कर्षः – पदविशिष्टपदत्वं द्वन्द्वनियामकम्। वैशिष्ट्यञ्च स्वजन्यप्रति-पत्तिविषयतातात्पर्य्यानुयोगितावच्छेदकरूपवृत्तिविषयताशालिज्ञानजनकत्वस्वघटित-द्वन्द्वघटकत्व एतदुभयसम्बन्धेन, विषयतायां रूपवृत्तित्वञ्च स्वीयपर्य्याप्त्यनु-योगितावच्छेदकत्वसम्बन्धेन। तथा च यत्र भिन्नघटतात्पर्य्येण बहुघटपदप्रयोगः तत्र तात्पर्य्यपर्य्यालोचनया तत्तद्घटपदात् तत्तद्घटरूपपदार्थोपस्थित्या तादृशोपस्थिति-विषयतापर्य्याप्तिस्तत्तद्घटे इति नैकविषयतापर्य्याप्त्यनुयोगितावच्छेदकरूप-वृत्तित्वात् अपरघटपदजन्यप्रतिपत्तिविषयतया द्वन्द्व उपपन्नः।

एकमेव घटमभिप्रेत्य यत्र घटपदद्वयप्रयोगः तत्र तत्र प्रत्येकमुभयघटपद-जन्यप्रतीतिविषयतापर्य्याप्त्यनुयोगितावच्छेदकमेव नतु भिन्नम्। अत एव तत्र कस्यापि घटपदस्य न पदविशिष्टत्वं तेन न द्वन्द्वः।

अथ यदि पदार्थयोरभेदेऽपि द्वन्द्वः तत्कथं द्वित्वबहुत्वादीनां अन्वयः, घटादिपदोत्तरद्विवचनादेः घटादौ अर्थबोधात् इत्याकाङ्क्षायामाह – **तथाचेत्यादि**। **अत्र** द्वन्द्वसमासस्थले, **यद्भेदेन** पदार्थपदार्थतावच्छेदकयोः ययोः भेदेन **द्वन्द्वः** द्वन्द्व-समासः, **तत्रैव** नतु तदतिरिक्ते मिथो भेदानापन्ने इत्यर्थः। **द्वित्वबहुत्वयोः अन्वयः**, द्विवचनबहुवचनप्रतिपाद्ययोः द्वित्वबहुत्वयोः सङ्ख्ययोः सम्बन्धः तथा च सति

---

1. सहसुपा –अष्टाध्यायी 2.1.4

In Public domain. Digitization Muthulakshmi Research Academy

तद्यथा 'धवखदिरपलाशाञ्छिनत्ती'त्यत्र धवखदिरपलाशप्रतियोगिकं यत् साहित्यं, तन्निरूपितं यदवयवविभागरूपफलं तज्जनिका या च्छिदा क्रिया, तदनुकूलकृतिमांश्चैत्र इति बोधः। निरूपितत्वमत्र सामानाधिकरण्यम्। 'धव-खदिरपलाशंच्छिन्धी'त्यत्र साहित्याश्रयीभूतं यद्धवादि, तद्वृत्ति यत् फलं, तज्जनिका या च्छिदाक्रिया, तदनुकूलकृतिमान् त्वम् इति बोधः। अथवा इतरेतरस्थले द्वित्वबहुत्वपदार्थानुगतमेकत्वं (द्वित्वबहुत्वप्रकारकपदार्थोप-स्थितिमात्रम्) भासते, समाहारे तु प्रत्येकपदार्थानुगतमेकत्वं भासते, न तूभयसाहित्यमेकक्रियान्ययित्वरूपं भासते। न च साहित्यं सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोरिति व्युत्पत्तेः का गतिः इति वाच्यम्, तत्रापेक्षाबुद्धिविशेष-विषयत्वरूपसाहित्यावगतित्वादिति।

तत्तदंशे द्वित्वादेर्बाधाविरहात् न शाब्दबोधे प्रतिबन्धः। तथाहि घटपटौ इत्यादौ द्वित्वस्य पदार्थद्वयांशे मेयवाच्ययोरभेद इत्यादौ च पदार्थतावच्छेदकद्वयांशे द्वित्वाद्यन्वय इति ज्ञेयम्। अनयोः द्वित्वबहुत्वयोः, भेदसापेक्षत्वात्, द्वित्वादि-सङ्ख्यानाम् अपेक्षाबुद्धिजन्यतया अपेक्षाबुद्धेश्च भेदाधीनतया परम्परया भेदाधीनत्वं द्वित्वादीनाम्।

स च द्वन्द्वः द्विविधः – विधप्रत्ययार्थः विचारितः। **इतरेतर इति** – 'धवखदिर-पलाशा' इत्यादौ इतरेतरद्वन्द्वः 'अहिनकुलम्' इत्यादौ समाहारः। **निरूपितत्वमत्रेति** साहित्यस्य एकक्रियान्वयित्वरूपस्य मुख्यतया विभागनिरूपकत्वायोगात् निरूपितत्वं सामानाधिकरण्यं व्याख्यातम्, तथा च विभागस्य साहित्यस्य च धवादिवृत्तित्वेन सामानाधिकरण्यमक्षतम्।

ननु यदि इतरेतरस्थले साहित्यं विशेष्यं तदा 'पुष्पफले जिघ्र भुङ्क्ष्व' इत्यादौ साहित्यस्य कथमन्वयः, एकक्रियायाम् उभयोरन्वयाभावात् इत्याकाङ्क्षायामाह **अथवेति**।

अथेदानीमव्ययीभावं निर्व्वक्ति – **समासेत्यादिना**। नानाविभक्तिभिरेकरूपताव -त्पदत्वम् अव्ययमात्राणामेवेति अव्ययमात्राणामेव अव्ययीभावसमासत्वप्रसक्त्या

In Public domain. Digitization Muthulakshmi Research Academy

अथाव्ययीभावलक्षणम्

समासग्रस्तत्वे सति नानाविभक्तिभिरेकरूपतावत्पदत्वमव्ययीभावत्वम्।

तद्वारणाय समासग्रस्तत्वे सतीति विशेषणं, तथा च अव्ययमात्राणां न समासग्रस्तत्वम् अपि तु समासघटकीभूतपदानामेव। अव्ययीभावमेवं वैयाकरणा ब्रुवते – *"पूर्व्वपदमव्ययं, परपदमनव्ययं तद्वशेन समुदायोऽनव्ययोऽव्ययो भवतीत्यव्ययीभाव"* इति। स च नियमः प्रायिकः सर्व्वत्र अव्ययीभावसमास-घटकपदानां प्रथमस्य अव्ययत्वे द्वितीयस्य अनव्ययत्वे च नियमाभावात् अन्यथा 'तिष्ठद्गु' प्रभृतिषु अव्ययीभावसमासनिष्पन्नेषु अव्याप्तेः। स चायं पूर्व्वपदार्थप्रधानः तदुक्तं – *"समासस्तु चतुर्थेति प्रायो वादस्तथापरः। योऽयं पूर्व्वपदार्थादि प्राधान्यविषयः स च"।* (भूषणसारः) **नानाविभक्तिभिरिति** – एकरूपत्वञ्च विभक्तिलुग्वत्त्वेन, तदुक्तं – *"सदृशं त्रिषु लिङ्गेशु सर्व्वासु च विभक्तिषु। वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्"* (सिद्धान्तकौमुदी) इति अव्ययीभावस्यापि कल्पिताव्ययत्वेन अव्ययकार्य्यभागित्वात् तथात्वम्। ननु अकारान्तानामव्ययी-भावानामुपकुम्भादीनां कथं तादृशलक्षणभागित्वम् अमादिना वैरूप्यात् इति चेन्न, बह्वीषु विभक्तिषु तेषामपि अमादेशवत्त्वेन एकरूपतायोगात् नाव्याप्तिः। समास-ग्रस्तत्वमात्रोक्तौ यावत्स्वेव समासेषु अतिव्याप्तिः इति समासान्तरव्यावर्त्तनाय विशेष्यदलम्।

अव्ययीभावत्वमिति। प्रधानतः पूर्वपदार्थबोधकत्वञ्च। तत्र पूर्वपदमव्ययं, परपदमनव्ययं, तद्वशेन समुदायोऽव्ययानव्ययः अव्ययीभवति इत्यव्ययीभावः। 'तिष्ठद्गु' प्रभृतीनान्तु तत्प्रकरणविहितत्वात् अव्ययीभावत्वं, सर्वेषामेव समासलक्षणानां प्रायिकत्वस्य शास्त्रादौ स्वीकारात्। यथोक्तमभियुक्तैः – *"समासस्तु चतुर्धेति प्रायोवादस्तथापरः। योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च"॥* (भूषणसारः) इति प्राधान्येन पूर्वपदार्थादिबोधकत्वलक्षणविभागोऽपि प्रायिक इति भावः।

In Public domain. Digitization Mithulakshmi Research Academy

अत्र पूर्वपदार्थस्यैव प्राधान्यं भासते। 'उपकुम्भ'मित्यत्र कुम्भावधिकाल्प-देशसंयोगीति सङ्क्षेप इति।

अथ निर्द्धारणम्

जात्यादिविशेषणविशिष्टयद्धर्मावच्छिन्नस्य तादृशविशेषणशून्यतद्धर्मावच्छिन्नव्यावृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनं निर्द्धारणम्।

अत्रेत्यादि – पूर्व्वपदार्थस्य समासघटकपदेषु प्रथमोच्चारिताव्ययपदार्थस्यैव नतु उत्तरवर्त्तितद्भिन्नपदार्थस्य। **प्राधान्यं** शाब्दबोधे विशेष्यत्वं, तथाहि– यत्र समासे यत् पदार्थः प्राधान्येन निर्द्दिष्टः तत्र तद्विशेष्यक एव शाब्दबोधः प्राधान्याप्राधान्ययोः शाब्दबोधे विशेष्यविशेषणभावरूपत्वात्। प्रकृते उपकुम्भमित्यादौ उपशब्दार्थ सामीप्यं पूर्व्वपदार्थः, कुम्भपदार्थश्च उत्तरपदार्थः, तदत्र कुम्भसम्बन्धिसमीपबोधे समीपरूपार्थः विशेष्यः कुम्भपदार्थश्च विशेषणं तदंशे, विशेषणविशेष्यभावयोः शाब्दबोधे प्राक्प्रतीयमानत्वपरप्रतीयमानत्वरूपतया वैलक्षण्यात्। यथा – 'गच्छति देवदत्तो ग्रामम्' इत्यादौ ग्रामवृत्तिकर्म्मतानुकूलव्यापारानुकूलकृतिमान् इत्येव बोधो जायते, ग्रामस्य कर्म्मत्वांशे विशेषणत्वं कर्म्मतायाश्च क्रियाजन्यफलरूपाया अनुकूलत्वसम्बन्धेन कृतौ कृतेश्च कर्त्तरि इत्येवं रूपेण यदंशे यद्वविशेषणीभूय भासते तदपेक्षया तदर्थस्य अप्राधान्यं प्राधान्यञ्च तद्विशेष्यस्य तथा एव समासादि-स्थलेऽपि अवसेयम्।

अथ निर्द्धारणं व्यनक्ति – **जात्यादीत्यादिना**। अत्र कौमाराः – *"निर्द्धार्य्यते पृथक्क्रियते यस्मात् समुदायात् एकदेशो जातिगुणक्रियाभिस्तन्निर्द्धारणम्"*। *"उद्देश्यतावच्छेदकशून्ये सामान्यधर्म्मावच्छिन्ने विधेयाभाववत्त्वम्"* इति नैयायिकाः, तदनुगामिन एव केचित् – विशेष्ये स्वभिन्नसामान्यव्यावृत्त-धर्म्मवत्त्वमिति ब्रुवते, तथा च 'नराणां क्षत्रियः शूर' इत्यादौ उद्देश्यतावच्छेदकं क्षत्रियत्वं जातिः तच्छून्ये सामान्यधर्म्मनरत्वावच्छिन्ने विधेयस्य शूरत्वस्य अभाववत्त्वं बुध्यते, तेन क्षत्रियभिन्नो नरो न शूर इत्यपि प्रतीतिः।

उपकुम्भमिति। कुम्भसमीपे इति वाक्यार्थः।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र जातिगुणक्रियाणामन्यतमेन समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम्। विलक्षणधर्म्मवत्त्वेन निरूपणं पृथक्करणम्। एवञ्च यत्पदसमभिव्याहृता षष्ठी तदुपस्थाप्यतदन्यपदार्थसमुदाये तद्धर्म्मवत्त्वाभावः षष्ठ्या उपस्थाप्यत इति बोध्यम्। क्रमेणोदाहरणम् – 'नराणां क्षत्रियः शूरतम' इति क्षत्रियान्यनर-निष्ठान्योन्याभावप्रतियोगिशूरतमाभिन्नः क्षत्रियः नर इति अन्वयबोधः। एवं सर्व्वत्र क्रियागुणस्थले बोध्यम्। 'नराणां क्षत्रियः शूरतम' इति नरसामान्यमध्ये क्षत्रियत्वजात्यवच्छिन्ननरे शौर्य्यं, तदन्यनरे तदभाव इति भावाभावान्वय-बोधः। एवं 'गवां मध्ये कृष्णा गौः सम्पन्नक्षीरतमा' इति गोसामान्यमध्ये कृष्णरूपवत्यां गवि सम्पन्नक्षीरतमत्वं, तदन्यगवि तदभाव इति। एवम् 'अध्वगानां रथिनः शीघ्रगतयः' इति अध्वगसामान्यमध्ये रथारूढ़ा अध्वगाः शीघ्रगामिनंः तदन्ये अध्वगा नेति भावाभावान्वयधीः।

तदेवाह – **एवञ्चेत्यादिना**, तथा च नराणां क्षत्रियः शूर इत्यत्र नरपदसमभि-व्याहृता षष्ठी, तदुपस्थाप्यः यः **तदन्यपदार्थः** उद्देश्यवाचकपदप्रतिपाद्यभिन्नः नरादि-पदार्थः **तत्समुदाये** क्षत्रियादिभिन्ने **तद्धर्म्मवत्त्वस्य** विधेयधर्म्मवत्त्वस्य शौर्य्यादिरभाव इति।

भावाभावान्वयबोध इति – ननु एकदा कथमुभयोः भावाभावयोरेकतो बोध इति चेत् प्राक् तादृशार्थ एव निर्द्धारणषष्ठ्या वृत्तिस्वीकारात्, उद्देश्यतावच्छेदक-शून्यसामान्यधर्म्मावच्छिन्नव्यावृत्तधर्म्मवत्त्वस्य निर्द्धारणषष्ठ्या बोधनात् एकक्रमे-णैव अभिप्रायसिद्धेः।

निर्द्धारणस्य बहूनामेकस्य पृथक्करणरूपत्वात् प्रायेण षष्ठ्यन्तानां पदानां बहुत्वभागित्वेऽपि कदाचित् जात्यादिपरत्वेन एकवचनप्रयोगोऽपि दृश्यते, यथा

निर्द्धारणमिति। विशेष्यस्य स्वेतरसामान्यव्यावृत्तधर्म्मवत्त्वम्।

क्रमेणेति। तत्र क्रमेण जातिगुणक्रियाणामुदाहरणानि। तथाहि – 'नराणां क्षत्रियः शूरः' इत्यत्र क्षत्रियत्वं जातिः। 'गवां मध्ये कृष्णा गौः सम्पन्नक्षीरतमा' इत्यत्र कृष्णत्वं गुणः। 'अध्वगानां रथिनः शीघ्रगतयः' इत्यत्र शीघ्रगमनं क्रिया।

In Public domain. Digitization: Mahalakshmi Research Academy

अथ एवकारविचार:

तस्य व्यवच्छेदत्वमेव शक्त्यतावच्छेदकं, व्यवच्छेद: शक्य:, व्यव-च्छेदो विरह:, विशेषस्त्वेतावान्, क्रियासमभिव्याहृतस्यैवकारस्यात्यन्तायोग-व्यवच्छेदे विशेषणसङ्गतैवकारस्यायोगव्यवच्छेदे विशेष्यसङ्गतैवकारस्यान्य-योगव्यवच्छेदे शक्तिर्बोध्या। तत्र क्रमेणोदाहरणम् – 'नीलं सरोजं भवत्येव'

भाष्ये – 'घटादेरामद्रव्यस्य परमाणौ पाक' इति, स्वारसिकस्तु बहुवचनप्रयोग एव प्रायेण। ननु निर्द्धारणं पृथक्करणम् इति यद्युच्यते तदा तस्य उभयनिष्ठतया तस्मिन् द्योत्ये निर्द्धार्य्यभूतशूरादिशब्दादपि कथं न षष्ठी स्यात् इति चेत् एतदेवाभिप्रेत्य निर्द्धार्य्यते पृथक्क्रियते यस्मात् समुदायात् एकदेशस्तन्निर्द्धारणम् इति अपादानवाच्ये अनट् प्रत्ययस्य विधानात् नरत्वादिरूपसामान्यधर्म्मावच्छिन्नवाचकपदोत्तरमेव निर्द्धारणे विहिता विभक्ति: प्रवर्त्तिष्यते न तु क्षत्रियादिपदोत्तरं तस्मात् तु लिङ्गार्थमात्रे प्रथमैव भवतीत्यादिक्रियाध्याहारेण कर्त्तृत्वार्थस्य उक्तत्वात्।

'यो भवतां चैत्र: स आगच्छतु' इत्यादौ न निर्द्धारणं जातिगुणक्रियाभिरेव एकस्मादपरस्य निर्द्धारणे निर्द्धारणलक्षणलक्ष्यतास्वीकारात्, केचित्तु – 'यो भवतां दण्डी'त्यत्रापि दण्डसम्बन्धरूपेण गुणेनैव निर्द्धारणमिति ब्रुवते।

अथेदानीमेवकारार्थविचार: प्रस्तूयते – तस्येत्यादिना। विशेषेत्यादि – **एतावान्** वक्ष्यमाणरूप: **विशेष:** वैलक्षण्यं – **क्रियासमभिव्याहृतस्य** क्रियान्वयार्थप्रति-पादकस्य अत्यन्तायोगव्यवच्छेदे इत्यस्य शक्तिर्बोध्या इति वक्ष्यमाणपदार्थेन अन्वय:। अत्यन्तायोगव्यवच्छेदश्च क्रियान्वयितावच्छेदकधर्म्मसामानाधिकरण्ये-न विधेयवत्त्वपर्य्यवसित:, तथा च उदाहरणं – **सरोजं नीलं भवत्येव,** अत्र सरोजत्वरूपस्य क्रियान्वयितावच्छेदकस्य सामानाधिकरण्येन नीलत्वं प्रतीयेत। यत: कतिचित् सरोजानि नीलानि कतिचित् रक्तानि कतिचित् वा श्वेतानि, तत्र सरोजत्वावच्छेदेन अत्यन्तनीलगुणयोगाभावव्यवच्छेदस्य एवकारेण प्रत्यायनात् तात्पर्य्यगत्या सरोजत्वसामानाधिकरण्येन नीलत्वबोध:।

द्वितीयस्य उदाहरणं यथा – **'शङ्ख: पाण्डर एव'** इत्यादि, अत्र शङ्खत्वावच्छेदेन पाण्डरवत्त्वे तात्पर्य्यं, वाक्यार्थस्तु शङ्खे पाण्डरसम्बन्धविरह-

In Public domain. Digitization Muthulakshmi Research Academy

इत्यत्र प्रकृतेरन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन नीलत्वान्वयः तथा च सरोजं क्वचिन्नीलं क्वचिदनीलमपि भवतीत्यन्वयबोधः। 'शङ्खः पाण्डर एव' एत्यत्र शङ्खे पाण्डरत्वं तदयोगव्यवच्छेदश्च इति। तथा च अन्वयितावच्छेदक -शङ्खत्वावच्छेदेन पाण्डरत्वायोगव्यवच्छेद इत्यन्वयबोधः। 'पार्थ एव धनुर्धरः' इत्यत्र धनुर्धरपदं प्रकष्टधनुर्धरलक्षकम्। तेन पार्थे प्रकृष्टधनुर्धरत्वं, तदन्यस्मिंस्तदभावबोध इति। तथा च पार्थः प्रकृष्टधनुर्धरस्तदन्यो नेत्यर्थः। अथवा धनुधरि पार्थतादात्म्ययोगः। तदन्यस्मिन् तादात्म्ययोगव्यवच्छेदश्चेति।

व्यवच्छेदः तेनैव यत्किञ्चित् शङ्खेऽपि यदि पाण्डरसम्बन्धविरहः स्यात् तदापि शङ्खत्वावच्छेदेन पाण्डरवत्त्वं न स्यात् इति कुत्रापि शङ्खे न पाण्डरविरह इति प्रत्येयम्। तृतीयस्य उदाहरणं यथा – **पार्थ एव धनुर्द्धर** इति, अत्र पार्थादन्यस्मिन् धनुर्द्धरत्वाभावबोधः, प्रकृष्टधनुर्द्धरत्वं पार्थत्वव्याप्यमिति भावः। अत्र धनुर्द्धरत्वं पार्थादन्यस्मिन् अपि सत्त्वेन पार्थादन्यस्मिन् धनुर्द्धरत्वाभावबोधात् शाब्दबोधानुपपत्तिः वक्तृतात्पर्य्यमपि प्रकृष्टधनुर्द्धरे इति *"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तित"* इति लक्षणास्वीकारः। अथ समभिव्याहारः सङ्गतिः, सा च तदुत्तरनिर्देश इति केचित् तथा सति धनुर्द्धरत्वं पार्थस्यैव इत्यादौ विशेषणादि सङ्गतस्यापि एवकारस्य अन्ययोगव्यवच्छेदप्रत्यायकतया, शङ्खस्य पाण्डरत्वमेव इत्यादौ विशेष्यादिसङ्गतस्यापि एवकारस्य अयोगव्यवच्छेदप्रत्यायकतया, वायुर्वात्येव इत्यादौ क्रियासङ्गत -स्यापि एवकारस्य अयोगव्यवच्छेदप्रत्यायकतया च कथं पूर्व्वोक्तनियमानां रक्षा

नीलमित्यादि। अत्यन्तायोगव्यवच्छेदे यथा – 'नीलमित्यादि', अत्र सरोजे नीलत्वात्यन्तायोगः व्यवच्छिद्यते॥

शङ्ख इत्यादि। 'शङ्खः पाण्डर एव' इत्यत्रायोगव्यवच्छेदः, शङ्खे पाण्डर योगो व्यवच्छिद्यते॥

पार्थ इत्यादि। अन्ययोगव्यवच्छेदे यथा– 'पार्थः एव धनुर्धरः' इत्यत्र पार्थान्यपदार्थे प्रशस्तधनुर्धरत्वं व्यवच्छिद्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अथ सर्वनामपदशक्तिविचार:

तस्य शक्यं घटादिकं शक्यतावच्छेदकश्च घटत्वादिकम्। तमानयेत्यादौ शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां घटत्वादिप्रकारकत्वात् तेषां समान-प्रकारकत्वेनैव कार्य्यकारणभावात् बुद्धिविषयत्वेनैव तेषामनुगमः।

इति चेत्, अत्र केचित्, विशेषणत्वं विशेष्यत्वञ्च द्वेधा भेदेन अभेदेन च भवतः, तत्र अभेदेन यत्र विशेष्यविशेषणभावस्तत्र विशेष्यसङ्गतस्य, भेदेन यत्र विशेष्य-विशेषणभावस्तत्र विशेषणसङ्गतस्य एवकारस्य धर्म्मान्तरे तद्योगव्यवच्छेदरूपोऽर्थ इत्यादिना समाधेयम्।

सर्व्वनामपदानां घटत्वादिविशेषधर्म्मावच्छिन्ने शक्तिः, तमानय इत्यादौ प्रयोजकादेशानन्तरं प्रयोज्येन प्रकरणादिपर्य्यालोचनया घटादेरानयनात् आनयनस्य च आदेशवाक्यार्थज्ञानसापेक्षत्वात्। अथ तदादिपदानां घटत्वादिरूपेण शक्ति-विरहेऽपि बुद्धिविषयतया शक्तिग्रहेणापि घटपदार्थोपस्थित्या तेन रूपेण शाब्दबोध उपपद्यते, किमिति विशेषादर इत्याकाङ्क्षायामाह – **घटत्वादि प्रकारत्वादिति**, अथ बुद्धिविषयतया शक्तिग्रहात् तथैव पदार्थोपस्थित्या घटत्वप्रकारकशाब्दबोधे का क्षतिरित्याशङ्क्य प्राह – **समानप्रकारकत्वेन** इति, यादृशधर्म्मावच्छिन्ने शब्दस्य शक्तिग्रहः, शक्तिसम्बन्धेन तादृशधर्म्मावच्छिन्नस्य उपस्थितिः तादृशधर्म्मावच्छि-न्नप्रकारकशाब्दबोधे कारणमिति नियमात् एकधर्म्मावच्छिन्नविषयका एव शक्तिग्रहपदार्थोपस्थितिशाब्दबोधा भवेयुरिति नियमः।

अथ यदि तदादिपदानां घटत्वादिनानाधर्म्मावच्छिन्ने शक्तिः तत् कथं शक्यतावच्छेदकभेदे शक्तेरैक्यं तदभावे च हरिपदादिवत् तदादिपदानामपि नानार्थत्वापत्तिरिति शङ्कायामाह – **बुद्धिविषयवृत्तित्वेन** इत्यादि, तथा च बुद्धिविषय

सर्वनाम इति। वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नम्, स्वो-च्चारणानुकूलबुद्धिप्रकारविशिष्टं वा सर्वनामार्थः। 'सोऽयं वो विदधातु वाञ्छित-फलम्' इत्यादौ तच्छब्दार्थः॥

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धिविषयवृत्तित्वेन शक्यतावच्छेदकानां चानुगम इति विशेषः। तथा च हरिपदादिवन्नानार्थमेव, तात्पर्य्यग्रहस्तु प्रकरणादिवत् पूर्वसङ्केतोपस्थितिरिति नवीनतार्किकाः। केचित्तु सर्वनामपदस्य क्वचित् प्रक्रान्ते, क्वचित् प्रक्रम्यमाणे च शक्तिः, उभयोरनुगमकं बुद्धिविषयत्वं, तदेव शक्यतावच्छेदकमित्याहुः।

–वृत्तित्वरूपेण बहूनामपि शक्यतावच्छेदकानाम् अनुगमात् न शक्तिभेदः न वा नानार्थत्वापत्तिः।

तथाचेत्यादि – घटादिपदानां सङ्केतग्रहस्य प्रकारस्तु घटपदात् घटो बोद्धव्य इति अत्र सङ्केतग्रहे घटपदजन्यबोधविषयत्वं प्रकारः घटत्वावच्छिन्नश्च विशेष्यः, तथाच घटपदजन्यबोधविषयत्वप्रकारतानिरूपितघटत्वावच्छिन्नविषयताकत्वं सङ्केत–ग्रहस्य, परे च घटो घटपदजन्यघटत्वावच्छिन्नशाब्दबोधविषयतावान् भवतु इत्या–कारकसङ्केतज्ञानीयशाब्दबोधविषयतावच्छेदकत्वविषयतानिरूपितविषयत्वं शाब्द–बोधप्रकारतायां प्रयोजकं शाब्दबोधप्रकारतावच्छेदकतायाश्च तादृशविषयता-वच्छेदकतावच्छेदकत्वविषयतानिरूपितविषयत्वं प्रयोजकम्, तद्यथा घटपदाद् घट इत्याकारकः पश्वादिपदाच्च लोमत्वावच्छिन्नलोमावच्छिन्नेत्याकारकः शाब्दबोधः इयं विशिष्टे शक्तिः। अथ आकाशपदात् कदाचित् शब्दाश्रयत्वेन कदाचित् अष्टद्रव्यातिरिक्तद्रव्यत्वेन वा उपस्थितिः कयां रीत्या उपपादयितुं शक्या, सङ्केतो यदि आकाशपदात् शब्दाश्रयो बोद्धव्य इति तदा शब्दाश्रयत्वेनैव तदुपस्थितिः युक्ता, यदि अष्टद्रव्यातिरिक्तद्रव्यत्वेन तदा तथैव इति कीदृशं समाधानम् इति चेत्, अकाशपदस्य निरवच्छिन्ने शब्दाश्रये शक्तिः, शब्दाश्रयत्वादीनां गुरुधर्म्मतया अत्र अवच्छेदकत्वस्य कल्पयितुमशक्यत्वादिति अनियतधर्म्मप्रकारक एव आकाश-पदात् बोध इति उक्ता शक्तिरेव उपलक्षिते।

अथ निरवच्छिन्ने आकाशपदस्य शक्त्या येन केनापि धर्म्मेण आकाशस्य उपस्थितौ मेयत्वादिनापि तस्य उपस्थितिः कथं न स्यात् इति चेन्न, येन रूपेण यत्र शक्तिज्ञानं तेनैव रूपेण तत्र आकाशभानस्य नियमस्वीकारात् मेयत्वादिना शक्तिज्ञानाभावात् न तथा, शक्तिज्ञानविशेष्यतावच्छेदकतया गृहीतेन

In Public domain. Digitization Muthulakshmi Research Academy

अनतिप्रसक्तधर्म्मेणैव तद्भानम्। दीधितिकारास्तु शाब्दबोधीयप्रकारतायां सङ्केतज्ञानीयविशेष्यतावच्छेदकत्वं तदवच्छेदकतायाञ्च तादृशविशेष्यता-वच्छेदकतावच्छेदकत्वं नियामकं, तेन शब्दाश्रयत्वरूपेण सङ्केतज्ञानस्वीकारात् शब्दाश्रयत्वावच्छिन्न एव आकाशपदशक्तिरिति कल्पयन्ति। हर्य्यादिपदानां सङ्केतस्तु *"हरिपदात् विष्णुर्बोद्धव्यः, हरिपदात् सूर्य्यो बोद्धव्यः, हरिपदात् इन्द्रो बोद्धव्य"* इत्यादि बहुविध एव प्रकरणादिनियन्त्रितार्थतया च नानार्थकशब्दस्य तत्तद्विशेषधर्म्मप्रकारेण तस्मादुपस्थितिः, तावत्पदार्थानुगतस्य अनतिप्रसक्तस्य लघुधर्म्मस्य अभावेन अगत्या तत्तद्धर्म्मेषु हरिपदशक्यतावच्छेदकभेदेन शक्तिभेदस्य आवश्यकतया नानार्थकत्वनिर्व्वाहः तत्तद्धर्म्मगतान्यतमत्वस्य अनुगतधर्म्मस्य सम्भवेऽपि गौरवादिदोषस्य परिहातुमशक्यतया न तद्रूपेण शक्त्यैक्यम्। निष्कर्षस्तु तदादिपदानां वक्तृबुद्धिप्रकारावच्छिन्ने शक्तिः वक्तृबुद्धिप्रकारत्वस्य च न शक्यतावच्छेदकतावच्छेदकतया भानं किन्तु शक्यता-वच्छेदकत्वसामानाधिकरण्येनैव, 'तत्पदं बुद्धिप्रकारत्वाश्रयावच्छिन्नं बोधयतु' इत्यादि सङ्केतज्ञाने प्रकारत्वस्य शाब्दबोधविषयतावच्छेदकत्वसामानाधिकरण्येन भानादेव शाब्दबोधप्रकारतावच्छेकतया नियामकस्य सङ्केतीयशाब्दबोधविषयता-वच्छेदकतावच्छेदकत्वविषयतानिरूपितविषयत्वस्य प्रकारत्वे विरहात् न तथात्वम्। अत एव 'तमानय' इत्युक्ते आनयनं घटकर्म्मकं न वेति विशेषधर्म्म-प्रकारकसंशयनिवृत्तिः सुघटा, 'तमानय' इति वाक्यादपि विशेषधर्म्मपुरस्कारेण आनयने घटकर्म्मकत्वप्रतीतेः। विशेषधर्म्मप्रकारकसंशयस्य विशेषधर्म्म-पुरस्कारेण निश्चयादेव निवृत्तेः, प्रकारत्वस्य घटत्वाद्यंशे उपलक्षणतयैव निरवच्छिन्नघटत्वादिबोधः सुघट इति नानुपपत्तिः। केचित्तु इत्यादि - बुद्धिविषयत्वस्य शक्यतावच्छेदकत्वे बुद्धिविषयत्वरूपेणैव घटादिपदार्थानां तत्पदेन उपस्थितिर्भविष्यतीति विशेषधर्म्मप्रकारकसंशयनिवृत्तिः ततो न स्यात्, अत एव बुद्धिविषयत्वस्य शक्यतावच्छेदकत्वं न स्वारसिकमिति केचित्तु इत्यनेन सूचितम्।

In Public domain. Digitization Muthulakshmi Research Academy

अथ इवशब्दविचारः

'चन्द्र इव मुखम्' इत्यत्र चन्द्रपदं चन्द्रपरम्, इवपदं सादृश्यपरं, मुखपदं मुखपरम्, प्रतियोगित्वं संसर्गः, तत्र चन्द्रपदस्य प्रतियोगितया सादृश्ये, सादृश्यस्याश्रयतया मुखे अन्वयः। तथा च चन्द्रप्रतियोगिकसादृश्याश्रयः मुख-मित्यन्वयधीः इति तन्न। चन्द्रमिव मुखं पश्यामीत्यत्र चन्द्रपदोत्तरद्वितीया-नुपपत्तेः चन्द्रमुखयोरभेदाभावात्। अत एव चन्द्रपदं चन्द्रसदृशे लाक्षणिकम्, इवपदं तात्पर्य्यग्राहकं, चन्द्रपदोत्तरं द्वितीयाविभक्तिसत्त्वेनाभेदबोधकत्वात्। चन्द्रसदृशाभिन्नमुखमहं पश्यामीति भावः। निपातातिरिक्तनामार्थयोर्भेदेनान्वय-बोधं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्। तेन इवार्थान्वयबोधेन षष्ठ्यपेक्षया प्रथमा साधुत्वार्था इति निष्कर्षः।

अथ इवार्थविचारं व्यनक्ति - **चन्द्र एव मुखमित्यादिना। सादृश्यपरमिति** सादृश्यबोधेच्छया उच्चरितं, सादृश्यञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वम्, परशब्दः सर्व्वत्र बोधेच्छया उच्चरितार्थकः।

चन्द्रमुखयोरित्यादि अभेदसम्बन्धेन अन्वयिनोरेव पदार्थयोर्व्वाचकौ यौ शब्दौ तयोरेव समानविभक्तित्वनियमात्, अत एव प्रतियोगित्वसम्बन्धेन सादृश्ये चन्द्रादेर-न्वये न समानविभक्तिकत्वोपपत्तिरिति।

इवार्था बहवः - उपमा, उत्प्रेक्षा, वाक्यालङ्कारः, ईषदर्थश्च, तत्र उपमोदाहरणं यथा 'चन्द्र इव मुखं भाति', इवेन सह उपमानवाचकपदस्य नित्यसमासः विभक्तेश्चालोपः, तथा च वार्त्तिकम् 'इवेन नित्यसमासः विभक्त्यलोपश्च' इति।

अथेत्यादि। इवेत्यस्य उपमायाम्, उत्प्रेक्षायां, वाक्यालङ्कारे, ईषदर्थे च शक्तिर-वगन्तव्या। तत्रोपमायाम् *"इवेन नित्यसमासः विभक्त्यलोपश्च"* इति वार्त्तिकोक्ते-र्नित्यसमासः विभक्त्यलोपश्चेत्येदप्यत्र ज्ञातव्यमित्युच्यते। तथाहि 'वागर्थाविव सम्पृक्तौ' इत्यादि। उत्प्रेक्षायां यथा - 'मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः' इत्यादि। वाक्यालङ्कारे यथा - 'सर्वदा क इव वा सहिष्यते' इत्यादि। ईषदर्थे यथा - 'आवर्जिता किञ्चिदिव स्तनाभ्याम्' इत्यादि।

In Public domain. Digitization by Muthulakshmi Research Academy

अथ उद्देश्यविधेयभाव:

तत्र उद्देश्यतावच्छेदकविधेयतावच्छेदकयो: सामानाधिकरण्यं भासते। तेन 'घटो नीलरूपवान्' इत्यत्र घटत्वनीलरूपयो: सामानाधिकरण्यमवगाहते। एवमुद्देश्यवाचकपदप्रयोग: प्रागेव कर्त्तव्य:। अन्यथा 'नीलरूपवान् घट' इत्यत्र घटोद्देश्यकनीलरूपविषयकबोध: स्यात्। किन्तु नीलरूपवदुद्देश्यकघटत्व-विषयकबोध एव भवतीति।

उत्प्रेक्षोदाहरणं यथा 'अपर: चन्द्र इव मुखं भाति' इत्यादि।

वाक्यालङ्कारे तु 'सर्व्वदा क इव वा सहिष्यते' इति। ईषदर्थे 'आवर्ज्जिता किञ्चिदिव स्तनाभ्यामि'ति। विभक्ते: साधुत्वमात्रार्थकतया प्रथमा एव प्रकृते।

अथ उद्देश्यविधेयभावं व्यनक्ति – **तत्रेत्यादिना**। उद्देश्यत्वं विधेयत्वञ्च विषयताविशेषौ, यद्धर्म्मावच्छिन्ने किञ्चित् साध्यते तत् उद्देश्यतावच्छेदकं यद्धर्म्मश्च साध्यते स विधेय:, **सामानाधिकरण्यम्** एकाधिकरणवृत्तित्वं 'घटो नीलरूपवान्' इत्यत्र घटत्वावच्छिन्ने नीलरूपं साध्यते इति घटत्वम् उद्देश्यतावच्छे-दकं नीलरूपञ्च विधेयम्। **प्रागेवेति** विधेयवाचकपदादिति शेष:। इदञ्च प्रायिकम्, अवयवग्रन्थे भट्टाचार्य्येण निरुक्तम्। उद्देश्यतया अभिसन्धानसत्त्वे विधेयवाचक-पदोत्तरनिर्द्दिष्टादपि पदादुद्देश्यप्रतीते:, यथा– *"वह्निव्याप्यधूमवान् पर्व्वत:, तस्माद् वह्निमान्"* इत्याद्युपनयनिगमनावयवयो:। **नीलरूपविषयकेति** विषयत्वं विधेयत्वा-ख्यम् अवगन्तव्यम्, घटत्वविषयकबोध इत्यत्रापि विषयत्वं विधेयत्वाख्यम्।

प्रकृतिविकृतिभावेऽपीति – अयं पूर्वोक्त: नियम: उद्देश्यतावच्छेदकविधेययो: सामानाधिकरण्यबोधक: उद्देश्यवाचकपदस्य पूर्व्वनिर्द्देशावेदकश्च इति। प्रकृति-विकृतिभावस्थलेऽपि प्रकृतौ उद्देश्यत्वस्य विकृतौ च विधेयत्वस्य भानात् उद्देश्य-विधेयभावस्थलनियमान्तर्गतत्वादिति।

उद्देश्येत्यादि। इह किल *"विशेष्यविशेषणयोरेका विभक्ति: समानलिङ्गता च"* इत्युक्तेरतिप्रसङ्ग:, तथाहि 'एकवृक्ष: पञ्चनौका भवति' इत्यादौ लिङ्गसङ्ख्यादी-नाम् अतन्त्रत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

प्रकृतिविकृतिभावेऽप्ययं नियमो बोध्यः। यथा 'एको वृक्षः पञ्च नौका भवति' इत्यत्र वृक्षपदं वृक्षारम्भकद्रव्यपरं, नौकापदञ्च नौकारम्भकद्रव्यपरम्। तेन वृक्षारम्भकद्रव्यं पञ्चनौकारम्भकं भवतीति बोधः। एवं 'एकं सुवर्णं दश-कुण्डलानि भवति' इत्यत्रापि बोध्यम्।

अथ 'यूपाय दारु' इत्यत्र दारुपदं दार्व्वारम्भकद्रव्यपरं, चतुर्थ्या उद्देश्यत्वं जनकत्वञ्च। तत्रोद्देश्यत्वस्य यूपे, जनकत्वस्य दारुणि अन्वयः। तेनोद्देश्यी-भूतयूपजनकदार्व्ववयवद्रव्यमिति अन्वयधीः। प्रकृतिविकारभावे 'रन्धनाय स्थाली' इत्यादौ चतुर्थ्यर्थः केवलमुद्देश्यत्वम्। तेन रन्धनोद्देश्यक-स्थालीयमिति बोधः। इयमेव तादर्थ्ये चतुर्थी।

उद्देश्यविधेयभावस्थले च असति बाधके उद्देश्यतावच्छेदकविधेययोः प्रयोज्यप्रयोजकभावलाभोऽपि व्युत्पत्तिसिद्धः, यथा 'धान्येन धनवान् सुखी' अत्र सुखरूपे विधेये धान्याभिन्नधनप्रयोज्यत्वबोध आनुभविकः। 'अयं घट' इत्यादौ उद्देश्यविधेयभावसत्त्वेऽपि घटत्वे विधेये इदन्त्वरूपोद्देश्यतावच्छेदकप्रयोज्यत्वस्य बाधसत्वात् न तथात्वम् इति।

अथ विशेष्यविशेषणयोरेका विभक्तिः समलिङ्गता च, तदुक्तं *"विशेष्यस्य च यल्लिङ्गं विभक्तिवचने च ये"* इत्यादि, तत् उद्देश्यविधेययोरपि विशेष्यविशेषण-भावात् कथं 'एको वृक्षः पञ्च नौका भवति' इत्यादौ व्यभिचारः इति चेत्, लिङ्ग-सङ्ख्यादीनां न सर्व्वत्र तन्त्रता, परं *"प्रकृतिविकृत्योः प्रकृतिवच्च"* इति नियमेन कदाचित् तन्नियमवैपरीत्यमपि विज्ञाप्यते, अन्यथा तादृशानुशासनस्य अनपेक्षणी-यत्वात्। ननु शाखापल्लवाद्यवच्छिन्नः पदार्थ एव वृक्षपदेन अभिधीयते नौकापदेन च शाखापल्लवादि शून्यवृक्षावयवप्रकृतिकसंस्थानविशेषवान् पदार्थ इति परस्परं कथम् उद्देश्यविधेयवाचकपदार्थयोरभेदान्वयः इत्याशङ्कायामाह– **वृक्षपदं वृक्षारम्भकद्रव्य-परमिति**, इदानीम् उभयोरभेदान्वयो न बाधित इति ध्येयम्।

एवमित्यादि। सुवर्णपदेन सुवर्णारम्भकद्रव्यं कुण्डलपदेन च कुण्डलारम्भक-द्रव्यं प्रतिपाद्यते, तेन तत्रापि नाशङ्का।

In Public domain. Digitization Mahalakshmi Research Academy

अथ उपसर्गविचारः

तत्र उपसर्गस्य वाचकत्वं नास्ति, किन्तु द्योतकत्वमेव, क्लृप्तशक्तिक-धातोरेवार्थविशेषे तात्पर्य्यग्रहात्। प्रजयतीत्यादौ जिधातोरेव जये शक्तिः प्रकृष्टजये लक्षणा, तत्र प्रकृष्टजयबोधे प्रोपसर्गस्य तात्पर्य्यग्राहकत्वमात्रम्। अथवा जिधातोरेव प्रकृष्टजये शक्तिः। सा च प्रोपसर्गोपसन्धानेनैव बुध्यते। तथा चेयमौपसन्धानिकी शक्तिः। न च प्रतिष्ठतीत्यादौ प्रकृष्टस्थितिविषयक-बोधः कथं न जायते इति वाच्यं, तत्र स्थितिविपरीतार्थगमनस्योपस्थितत्वात् धातूनां प्रोपसन्धानेनैव तदर्थो लक्षणया शक्त्या वा बोध्यते। अपि च प्रजयतीत्यत्र यदि प्रकृष्टजये धातोर्न शक्तिः, तदा प्रकृष्टजयाश्रयत्वेन बोधो न स्यात्। प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम् इति व्युत्पत्तेः श्रवणादिति।

अथेत्यादि – चतुर्थ्या उद्देश्यत्वजनकत्वरूपार्थयोः व्युत्पत्तिवैचित्र्यादुभयत्र अन्वयः।

अथ उपसर्गाणां प्रकारानाह – **तत्रेत्यादिना**। **उपसर्गस्येति** – उपसर्गनिर्देशो यथा *"प्रपरापसमन्ववनिदुरभिव्यधिसूदतिनिप्रतिपर्य्यपयः। उप आङिति विंशतिरेष सखे उपसर्गविधिः कथितः कविना"* इति। उक्तञ्च *"निपाताश्चादयो ज्ञेया उपसर्गाश्च प्रादयः। द्योतकत्वात् क्रियायोगे लोकादवगता इमे"* इति। वाचकत्वं शक्तिमत्त्वं, द्योतकत्वं तात्पर्य्यग्राहकत्वम्।

तत्रेति। द्योतकत्वं तात्पर्य्यग्राहकत्वम्। उपसर्गस्य द्योतकत्वे प्रमाणं यथा – *"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा। उपास्येते हरिहरौ लकारो दृश्यते यथा"*। (वै.सि.का42) इति। अत्र हि उपासना किम् उपसर्गार्थः, उत विशिष्टस्य, धातुमात्रस्य वा? नाद्यः। तथा सति स्वार्थफलव्यधिकरणवाचकत्वरूपसकर्म्मक-स्यास्धातोः उपासनारूपफलवाचकत्वाभावात् ततः कर्मणि लकारो न स्यात्। न द्वितीयः गौरवात्। तृतीये त्वागतं द्योतकत्वं तात्पर्य्यग्राहकत्वलाभात् इति भावः। एवं 'साक्षात्क्रियते' 'अलङ्क्रियते' 'उरीक्रियते शिवः' इत्यादौ धातोस्तत्तदर्थे लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवत् द्योतकत्वममीषामस्तीत्यव-गन्तव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

अथ क्त्वाप्रत्ययविचारः

तस्यानन्तर्य्य एव शक्तिः। 'भुक्त्वा व्रजति' इत्यादौ भोजनान्तरं व्रजनानुभवस्य सिद्धत्वात्। भोजनव्रजनयोः समानकर्तृकत्वं, व्रजनपूर्व्वकाले भोजनं वावगाहते। किन्तु समानकर्त्तृत्वमाक्षेपलभ्यम्। 'झनत्कृत्य पतति' 'मुखं सम्मील्य हसति' 'मुखं व्यादाय स्वपिति' इत्यादौ पतनहसनस्वपनादीनां कथमानन्तर्य्यम्। पतनाद्यनन्तरमेव झनत्काराद्युपलब्धेरिति वाच्यम्। झनत्काराद्यनन्तरमपि पतनादिसत्त्वान्न दोष इति निष्कर्षः।

अन्येऽपि *"द्योतकाः प्रादयो ज्ञेया निपाताश्चादयस्तथा। उपास्येति हरिहरौ लकारो दृश्यते यथा"* (वै.सि.का.42) इति। अत्र आसधातोरुपवेशने शक्तिः उपोपसर्गसम्बन्धाश्च विशिष्टार्थे लक्षणा, तत्रैव तात्पर्य्यग्राहकम् उपपदम्, अन्यथा आस्ते इत्यादावपि तादृशार्थे लक्षणास्वीकारसम्भवात् इति।

प्रकृत्यर्थेत्यादि – प्रकृतिश्च लकारस्य प्रकृते जिधातुरेव, तस्य प्रकृष्टजयरूपार्थविरहे प्रत्ययार्थेन प्रकृष्टजयरूपार्थस्य अनन्वये उक्तार्थबोधो न स्यात् प्रशब्दस्य प्रकृतप्रत्ययप्रकृतित्वाभावात्।

अथ क्त्वाप्रत्ययार्थनिरूपणम्। तस्य क्त्वाप्रत्ययस्य। आनन्तर्यस्य च 'भुक्त्वा व्रजती'त्यादौ व्रजादिधात्वर्थे अन्वयः, *"एककर्तृकयोः पूर्व्वकाले"* (कातन्त्र. कृत्. 433) इत्याद्यनुशासनबलात् यत्क्रियावाचकपदोत्तरक्त्वाप्रत्ययः तस्याः पूर्व्ववर्त्तित्वलाभात् अपरधात्वर्थस्य अनन्तरत्वनियमात्। तदेवोद्दिश्य व्रजनपूर्व्वकाले भोजनं वा अवगाहते इति उक्तम्।

अथ आनन्तर्य्यमात्रस्य क्त्वाप्रत्ययार्थत्वे कथं समानकर्त्तृकत्वम् अनुभवसिद्धं प्रतीयते इत्याकाङ्क्षायामाह – **किन्तु** इत्यादि। **झनत्काराद्यनन्तरमपीति**, पतनादीनां बहुक्षणवृत्तितया आदिमं क्षणं झनत्काराद्यधिकरणं परित्यज्य तदनन्तरक्षणीयपत-

---

झनत्कारेत्यादि। सत्यं पतनान्तरमेव झनत्कारादीनामुपलब्धिरिति, किञ्च पतनादिक्रियापरिनिष्पत्तेः पूर्वमपि झनत्कारादिरुपलभ्यते, तदपेक्षया समीचीनमानन्तर्य्यं यथोक्तेषु।

In Public domain. Digitization Muthulakshmi Research Academy

अथ नञर्थकथनम्

तत्र नञः संसर्गाभावोऽन्योन्याभावो वार्थः। तत्रायं नियमः। यत्र विशेष्यविशेषणयोर्भावान्वयेऽभेदान्वयबोधस्तत्रैवान्योन्याभावो नञा बोध्यते। यथा 'अयं घटो नीलः' इत्यत्र भावान्वये नीलघटयोरभेदो भासते। 'नायं नीलो घटः' इत्यत्र चाभावान्वये घटे नीलभेदो भासते। अत एव 'यजतिषु येयजामहं करोति नानुयाजेषु' इत्यत्रानुयाजभिन्नेषु यजतिष्वेव येयजामहस्य कर्त्तव्यता भासते। यत्र तु प्रतियोग्यनुयोगिनोर्भावान्वये भेदो भासते, तत्र संसर्गाभावो नञा

नादिग्रहेणैव आनन्तर्य्यस्यापि सामञ्जस्यात्। केचित्तु समानकालीनत्वमपि क्वचित् क्त्वाप्रत्ययार्थः तदुदाहरणमेव 'मुखं व्यादाय स्वपिति' इत्यादि। आनन्तर्य्यमात्रार्थवादिनस्तु पूर्व्वोक्तरीत्या एव समाधानं कुर्व्वन्ति।

नञर्थान् व्यनक्ति – तत्र नञ इत्यादिना। संसर्गाभावस्त्रिविधः प्रागभावध्वंसाभावात्यन्ताभावभेदात्। विनाश्यभावः प्रागभावः, जन्याभावः ध्वंसाभावः, सनातनसंसर्गाभावश्च अत्यन्ताभावः, तदुक्तं – *"प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते"* इति भाषापरिच्छेदग्रन्थे। अन्योन्याभावस्तु एकविध एव, स च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावः, तत्र नामान्वयो नञर्थः अन्योन्याभावः, यथा न ब्राह्मणः अब्राह्मणः, न घटः अघट इत्यादि, अनयोः नञर्थस्य ब्राह्मणपदार्थेन घटपदार्थेन च अन्वयात् ब्राह्मणभिन्नः घटभिन्न इत्यर्थप्रतीतेः अन्योन्याभावताप्रत्ययः।

धात्वर्थान्वयी नञर्थः अत्यन्ताभावः यथा 'चैत्रस्य न पाकः न गतिः न वा भोजनम्' इत्यादौ अभावेन प्रतियोगितया क्रियाया अन्वयात् अभावस्य अत्यन्ताभावत्वम्।

संसर्गेत्यादि। असौ किल संसर्गाभावस्त्रिधा। तथाहि – *"प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभावः इष्यते।"* इति।

In Public domain. Digitization Muthulakshmi Research Academy

बोध्यते। यथा 'भूतले घटः, न भूतले घटः', 'पचति चैत्रो, न पचति चैत्रः', 'चैत्रस्यौदनं, न चैत्रस्यौदनमि'त्यादौ भूतलादावनुयोगिनि घटकृतिस्वत्त्वानां भावान्वये भेदो भासते। अभावान्वये तेषां संसर्गाभावो बोध्यते। तेन भूतल-वृत्तित्वाभाववान् घटः, पाकानुकूलकृत्यभाववांश्चैत्रः, चैत्रसम्बन्धित्वाभाव-वदोदनमित्यन्वयबोधः। अत्रापि विशेषः। यत्रानुयोगिनि नामार्थप्रतियोगिक-

---

धात्वर्थान्वयी नञर्थ इव प्रत्ययार्थान्वय्यपि नञर्थः अत्यन्ताभाव एव। यथा 'इह भूतले घटो नास्ति, देवदत्तो न पश्यति' इत्यादौ।

बहुव्रीहिसमासस्थले तु नामार्थान्वयिनोऽपि नञर्थस्य अत्यन्ताभावरूपत्वं, यथा 'अघटं भूतलम्, अधनश्चैत्र' इत्यादि, अत्र घटस्य धनस्य च भूतले चैत्रे च यथासङ्ख्यम् अभावः प्रतीयते, एवम् अभावाधिकरणस्य सप्तम्या निर्द्देशे नामार्थान्वयित्वेऽपि नञर्थस्य अत्यन्ताभावरूपत्वमेव, यथा 'भूतले न घट' इत्यत्र इति केचित् वदन्ति। परे तु नात्र नञर्थस्य नामार्थान्वयित्वं, किन्तु 'भूतले घटो नास्ति' इत्येवमेव बोधात्, क्रियान्वयित्वमेव नञर्थस्य, क्रिया धात्वर्थ इत्याहुः।

प्रायेण उक्तार्थानुगतमेव ग्रन्थकारो निर्व्वक्ति – **यत्रे**त्यादि। विशेष्यविशेषणयोः नञर्थविनिर्म्मोकेण विशेष्यविशेषणभावापन्नयोः **भावान्वये** तयोरेव विशेष्य-विशेषणभावेन अन्वये, **तत्रैव** नतु अन्यत्र। **यत्रेत्यादि** – **अनुयोगिनि** अभावाधि-करणे नामार्थप्रतियोगिकसंसर्गाभावबोधः यथा 'भूतले घटो नास्ति' इत्यादौ – प्रत्ययार्थादिप्रतियोगिकसंसर्गाभावबोधस्थले तु न अनुयोगिनि सप्तम्यपेक्षा यथा 'न पचति चैत्र' इत्यादौ।

अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति – तथाहि 'घटो नास्ति' इत्यादौ अभावे प्रतियोगितासम्बन्धेन घटोऽन्वेति, अतो घटत्वमेव अन्वयिता-वच्छेदकं तदवच्छिन्नप्रतियोगितैव अभावे घटत्वावच्छिन्नस्य संसर्गः, अन्यथा यदि घटत्वावच्छिन्नप्रतियोगित्वादीनां द्रव्यत्वाद्यवच्छिन्नसंसर्गता स्यात्, तदा पटाधिक-रणेऽपि घटाभाववद्भूतलादौ नियमेन द्रव्यं नास्ति इत्याद्यभावप्रत्ययापत्तिः अनु-योगिनि संसर्गसत्त्वस्य एव संसर्गिसत्त्वनियामकत्वात् इति।

In Public domain. Digitization Muthulakshmi Research Academy

संसर्गाभावबोधः तत्रावश्यमनुयोगिपदे सप्तम्यपेक्षा कार्य्या। अत्र चाभावान्वये अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्त्या भासते। नीलघटवति 'भूतले न घटः' एवं 'नीलो घटो न घटः' इत्यप्रतीतेः। एवं 'पीतघटवति न नीलघटः, पीतघटो न नीलघट' इत्यादिप्रतीतेश्च।

यत्र तु सामान्ये विधिर्निषेधो वा विशेषे निषेधो विधिश्च, तत्र सामान्यस्य 'विशेषेतरपरत्वं' कल्प्यते। पदार्थान्तरसाकाङ्क्षं विशेषमपहाय, तदितरमेव सामान्यमन्वेति इति व्युत्पत्तेः। यथा 'ब्राह्मणेभ्यो दधि दातव्यम्, कौण्डिन्याय न दातव्यम्' इत्यत्र ब्राह्मणसामान्यस्य कौण्डिन्येतरपरत्वं भासते। प्रकृते तु ब्राह्मणसामान्यं दधिदाने साकाङ्क्षं कौण्डिन्यस्तु तदभावसाकाङ्क्षम् इति सामान्ये तदितरपरत्वं कल्प्यते, एवं 'ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय'

एवमिति प्रतियोगितामात्रस्य संसर्गत्वस्वीकारे यत्किञ्चिद्घटप्रतियोगिक-भेदमादाय नीलघटेऽपि घटो न इति प्रतीतिर्दुष्परिहरा, अन्वयितावच्छेदकावच्छिन्न-प्रतियोगिताकत्वस्य अभावे भानोपगमे तु घटत्वावच्छिन्नप्रतियोगिताकभेदस्य नीलघटे बाधात् नातिप्रसङ्गः, उक्तरीत्या च पीतघटवति नीलघटत्वावच्छिन्न-प्रतियोगिताकाभावस्य सत्त्वाच्च नानुपत्तिः, वैपरीत्ये तु अनुपपत्तिर्भवति, घट-सामान्याभावस्य तत्र सत्त्वात् अत एव अन्वयितावच्छेदकतायाः पर्य्याप्तिरपि निवेश्या।

यत्र तु इत्यादि। **सामान्ये** सामान्यधर्म्मावच्छिन्ने अन्यूनवृत्तिधर्म्मावच्छिन्ने इत्यर्थः, **विशेषे** विशेषधर्म्मावच्छिन्ने न्यूनवृत्तिव्याप्यधर्म्मावच्छिन्ने इत्यर्थः, **सामान्यस्य** अन्यूनवृत्तिधर्म्मावच्छिन्नस्य **विशेषेतरपरत्वं** न्यूनवृत्तिव्याप्यधर्म्मावच्छिन्न-बोधेच्छया उच्चरितत्वम्। **पदार्थान्तरसाकाङ्क्षमिति** सामान्यसाकाङ्क्षपदार्थातिरिक्त-पदार्थसाकाङ्क्षमित्यर्थः। **तदितरं** विशेषधर्म्मावच्छिन्नमेव सामान्यम् **अन्वेति** शाब्दबोधे भासते इति।

ब्राह्मणेभ्य इत्यादि - अत्र ब्राह्मणत्वं सामान्यधर्म्मः, तदवच्छिन्नेषु दधि-कर्म्मकदानस्य विधिः, कौण्डिन्यत्वं विशेषधर्म्मः तदवच्छिन्ने च दधिदानस्य

In Public domain. Digitization Muthulakshmi Research Academy

इत्यत्र दध्यपेक्षया पदार्थान्तरं तक्रमित्यतो ब्राह्मणसामान्यस्य तदितरपरत्वं भासते। तेन कौण्डिन्यस्य ब्राह्मणत्वपुरस्कारेण दधिदानं न प्रसज्येत। अत एवात्र इयं व्युत्पत्तिर्विशेषविधिनिषेधयोः सामान्यनिषेधविध्योरुत्सर्गत्वे अनुज्ञाफलकत्वम् इति। एवं 'मा हिंस्यात् सर्वा भूतानि' 'आग्नेय्यां श्वेतच्छागम् आलभेत' इत्यत्रापि हिंसासामान्यं निषेधसाकाङ्क्षम्। हिंसाविशेषस्तु विधौ साकाङ्क्षः। अतो हि सामान्यस्य वैधेतरपरत्वेन वैधेतरहिंसैवानर्थहेतुरिति निष्कर्षः।

एवं नञः कुत्रचित् प्रसज्यप्रतिषेधे शक्तिः, क्वचित् लक्षणया पर्य्युदास-बोधकत्वञ्च। यथा- 'एकादश्यां न भुञ्जीत' इत्यत्र भोजनस्य रागत एव एकादश्यामपि प्रसक्तौ तत्प्रतिषेधो बोध्यते। नत्वेकादशीभिन्नतिथौ भुञ्जीतेति पर्य्युदासविधिः। भोजनस्य केवलरागप्राप्तत्वात् कथं पर्य्युदासः? द्वितीयं यथा-

---

निषेधः इति कौण्डिन्यत्वरूपविशेषधर्म्मावच्छिन्नभिन्नेभ्य एव ब्राह्मणत्वरूप-सामान्यधर्म्मावच्छिन्नेभ्यो दधिदानमनुभवसिद्धं, तच्च सामान्यधर्म्मावच्छिन्न-वाचकस्यापि ब्राह्मणपदस्य कौण्डिन्येतरवाचकत्वकल्पनात्। एतदेवाह – **प्रकृते तु** इत्यादिना। पदार्थान्तरसाकाङ्क्षमित्याद्युदाहरणमाह – **ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय** इत्यादि।

निषेधो द्विविधः – प्रसज्यप्रतिषेधः पर्य्युदासश्च। प्रसज्यप्रतिषेधस्तु क्रियान्वयी अभावः निषेधार्थप्रधानश्च, तदुक्तं – 'अप्रधान्यं विधेर्यत्र प्रतिषेधे

प्रसज्येति। प्रसज्य प्रसक्तिं सम्पाद्य आरोप्येतियावत् प्रतिषेधः। अत्यन्ताभावे *"प्रसक्तं हि प्रतिषिध्यते"* इति न्यायेन आरोपितप्रसङ्गस्यैव निषेधः, तेन 'वायौ रूपं नास्ति' इत्यादावपि वायौ रूपारोपं कृत्वैव निषेधो नञा बोध्यते इति विवेकः। तथा च – *"अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥"* इति॥

पर्य्युदास इवि। *"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥"*

In Public domain. Digitization Muthulakshmi Research Academy

'अथ श्राद्धममावस्यायां पितृभ्यो दद्यात्' इत्यादि सामान्यशास्त्रं, तदनु 'रात्रौ श्राद्धं न कुर्वीत सन्ध्ययेरुभयोरपि' इति विशेषनिषेधस्तु पर्य्युदासविधिः कल्प्यते। तेन 'रात्रिसन्ध्येतरायाममावस्यायां पितृभ्यो दद्यादि'ति पर्य्युदासाल्लभ्यते। न तु निषेधविधिना रात्रिसन्ध्याधिकरणकश्राद्धे निषेधोऽवगम्यते, सामान्यश्राध्दस्य रात्रिसन्ध्यांशे कर्त्तव्यतापत्तेः। एवं 'न सगोत्रां न समानार्षेयीं भार्य्यां विन्देत' इत्यादौ यदा च परिवेदनस्य शास्त्रतः प्राप्तिस्तदा पर्य्युदासः, यदा तु रागतः प्राप्तिस्तदा प्रसज्यप्रतिषेध एवावगम्यते। केचित्तु 'अतिरात्रे षोड़शिनं गृह्णीयान्नातिरात्रे षोड़शिनम्' इतिवत् अत्रापि इच्छाविकल्प इति वदन्ति, तत्र तत्र नञः तुल्यत्वात्। अत्र तु सामान्यविशेषभावेनातुल्यबलवत्त्वादिति निष्कर्षः।

प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्'। पर्य्युदासस्तु *"प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।"* इति। यथा 'एकादश्यां न भुञ्जीत' इत्यत्र भोजनरूपक्रियया अभावस्य अन्वयः भोजनप्रतिषेधस्य च प्राधान्यम्।

द्वितीयस्य उदाहरणं यथा – **'अथ श्राद्धममावस्यायां पितृभ्यो दद्यात्'** इति, तदनन्तरं 'रात्रौ श्राद्धं न कुर्व्वीत' इति निषेधशास्त्रं, अत्र उभयोरेकवाक्यतापर्य्यालोचनया सामान्यविशेषभावेन अमावस्यायां पर्य्युदासनञर्थस्य अन्वयात् रात्रिभिन्नामावस्यायां श्राद्धस्य कर्त्तव्यता प्रतीयते, ननु रात्र्यधिकरणकश्राद्धे कर्त्तव्यताभाव इति विधेः प्राधान्यं निषेधस्य च अप्राधान्यमिति।

अत्यन्ताभावस्य प्रसज्यप्रतिषेधरूपत्वात् तस्यैव प्रसज्यप्रतिषेध इति संज्ञा। अत्यन्ताभावस्यैव क्रियान्वयित्वात्, पर्य्युदासस्तु भेद एव इति।

In Public domain. Digitization Muthulakshmi Research Academy

अथ वैधहिंसाविचारः

"मा हिंस्यात् सर्वा भूतानि" इति सामान्यशास्त्रम्। 'वायव्यां श्वेतच्छागमालभेत' इति विशेषशास्त्रम्। अत्र हिंसायां विधिनिषेधयोरवस्थानेन विरोधात् सामान्यशास्त्रं विशेषशास्त्रेण बाध्यते। विरोधे हि बलीयसा दुर्बलं बाध्यते। विशेषशास्त्रन्तु बलीयो निरवकाशत्वात्, सामान्यशास्त्रं दुर्बलं सावकाशत्वात्। तेन सामान्यशास्त्रस्य वैधेतरपरत्वम्। न खलु सर्वभूतहिंसाभावविषयकं कार्य्यम् इति निषेधः, विध्यर्थस्य बाधकं विना अग्निसोमीयपश्वालम्भनविषयकं कार्य्यं विध्यर्थ उपपद्यते इति मीमांसकाः।

अथ वैधहिंसां निर्व्वक्ति - मा हिंस्यादित्यादिना। सामान्यशास्त्रं प्राणिमात्राणामेव हिंसानिषेधबोधकं, विशेषशास्त्रं यत्किञ्चिज्ज्यातीयप्राणिहिंसाबोधकमिति।

अत्र हिसांयामित्यादि - निषेधशास्त्रस्य सर्व्वभूतविषयकत्वात् श्वेतछागलविषयकत्वमपीति, श्वेतछागलविषयकहिंसाविधिशास्त्रेण तद्विरोधः, एकत्रैव श्वेतच्छागले हिंसाकर्म्मत्वस्य तदभावस्य च असम्भवात्, अपवादविषयं परित्यज्य उत्सर्गः प्रवर्त्तते इति नियमेन विशेषशास्त्रविषयं परित्यज्य सामान्यशास्त्रस्य प्रवृत्तिर्व्वाच्या, विशेषशास्त्रविषयश्च श्वेतच्छागलविषयकालम्भनं तत्परिहारेण एव निषेधशास्त्रस्य प्रवर्त्तनात् श्वेतच्छागलेतरभूतविषयकहिंसानिषेधः प्रतिपद्यते, सर्व्वशब्दस्यापि उद्देश्यतावच्छेदकव्यापकविधेयव्याप्ययावत्त्वावच्छिन्ने शक्तिकल्पनेऽपि भूतपदेन श्वेतछागलेतरभूतलाभात् श्वेतछागलेतरभूतत्वव्यापकहिंसाकर्म्मत्वावबोधे न बाधः। निरवकाशा हि विधयः सावकाशान् विधीन् बाधन्ते इति।

आलभेतेति। आलभेत हन्यादित्यर्थः।

सामान्येत्यादि। अत्र हि बलाबलविधानं यथा- *"सामान्यविधिरुत्सर्गः, विशेषविधिरपवादः, उत्सर्गापवादयोरपवादविधिर्बलवान्"* इति।

विशेषेत्यादि। विशेषविधेरेकदेशमात्रनिर्बन्धतया अनन्यथासिद्धेरवकाशराहित्यमिति।

In Public domain. Digitization Muthulakshmi Research Academy

नन्वेवं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वम्। "अभिचारमूलं कर्म्म च" इति मनुनोपपातकगणमध्ये पाठादनिष्ट-साधनत्वञ्चावगम्यते, तदेतत् कथमुपपद्यते इति चेन्न। 'आततायिनमायान्तं हन्यादेवाविचारयन्' इत्येकवाक्यतया आततायिस्थले इष्टसाधनत्वम्, अनाततायिस्थले तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोधः कल्प्यते, "पदार्थान्तरसाकाङ्क्षं विशेषम्" इति न्यायात्। तथा च वैधेतरहिंसाया एव नरक-जनकत्वमिति कल्प्यते। टीकाकृद्वाचस्पतिमिश्रमते तु सामान्यविशेष-शास्त्रयोर्न विरोधो भिन्नविषयत्वात्। तथाहि 'मा हिंस्यात्' इति हिंसाया अनर्थ-हेतुता ज्ञाप्यते। 'वायव्यं श्वेतच्छागमालभेत' इति विशेषशास्त्रेण तु हिंसायाः क्रतूपकारकत्वं बोध्यते। अत एव वैधहिंसाया अपि नरकजनकत्वं

अनर्थहेतुतेति, – अनिष्टजनकत्वम्, तदुक्तं – *"दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त"* इति, तदुक्तं पञ्चशिखाचार्य्यैः *"स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्षः"* इति। **स्वल्पसङ्कर इति** – ज्योतिष्टोमप्रभृतियागजातस्य प्रधानस्य अपूर्व्वस्य स्वल्पेन पशुहिंसादिसम्भवेन अनिष्टसाधकेन अपूर्व्वेण सङ्करः। **सपरिहार इति** – स्वल्पप्रायश्चित्तेनापि निराकरणयोग्यः, प्रमादाश्च अननुष्ठिते प्रायश्चिते कर्म्मविपाकदशायाम् अवश्यमेवानर्थसमुत्पादः। **सप्रत्यवमर्ष** इति – प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तमानः, यथोक्तम् – *"मृष्यन्ते हि पुण्यसम्भारोपनीत-स्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्"* इति।

अत एवेत्यादौ। यथाह कौमुद्यां – *"दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयाति-शययुक्तः"* इत्यादि। अविशुद्धिः सोमयागादौ पशुवीजादि वधसाधनता। यथाह स्म भगवान् पञ्चशिखाचार्य्यः – *"स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्षः"* इति। स्वल्पसङ्करः ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य स्वल्पेन पशुहिंसादिजन्मना अनर्थहेतुना अपूर्वेण सङ्करः। सपरिहारः स्वल्पेनापि प्रायश्चितेन परिहर्तुं शक्यः। अथ प्रमादतो यदि प्रायश्चित्तादिकं नानुष्ठितं, तर्हि कर्म्मविपाकसमये च सुतराम् अनर्थम् उत्पादयति। सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तते इति तथोक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

क्रतूपकारकत्वञ्च कल्प्यम्, न तु स्वर्गजनकत्वं किन्तु क्रतोरेव स्वर्गजनकत्वं तत्तद्विशेषविध्यभिधानात्॥

अथ पदशक्तिनिरूपणम्

"तत्तत्पदबोद्धव्यत्वप्रकारकभगवदिच्छाविषयत्वं वाच्यत्वम्" इति न्यायलक्षणम्। "अर्थप्रतीत्यनुकूलपदपदार्थसम्बन्धव्यापारः शक्तिः" इति काव्यप्रकाशे। "अर्थप्रतिपादनानुकूलसम्बन्धविशेषः शक्तिः" व्याप्रियते अभिधीयते शाब्दैरर्थोऽनेनेति।[1]

सा च अस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छाविषयत्वम्। आधुनिकसङ्केते तु आधुनिकसङ्केत एव शक्तिः, अथवा तत्रापीश्वरेच्छा वर्त्तते सर्वत्रैव ईश्वरेच्छाविशेष एव शक्तिरिति निष्कर्षः।

अत एवेत्यादि – क्रतूपकारकत्वनरकत्वजनकत्वयोः मिथोविरोधविरहात् तथा कल्पनं सङ्गच्छते, क्रतोरेव अश्वमेधादि यागस्यैव, स्वर्गजनकत्वं दुःखासम्भिन्न-सुखरूपस्वर्गहेतुत्वं, तत्तद्विशेषविधिः – 'स्वर्गकामः अश्वमेधेन यजेत' इत्यादि स्वर्गफलाद्यावेदकविधिः।

अथ पदानां शक्तिं निरूपयति – **तत्तदित्यादिकमारभ्य**। भगवदिच्छा च घटपदात् घटो बोद्धव्य इत्याद्याकारिका, तत्र घटपदजन्यबोधविषयत्वं प्रकारः घटश्च विशेष्यः, 'घटो घटपदजन्यबोधविषयतावान् भवतु' इत्याकारो निष्कृष्टः।

जातौ व्यक्तौ वैशिष्ट्ये च इत्यादि उक्तपदार्थत्रये एव पदानां शक्तिः, तथा च आश्रयत्वसम्बन्धावच्छिन्ना या घटपदजन्यबोधविषयत्वप्रकारता, तन्निरूपितविशे-ष्यत्वं घटे, अवच्छेदकत्वसम्बन्धावच्छिन्ना या तादृशबोधविषयत्वप्रकारता, तन्नि-रूपितविशेष्यत्वं घटत्वे, स्वनिरूपितावच्छेदकतावच्छेदकसंसर्गत्वसम्बन्धाव-

---

यथोक्तमभियुक्तैः – *"मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्"* इति।

1. व्यापार इति शेषः

In Public domain. Digitization Muthulakshmi Research Academy

सा च जातिविशिष्टे एव, जातौ, व्यक्तौ, वैशिष्ट्ये च शक्तिः कल्प्यते, विशिष्टस्यैवान्वयबोधात्। तत्र जातेः प्रकारतया, व्यक्तेर्विशेष्यतया, वैशिष्ट्यस्य संसर्गतया, पदेनोपस्थाप्यते इति नैयायिकाः। नैयायिकमतेऽपि घटत्वविशिष्टे शक्तावपि घटत्वमपि तदर्थः, तेन स्वार्थादन्यरूपेण ज्ञाते लक्षणा भवति। केषाञ्चिन्मते तु व्यक्तावेव शक्तिर्जातिरवच्छेदिका व्यक्तेरनुगतत्वात्, जात्यवच्छेदेन व्यक्तौ शक्तिग्रहपदार्थोपस्थितितः शाब्दबोधादिति। मीमांसकास्तु जातावेव शक्तिर्लाघवात् व्यक्तेरन्वयबोधस्तु जातौ शक्त्यनुभवादेव इति वदन्ति।

अथ अकारादिपञ्चाशद्वर्णानां प्रत्येकं कुत्र शक्तिर्नतावत्तेष्वेव अभेदेनैव वाच्यवाचकभावाभावात्। किन्तु एकाक्षरकोशोक्तवासुदेवादिष्वेव शक्तिरिति निष्कर्षः। यदा तु पदशक्तिः पदार्थे गृह्यते, तदैव पदशक्तेः पदार्थानामनुभवः, तदनन्तरशाब्दबोधकाले पदश्रवणं ततः शक्तिस्मरणं, ततश्च पदार्थस्मरणं, ततः शाब्दबोध इति।

अथ शक्तिगाहकनिरूपणम्

"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥" तत्रोदाहरणं, व्याकरणेन धातुप्रकृतिप्रत्ययानां शक्तिग्रहो जायते, यथा – 'पाचक' इत्यादि। उपमा

च्छिन्ना तादृशबोधविषयत्वप्रकारता तन्निरूपितविशेष्यत्वं घटत्वप्रतियोगिकसमवाये इति पदार्थत्रये एव निरुक्तविशेष्यत्वरूपवाच्यत्वोपपत्तिः।

तेष्वेव इति प्रत्येकं तत्तद्वर्णेष्वेव, **एकाक्षरकोषोक्तेति** – *"अकारो वासुदेवस्स्यात् आकारस्य पितामह"* इत्यादि कोषवचनबोधितेत्यर्थः। पदज्ञानस्य कारण–

किन्त्वित्यादि। एकाक्षरकोषे प्रत्येकशो वर्णानां वाचकत्वं, तथा च दिङ्मात्रमुदाह्रियते,– *"अकारो वासुदेवः स्यादाकारश्च पितामहः। इकार उच्यते कामो लक्ष्मीरीकार उच्यते"*। इत्यादिवत्॥

In Public domain. Digitization Muthulakshmi Research Academy

यथा, - 'गौरिव गवयः' इत्यादौ। उपमानेन गवयपदस्य गोसादृश्यविशिष्टे शक्तिग्रहः। कोषेण पर्य्यायपदनानार्थपदानां तत्तदर्थेषु शक्तिग्रहो भवति। आप्तवाक्येन यथा - 'पिकः कोकिलपदवाच्य' इत्यादिना कोकिलपदस्य पिके शक्तिग्रहः। आप्तश्च प्रकृतवाक्यार्थगोचरयथार्थज्ञानवान्। व्यवहारेण यथा - प्रयोजकवृद्धेन 'घटमानये'त्युक्तम्। तत् श्रुत्वा प्रयोज्यवृद्धेन 'घट आनीतः'

त्वात् आदौ पदश्रवणं, ततः शक्तिधीः, तदनन्तरं व्यापारः पदार्थज्ञानं, ततः शाब्दबोध इति।

अथ शक्तिग्रहणकारणं निरूपयति - **शक्तिग्रह**मित्यादिना। **पाचक** इत्यादि - पचधातोर्व्विक्लित्त्यनुकूलव्यापारोऽर्थः। वुण्प्रत्ययस्य कर्त्तृत्वं, तत्पर्य्यालोचनया पाककर्त्ता इति बोधः। उपमा यथा - **गौरिव गवय** इत्यादि। यत्र अरण्यस्थेन केनचित् ग्रामीणं प्रति उक्तं गोसदृशो गवयपदवाच्य इति, पश्चात् ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यदर्शनं यज्जातं तत् उपमितिकरणं, तदनन्तरं

गौरिवेत्यादि। गलकम्बलादिशून्यत्वेऽपि गोसदृशबहुलधर्म्मवत्त्वं गवयत्वम्। सादृश्यं हि तद्गतभूयोधर्मवत्त्वं, यद्यपि गवये गलकम्बलादिर्नास्ति तथाऽपि गोसदृशबहुलधर्म्मवत्त्वमस्त्येव। तथा च - केनचिदारण्यकेन ग्रामीणं प्रत्युक्तं 'गोसदृशो गवयपदवाच्यः' इति। अथ तेनैव ग्रामीणेन कदाचिद्गवयमवलोक्य यदवधारयत् गवयोऽयमिति तदेवोपमितिज्ञानसाध्यमिति स्पष्टम्।

व्यवहारेणेत्यादि। *"लोकानामुपचारः व्यवहारः, तस्मादनुक्तस्यापि ग्रहसिद्धिर्वे -दितव्येति"* दुर्गः।[1] तथात्वं हि निपाताव्ययोपसर्गकारककालसङ्ख्यालोपादीना-मवगन्तव्यम्। तत्रोदाहरणं यथा- 'हरीतक्यः फलानि'। अत्र हि फलेष्वपि स्त्रियां वृत्तिः। 'खलतिकं वनानि' इत्यत्र वनानामेकवचनान्तमेव नाम। शब्दानामेकार्थेऽपि लिङ्गवचनभेदो दृश्यते। यथा - 'आपो जलम्', 'दाराः कलत्रं भार्य्या' इति। अत्राह दुर्गः- *"वैदिकाः लौकिकाश्चैव ये यथोक्तास्तथैव ते। निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसङ्ग्रहः"*।। इति।।

---

1. द्रष्टव्यम् लोकोपचारात् ग्रहणसिद्धिः-कातन्त्र. सन्धि. 23 इति सूत्रस्य दुर्गव्याख्या

तदवधार्य्य पार्श्वस्थबालो घटानयनरूपकार्य्यं घटमानयेति शब्दप्रयोज्यमित्यव-धारयति। तदनन्तरं पटमानयेति वाक्यात् पटानयनरूपं कार्य्यम्, पटमानयेति शब्दप्रयोज्यमित्यवधारयति। तदनन्तरं घटपदं घटे शक्तं, पटपदं पटे शक्तं, घटे द्वितीया विभक्तिः कर्म्मतायाम्, आङ्पूर्वनीपदमानयने, हि पदं कृतौ शक्यम् इति विच्छिन्नशक्तिग्रहो व्यवहारेण जायते। वाक्यशेषाद्यथा- 'यवमयश्चरु-र्भवती'ति श्रुतौ यवपदस्य दीर्घशूकविषये शिष्टानां कङ्गौ च म्लेच्छानां प्रयोग-दर्शनात्, यवपदार्थसन्देहे - 'वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।' इत्यादिवाक्यशेषाद्दीर्घशूक एव शक्तिग्रहः। विवरणादपि यथा विवरणं शब्दान्तरेण तदर्थकथनं, घटो नास्तीत्यस्य कलसो नास्तीत्यनेन घटपदस्य कलसे शक्तिग्रहः। एवं सान्निध्यादपि यथा, - 'इह सहाकारतरौ मधुरं रौति पिकः' इत्यत्र प्रसिद्धसहकारसान्निध्यात् पिकपदस्य कोकिले शक्तिग्रहो जायते।

अथ शब्दविचारः

स च द्विविधः - वर्णात्मको ध्वन्यात्मकश्चेति। तत्र वर्णात्मक एव साधु-शब्दः।

गोसदृशो गवयपदवाच्य इति, अतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः, तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः, नतु अयं गवयपदवाच्य इत्युपमितिः, गवयान्तरे शक्तिग्रहाभावप्रसङ्गादिति मुक्तावली।

शब्दान्तरेण तत्पर्य्यायेण अपशब्देन तदर्थकथनं तस्यैव अर्थविवरणम्, यथा - अत्र घटो नास्ति इत्युक्ते यत्र श्रोता प्रकृत्यर्थं धारयति तदनन्तरमेव कलसो नास्ति इत्युक्ते प्रकृतमर्थमनुधारयति तत्र [illegible]पदस्यापि घटत्वावच्छिन्ने शक्तिरिति प्रतिपद्यते।

स चेति। वैयाकरणमते तु स शब्दः षड्विधः। तथा हि, - *"मुख्यो लाक्षणिको गौणः शब्दः स्यादौपचारिकः। यौगिको योगरूढश्च शब्दः षोढ़ा निगद्यते"॥* इति।

In Public domain. Digitization Muthulakshmi Research Academy

सोऽपि द्विविधः – वाचको लाक्षणिकश्चेति। वाचकोऽपि चतुर्विधः – यौगिकः, रूढः, योगरूढः, यौगिकरूढश्चेति भेदात्। यत्र समुदायशक्तिनैरपेक्ष्येणावयवशक्त्यैव पदार्थोपस्थितिः, स एव यौगिकः। यथा पाचकादिः, पाप –कर्त्तृत्वादिपुरस्कारेण उपस्थितिः। यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्त्यैव पदार्थोपस्थितिः, स एव रूढः। यथा– 'गोमण्डपा'दिः, मण्डपानकर्त्तरि तु मण्डपपदं लाक्षणिकं, देवगृहे तु रूढम्। यत्र तु अवयवशक्तिसापेक्ष्येण समुदायशक्त्या पदार्थोपस्थितिः स एव योगरूढः। यथा पङ्कजादिः, पङ्कजनिकर्त्तृपद्मत्वमेव शक्यतावच्छेदकम्। यत्र तु केवलावयवशक्त्या कुमुदोपस्थितिः पद्मोपस्थितिर्वा तत्र पङ्कजपदं लाक्षणिकमेव। यत्र तु यौगिकार्थरूढ्यर्थयोर्युगपत् स्वातन्त्र्येणोपस्थितिः स यौगिकरूढ़ः। यथा – उद्भिदादिः, तेन युगपदेव उभयशक्त्या उभयोपस्थापकत्वम्। ऊर्ध्वभेदनकर्तृत्व –रूपेणावयवशक्त्या तरुगुल्मादिः, समुदायशक्त्या योगविशेषश्च बुध्यते। स वाचकः पुनश्चतुर्विधो भवति द्रव्यगुणक्रियाजातिभेदात्। यथा 'डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः' इत्यादौ डित्थडवित्थादिपदं केवलं द्रव्यवाचि, नीलपीतादिपदं गुणवाचि, अध्वगपाचकादिपदं क्रियावाचि, घटपटादिपदं जातिवाचीति॥

अथ शब्दं निरूपयति – **स च** इत्यादिना। **द्विविध** इति तदुक्तं– *"शब्दोध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः। काष्ठसंयोगादिजन्या वर्णास्ते कादयो मताः। सर्व्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते"*॥ इति

वर्णात्मक एवेति – एवकारो ध्वन्यात्मकशब्दव्यवच्छेदकशक्त्यादिज्ञानद्वारा अबाधबोधकत्वलक्षणसाधुत्वस्य व्याकरणपरिगृहीतत्वरूपसाधुत्वस्य वा ध्वन्यात्मकशब्दे असत्त्वात्।

सोऽपि द्विविध इति वैयाकरणमते मुख्यलाक्षणिकादिभेदेन। शब्दः षोढ़ा कथ्यते, तद्यथा – *"मुख्यो लाक्षणिको गौणः शब्दः स्यादौपचारिकः। यौगिको योगरूढश्च शब्दः षोढा निगद्यते"*॥ इति।

In Public domain. Digitization Muthulakshmi Research Academy

अथ चतुर्विधवाचकलक्षणम्

समुदायशक्तिनिरपेक्षावयवशक्तिमत्पदत्वं यौगिकत्वम्, यथा 'पाचका'दिः। अवयवशक्तिनिरपेक्षसमुदायशक्तिमत्पदत्वं रूढत्वम्, यथा 'गोमण्डपा'दिः। अवयवशक्तिसापेक्षसमुदायशक्तिमत्पदत्वं योगरूढत्वम्, यथा 'पङ्कजा'दिः। स्वतन्त्रोभयशक्तिमत्पदत्वं यौगिकरूढत्वम्। यथा – 'उद्भिदा'दिः। ऊर्द्ध्वभेदनकर्तृत्वं योगविशेषवत्त्वञ्च बोध्यते॥

अथ वाचकलक्षणम्

"साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः।" अस्यार्थः – सङ्केतितमर्थं यः साक्षादभिधत्ते अव्यवधानेनोपस्थापयति स एव वाचकः। अस्माच्छब्दादयमर्थो बोद्धव्य इत्युद्देशनं सङ्केतः। तेन ईश्वरसङ्केताधुनिकसङ्केतयोः सङ्ग्रहः। ईश्वरसङ्केतितो घटादिः, आधुनिकसङ्केतितो मैत्रादिः।

पाचकादिरिति – पाचकपदस्य व्युत्पत्तिगतार्थ एव मुख्यः, नतु तदतिरिक्तस्तदर्थः। गोपदस्य *"गमेर्डोरि"*[1] ति व्युत्पत्तिपर्य्यालोचनया गमनकर्तृरूपार्थ एव व्यवतिष्ठते। स च 'गौः शेते' इत्यादौ अनुपयुक्त इति अवयवार्थपरित्यागेन समुदाये अतिरिक्तोऽर्थः कल्प्यते। **द्रव्यगुणक्रियाजातिभेदादिति**, तदुक्तं – *"शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्व्विध्यादमीषान्तु शब्द उक्तश्चतुर्व्विध"*॥ इति।

अथ उक्तानां यौगिकादिभेदेन चतुर्व्विधानां शब्दानां लक्षणं पृथक् निर्व्वक्ति – **समुदायेत्यादिना**। प्रायेण एतत् स्पष्टं पूर्वलक्षणे व्याख्यातञ्च।

अथ वाचकसामान्यलक्षणमाह – **साक्षादित्यादिना**। **सङ्केतितं** सङ्केतेन विषयीकृतं सङ्केतनिरूपितविशेष्यताश्रयम् अर्थं, साक्षादित्यनेन लक्षकव्यवच्छेदः, लक्षणास्थले शक्यार्थस्य लक्ष्यार्थविशेषणतया उपस्थितेः। **ईश्वरसङ्केतितः** ईश्वरस्य इच्छया विषयीकृतः, तेन लाक्षणिकशब्देन तस्य लक्ष्यार्थस्य उपस्थितिः स्मृतिः न तु मुख्यार्थस्य इत्यर्थः। मुख्यार्थस्य बाधे एव लक्षणायाः प्रवृत्तेः। **वृत्तिर्द्विविधा** इति

---

1. कातन्त्र उणादि. 88

In Public domain. Digitization Muthulakshmi Research Academy

लक्षणया तु योऽर्थः समुपस्थाप्यते स लाक्षणिकः। तेन साक्षात्तस्योपस्थितिः, मुख्यार्थबाधादिसहकृतत्वात्। वृत्तिर्द्विविधा, शक्तिर्लक्षणा चेति। शक्तिर्निरुपिता, इदानीं लक्षणोच्यते। तथा च "लक्षणात्मकवृत्तिमत्पदत्वं लाक्षणिकत्वम्" सा च लक्षणा यथा -

"मुख्यार्थबाधे तद्योगे, रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया॥"

अस्यार्थः- मुख्यार्थबाधतदयोगयोः सत्त्वात् रूढिनिमित्तं प्रयोजननिमित्तं वा यत् यया वृत्त्याऽन्योऽर्थो लक्ष्यते उपस्थाप्यते, सैव वृत्तिर्लक्षणा। सैव च लक्षणा मुख्यार्थसम्बन्ध एव। स च सम्बन्धो यदा पदस्यान्यपदार्थे गृहीतस्तदैव पदसम्बन्धपदार्थानामनुभवस्तदनन्तरं शाब्दबोधकाले पदश्रवणं वृत्तिस्मरणं, तया च पदार्थस्मरणम्, ततः शाब्दबोधः। सा च क्वचित् रूढिहेतुका क्वचित् प्रयोजनहेतुका च। आरोपिता क्रिया आरोपितशब्दव्यापारः। अत्र रूढिहेतुका यथा - 'कर्म्मणि कुशलः' इत्यत्र मुख्यार्थस्य दर्भग्रहणादेव योगे विवेचकत्वादौ च तत्सम्बन्धत्त्वे कार्य्यनिपुणे लक्षणा, रूढितः प्रसिद्धत्वात्। यत्र तु पदान्तरसमभिव्याहारं विना केवलकुशलपदं प्रयुज्यते, तत्रावयवशक्त्या कुशग्रहणकर्त्तरि शक्तिरिति बोध्यम्। एवं देवपदसमभिव्याहारं विना यत्र मण्डपपदं प्रयुज्यते, तत्र अवयवशक्त्या च मण्डपानकर्त्तरि शक्तिरिति बोध्यम्। प्रयोजनहेतुका यथा- 'गङ्गायां घोषः प्रतिवसति' इत्यत्र मुख्यार्थस्य निवासस्यायोगे सामीप्यात्मकतत्सम्बन्धे सति तीरे लक्षणा शैत्यपावनत्वादिप्रयोजनात् कल्प्यते। 'गङ्गातटे घोषः प्रतिवसति' इत्यादौ तु तादृशप्रयोजनानवगतेर्न लक्षणादरः क्रियते। यत्र तु रूढिं प्रयोजनञ्च विना

- आलङ्कारिकैः व्यञ्जनाख्या वृत्तिरपरा कल्प्यते, नैयायिकैस्तु व्यञ्जनाप्रतिपाद्यस्य अर्थस्य उदीच्यमानसम्बोधेनैव निर्व्वाह इति नाधिका वृत्तिः कल्प्यते। शक्तिः निरूपिता *"अथ शक्तिनिरूपण"* मिति प्रस्तावे इति शेषः।

लक्षणा क्रियते, तत्र गौणी लक्षणा। यथा, - 'अग्निर्म्माणवकः, गौर्वाहीक' इत्यादौ सादृश्ये लक्षणा। लक्षणाबीजन्तु क्वचिदन्वयानुपपत्तिः, क्वचित्तात्पर्य्या -नुपपत्तिश्चेति। यथा - 'मञ्चाः क्रोशन्ति' इत्यादौ अचेतनस्य मञ्चस्य क्रोशान्वयानुपपत्या मञ्चपदेन मञ्चस्थपुरुषे लक्षणा।

एवं 'कुन्ताः प्रविशन्ति' इत्यत्रान्वयसत्त्वेऽपि तात्पर्य्यानुपपत्त्या कुन्तपदेन कुन्तधरे लक्षणा, इति प्राचीनाः। नव्यास्तु सर्वत्र तात्पर्य्यानुपपत्तिरेव लक्षणाया बीजमिति। सा च पुनर्लक्षणा द्विविधा - अजहत्स्वार्था, जहत्स्वार्था च।

सा च लक्षणेति *"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तित"* इति नैयायिकाः, *"मुख्यार्थबाधे तद्योगे"* इत्यादि च आलङ्कारिकसन्दर्भः। सैव च लक्षणा मुख्यार्थसम्बन्ध एव इत्यनेन नैयायिकमतानुगतत्वं रक्षितम्।

अग्निर्माणवक इति अग्निसदृशः माणवक इत्यर्थः। अत्र अग्निशब्दस्य अग्निसदृशे लक्षणा, गौर्वाहीक इत्यत्रापि वाहीकस्य जाड्यमान्द्यादिगुणसाधनेन गोसदृशत्वप्रत्यय इति गोसदृशे लक्षणा। अत्र रूढिप्रयोजनयोः विरहः। **अचेतनस्येति** हेतुगर्भविशेषणमिदं, क्रोशनस्य सचेतनधर्म्मत्वादिति भावः।

तात्पर्य्यानुपपत्त्या इति - *"वक्तुरिच्छा तु तात्पर्य्य"* मिति - वक्तुरिच्छया कुन्तधारिपुरुषप्रवेशविषयकत्वात् लक्षणां विना शक्यार्थमात्रमादाय तद्बोधानुपपत्तिः।

जहत्स्वार्थाजहत्स्वार्थयोर्व्विवरणं कृतपूर्व्वम्। यत्र शक्यार्थेऽपि क्रियाद्यन्वयो तत्र अजहत्स्वार्था, यत्र न शक्यार्थः तथा तत्र जहत्स्वार्थेति समासः। **तीरमेवेति** - एवकारेण जलप्रवाहरूपशक्यार्थस्य व्यवच्छेदात् प्रकृतस्य जहत्स्वार्थत्वं प्रकटी-कृतम्। अथ यदि गङ्गादिपदेन तीरादिमात्रं प्रत्याय्यते तदा कथं गङ्गापदात् न सरोवर -तीरादिलाभः स्यात्? यदि च गङ्गासम्बन्धितया, तदापि कथं जहत्स्वार्थत्वम्? विशेषणतया गङ्गादेरपि लक्ष्यार्थे अन्वयेन परम्परया क्रियान्वयात् इति चेत्? न, य -त्पदजन्यबोधे स्वार्थो न विशेष्यतया भातः, तस्यैव पदस्य जहत्स्वार्थाख्यलक्षणा -भ्युपगमः। प्रकृते गङ्गापदजन्यबोधे तत्सम्बन्धितीरं विशेषणतया भासते, नतु गङ्गा।

In Public domain. Digitization Muthulakshmi Research Academy

'काकेभ्यो दधि रक्ष्यताम्' इत्यादावजहत्स्वार्था, तेन काकपदं दध्युपघातकपरं लक्ष्यतावच्छेदकदध्युपघातकत्वेन काककुक्कुरादिसर्वमुपस्थाप्यते काकपदेन। एवं 'गङ्गायां घोष' इत्यादौ जहत्स्वार्था एव, तेन गङ्गापदेन तीरमेवोपस्थाप्यते।

अथ वीप्साविचारः

तत्र वीप्सा व्यापकता तदभिधाने द्विर्वचनं साधु। तत्र यत्पदस्य द्विरुक्तिस्तदर्थतावच्छेदकतानिरूपितसमभिव्याहृतपदोपस्थाप्यपदार्थव्यापकता बोध्यते। यथा – 'गृहे गृहेऽश्वाः' इत्यादौ गृहपदं गृहैकदेशपरं, तेन गृहत्व-समानाधिकरणात्यन्ताभावप्रतियोगित्वमश्वेषु बोध्यते। एवं 'अश्वयुक्

अथ वीप्सार्थं विचारयति – **तत्र वीप्सेत्यादिना। गृहत्वसमानाधिकरणेत्यादि** – अत्र व्यापकतया घटकात्यन्ताभावे प्रतियोगिवैयधिकरण्यं निवेश्यम्। अन्यथा यत्र गृहे अश्वः तत्रैव किञ्चिद्देशावच्छेदेन अश्वाभावस्यापि सत्त्वात् अश्वानां गृहत्व-समानाधिकरणात्यन्ताभावप्रतियोगित्वात् न व्यापकत्वमुपपद्यते, तन्निवेशे च अन्य-देशव्यवच्छेदेन सतोऽपि तदभावस्य न प्रतियोगिवैयधिकरण्यं प्रतियोगिनोऽश्व-स्यापि तदधिकरणे वृत्तेरित्यनुसन्धेयम्।

गृहपदादीनां गृहैकदेशादिपरत्वे तु न प्रतियोगिवैयधिकरण्यादिकमपि निवेश्यम्, अश्वावच्छिन्नदेशावच्छेदेन तद्भावस्य आवर्त्तमानत्वात्। एवमुत्तरत्रापि।

वीप्सास्थले व्यापकत्वबोधोऽनादिसिद्ध एव तात्पर्य्यग्राहकश्च द्विर्वचनम्, यथा *"यो यो धूमवान्, स स वह्निमान्"* इत्यादौ वह्नौ धूमव्यापकत्वभानम्, तथा सर्व्वत्रैव वीप्सासम्भव इति।

आत्मनः पुत्रमिच्छतीत्यादि – अत्र कौमारे *"नाम्नः आत्मेच्छायां यिन्"* [1] इति सूत्रं, तत्र नाम्न इति कर्म्मणि षष्ठी, आत्मन इच्छा इति कर्त्तरि षष्ठ्यन्तात्मशब्देन समासाच्च आत्मवृत्तीच्छाव्याप्यकर्म्मभूतनामोत्तरं यिन् (क्यच्) प्रत्ययः श्रूयते। तेन दुःखमिच्छति अघमिच्छति इत्यादिषु न यिन्, नहि कश्चिदात्मनो दुःखं अघं वा इच्छति अपि तु परस्यैवेति। आत्मनः पुत्रीयति

---

1. कातन्त्र. आख्यात.39

कृष्णपक्षे तु श्राद्धं कुर्य्याद्दिने दिने।' इत्यत्र दिनपदं तिथिपरम्, तेनाश्वयुक् कृष्णापक्षीयतिथित्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं श्राद्धे भासते। एवं 'अहरहः सन्ध्यामुपासीत' इत्यत्राहः पदं सन्ध्यावन्दनयोग्यकालत्रयपरं, तथा च तत्तत्कालोपाधिमन्निष्ठाभावाप्रतियोगित्वं सन्ध्यावन्दने भासते॥

अथ शाब्दबोधान्तरम्

'आत्मनः पुत्रमिच्छति' इत्याद्यर्थे "सुप आत्मनः क्यच्"[1] इत्यादिना क्यच् प्रत्ययः तेन पुत्रीयति इत्यादि सिद्धम्। तथा च पुत्रपदोत्तरक्यच्प्रत्ययस्य आत्मसम्बन्धिपुत्रविषयिणीच्छार्थः। आख्यातस्याश्रयत्वं, तदुपरि आश्रयत्वं संसर्गः, तेनात्मसम्बन्धिपुत्रविषयकेच्छाश्रयत्वाश्रय इति शाब्दधीः। एवं 'भार्य्यीयति, पयस्यति, राजीयति' इत्यादीनामपि अत्रैवार्थे काम्यच्प्रत्ययोऽपि साधुः। तेन पुत्रकाम्यतीत्यादिप्रयोगः। आत्मसम्बन्धिपुत्रविषयकेच्छा-श्रयत्वाश्रय इति धीः। 'पुत्रमिवाचरति भृत्यम्' इत्यर्थे "उपमानादाचारे"[2] इत्यादिना क्यच् प्रत्ययः। पुत्रीयति भृत्यमिति सिद्धम्। आचार आचरणं, व्यवहार इति यावत्। तेन भृत्यविषयकपुत्रतुल्यव्यवहारानुकूलकृत्याश्रय इति शाब्दधीः। एवं 'खर आत्मानं अश्वम् इवाचरति' इत्यर्थे "सर्वप्रातिपदिकेभ्यः क्यङो लुक्" इत्यनेन क्यङ् प्रत्ययलोपः। तेनाश्वति खर इति प्रयोगः

इत्यादिस्तु न प्रयोगः सापेक्षत्वात्, *"न सापेक्षे समासश्च"* इति नियमे चकारेण आख्यातप्रत्ययस्यापि निर्देशात्। परस्यापि राजीयति इत्यादौ साधनप्रणाली स्वस्वव्याकरणे अनुसन्धेया।

"उपमानादाचारे" इति – अत्र आचारो मननस्वरूपः, अत एव पुत्रीयति माणवकमित्यादौ सकर्म्मकत्वमनुसन्धेयम्। पुत्रशब्देन लक्षणया पुत्रसदृशरूपार्थो बोध्यते, इवशब्दो द्योतकः, ततश्च युक्तार्थत्वेन वा इवशब्दार्थस्य द्योतितत्वात् पुत्रीयति इत्यादाविव शब्दस्याप्रयोग एव, यथा शस्त्रीव श्यामा शस्त्रीश्यामा इत्यादौ।

1.अष्टाध्यायी 3.1.8 2.अष्टाध्यायी 3.1.10

In Public domain. Digitization Muthulakshmi Research Academy

अश्वतुल्यव्यवहारानुकूलकृत्याश्रय खर इति शाब्दधीः। एवं 'प्रभवति भृत्यः' 'रिपवति मित्रम्' इत्यादि सिद्धम्। अधिकरणवृत्त्यात्रापि आचारे क्यच् प्रत्ययः। प्रासादीयति कुट्यां, पर्य्यङ्कीयति मञ्चके, तेन कुटीरविषयकप्रासादाधिकरणक-व्यवहारानुकूलकृत्याश्रय इति शाब्दधीः। 'वृद्धः शिशुमिवाचरति' इत्यर्थे "कर्त्तुः क्यङ् सलोपश्च"[1] इति क्यङ् प्रत्ययः। तेन शिशूयते वृद्धः, शिशुतुल्यव्यवहारानुकूलकृत्याश्रय इति बोधः। एवं 'एरण्डोऽपि द्रुमायते' 'काकोऽपि मयूरायते' इत्यादि सिद्धम्॥

अथ एकादिसङ्ख्याशब्दविचारः

'एकं दशं शतञ्चैव सहस्रमयुतन्तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च॥
बृन्दं खर्वी निखर्वश्च शङ्खपद्मौ च सागरः।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथोत्तरम्॥'

अथ सङ्ख्यां विचारयति - **एकमित्यादिना। दशवृद्ध्या यथोत्तरमिति** - तथा च दशदशकेन शतं, दशशतकेन सहस्रं, दशसहस्रकेण अयुतं, दशायुतकेन लक्षम्, दशलक्षकेण नियुतम्, दशनियुतकेन कोटिः, दशकोटिभिः अर्ब्बुदम्, दशार्ब्बुदकेन बृन्दं, दशबृन्देन खर्व्वं, दशभिः खर्व्वैः निखर्व्वः, दशभिः निखर्व्वैः शङ्खः, दशभिः शङ्खैः पद्मः, दशभिः पद्मैः सागरः, दशभिः सागरैः अन्त्यं, दशभिः अन्त्यैः मध्यं, दशभिः मध्यैः परार्द्धमिति।

ऊनविंशत्यादेरिति। उभयत्रैव सङ्ख्याविशिष्टे च शक्तिरिति शेषः। **सामानाधिकरण्येन** इत्यादि - यथा ऊनविंशतिर्ब्राह्मणा इत्यादौ, अत्र सामानाधिकरण्येन ब्राह्मणपदार्थे ऊनविंशतिशब्दार्थस्य अन्वयः। ब्राह्मणानाम् ऊनविंशतिः

प्रासादीयति इत्यादौ। *"प्रासादीयति यः कुट्यां पर्य्यङ्कीयति मञ्चके। तस्य सन्तोषशीलस्य कुलिकाप्यप्सरायते"।* इति पद्मनाभः।

1.अष्टाध्यायी 3.1.11

In Public domain. Digitization Muthulakshmi Research Academy

तत्र एकाद्यष्टादशान्ताः सङ्ख्याशब्दाः सङ्ख्याविशिष्टे एव शक्ताः, केवलसङ्ख्योपस्थितिः लक्षणयैवेति बोध्या। ऊनविंशत्यादेस्तूभयत्रैव। तत्र विशेषः – यत्र सामानाधिकरण्येनान्वयस्तत्र सङ्ख्याविशिष्टे, यत्र तु वैयधिकरण्येन तत्र सङ्ख्यायामेव। ऊनविंशतिर्ब्राह्मणाः, ब्राह्मणानाम् ऊनविंशतिरिति बोध्यम्। तत्रापि विशेषः – एषां विंशत्यादिशब्दानाम् एकवचनान्ततैव।

यत्र तु एकादादीनां द्वित्वं बहुत्वं तात्पर्य्यविषयं, तत्र द्विवचनादिकमपि प्रयोज्यम्। एवम् एकादिचतुरन्ता वाच्यलिङ्गतया त्रिषु वर्त्तन्ते। पञ्चादयस्तु सर्वदा अजहल्लिङ्गाः। एवं 'एको ब्राह्मणः' इत्यत्र जातिपुरस्कारेण ब्राह्मणमात्रो–पस्थितमेकपदं सार्थकम्। 'द्वौ ब्राह्मणौ' इत्यत्र द्विपदं द्वुतबोधाय सार्थकम्। 'त्रयो ब्राह्मणाः' 'चत्वारो ब्राह्मणा' 'पञ्च षड्वा' इत्यादौ तु बहुवचनेन बहुत्वावच्छिन्नब्राह्मणोपस्थितौ, त्रिचतुरादीनां तु तद्व्यावर्त्तकतया सार्थकत्व–मेवेति निष्कर्षः॥

इत्यत्र ऊनविंशतिसङ्ख्याया ब्राह्मणपदार्थस्य वैयधिकरण्येन अन्वयः, सामानाधि–करण्येनान्वयं प्रति समानविभक्तिमत्त्वस्य तन्त्रत्वात्। एषामित्यादि – *"विंशत्याद्याः सदैकत्वे नित्यं सङ्ख्येयसङ्ख्ययो"* रिति कोषवादात्। ऊनविंशत्यादीनां सङ्ख्यायां सङ्ख्येये च शक्तिरवसेया, विंशतेः शब्दपरत्वनिर्देशेन ऊनविंशति–शब्दस्यापि लाभात्।

यत्र तु इत्यादि – यथा *"ब्राह्माणानां द्वे विंशती भोज्य"* इत्यादिः। एकादिचतुरन्तानां लिङ्गविशेषे वैषम्यमस्तीति त्रिषु तद्वृत्तित्वस्वीकारः। पञ्चादीनान्तु सर्वत्रैव लिङ्गे समरूपत्वात् न लिङ्गवैषम्यस्वीकारप्रयोजनम्। त्रयो ब्राह्मणा इति

ऊनविंशेत्यादि। *"विंशत्यादिः सदैकत्वे सर्वो सङ्ख्येयसङ्ख्ययो"* रितिकोष–वचनात् ऊनविंशत्यादिसङ्ख्याशब्दस्य सङ्ख्येये सङ्ख्याने च शक्तिरवगन्तव्या, एकवचनान्ता च।

In Public domain. Digitization Muthulakshmi Research Academy

आलोक्य विविधग्रन्थं विचार्य्य च पुनः पुनः।
कृतेयं जयकृष्णेन शब्दार्थसारमञ्जरी॥

इति शाब्दिकजयकृष्णविरचिता शब्दार्थसारमञ्जरी समाप्ता॥ ऊँ तत्सत्।

बहुवचने बहुत्वप्रतिपादनात् ब्राह्मणा इत्येतन्मात्रेण बहुत्वावच्छिन्नब्राह्मणबोधः स्यात् न तु विशेषतः त्रित्वादिकं, अत एव विशेषतस्त्रित्वादिबोधनाय त्रिशब्दादिकं तत्तत्स्थलेषु अपेक्ष्यते। द्वौ ब्राह्मणौ इत्यत्र यद्यपि ब्राह्मणौ इत्यनेनैव द्वित्वावच्छिन्न-ब्राह्मणबोधः जायते तथापि द्रुतं द्वित्वबोधाय तदिति निवेदितमेवेति व्याख्यायमानवस्तुसङ्क्षेपः॥

इति काव्यव्याकरणतर्कतीर्थविद्यावारिधि श्री कालीपदतर्काचार्य्यकृता सारदीपिकानाम्नी सारमञ्जरीव्याख्या समाप्ता॥ ओं तत्सत्।

इति श्री आशुबोधविद्याभूषणविरचिता सारमञ्जरीव्याख्या समाप्ता।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

978-93-80171-25-8

ISBN - 978-93-80171-25-8

SANSKRIT ACADEMY
Adarsh Shodh Sanstha,
Recognized by Rashtriya Sanskrit Sansthan
Osmania University Campus
Hyderabad - 07